ISSN-2277-6443

विद्यारश्मिः

राष्ट्रियवार्षिकशोधपत्रिका

Annual National Research Journal

2016

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क.जे.सोमैया-संस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई-77

ISSN-2277-6443

विद्यारश्मिः

राष्ट्रियवार्षिकशोधपत्रिका

Annual National Research Journal
2016

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

प्रधानसम्पादकः
प्रो. एम्. चन्द्रशेखरः
प्राचार्य्यः

सम्पादकाः
प्रो. प्रकाशचन्द्रः
प्रो. ई. एम्. राजन्
प्रो. मदनमोहनझाः
प्रो. बोधकुमारझाः
डा. नारायणन्. ई. आर्.
डा. (श्रीमती) गीता दुबे

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७

© प्रकाशकाधीनः

प्रकाशकम् राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

प्रकाशनवर्षम् 2016

अङ्कः पञ्चमः

प्रधानसम्पादकः प्रो. एम्. चन्द्रशेखरः, प्राचार्य्यः

सम्पादकमण्डलम् प्रो. प्रकाशचन्द्रः
प्रो. ई. एम्. राजन्
प्रो. मदनमोहनझाः
प्रो. बोधकुमारझाः
डा. नारायणन्. ई. आर्.
डा. (श्रीमती) गीतादुबे

पत्रिकाप्रतिरूपाणि 200

मुद्रकः वन्दना आर्ट्स्, मुम्बई ।

अवधातव्यम् पत्रिकायाममुष्यां प्रकाशितलेखानां मौलिकत्वस्य तत्रत्यप्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं पत्रलेखकानामेव, न तु प्रकाशकस्य, सम्पादकस्य वेति स्पष्टं विज्ञप्यते ।

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2015-16/419

Date 02.03.2016

सन्देशः

''भूत्यै जागरणम्। अभूत्यै स्वपनम्।''

जगदिदं प्रतिक्षणं परिवर्तते। गतिशीलं जीवनं नवं पन्थानम् अन्विषति। प्राक्तनं संशोध्य परिष्कृतं नूतनम् अवाप्तुं कांक्षति मनः। मानवस्य आकांक्षा संशोधिता नितरां फलति। जिज्ञासुः नरः विद्यया आत्मानं रक्षति। शिक्षितो जनः ज्ञानामृतं पिपासुः अध्ययनेन वर्धते। अत्र दिशि राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थः सोमैयापरिसरः ''विद्यारश्मिः'' इत्याख्यां शोधपत्रिकां प्रकाशयतीति ज्ञात्वा भृशं तुष्यति मे चेतः। आचार्याणां शोधलेखाः छात्राणाञ्च लेखाः पत्रिकाम् इमां भूषयन्तीति मन्ये। सेऽयं पत्रिका ''विद्यारश्मिः'' श्रेयसे कल्पताम् इति कामये।

प्रधानसम्पादकप्रभृतिभ्यः सर्वेभ्यः विद्यारश्मिपरिवारस्य सदस्येभ्यः शुभः स्यात् सन्देशः।

शोधपत्रिकाप्रियः
भावत्कः

पु ना शास्त्री

(पी.एन. शास्त्री)
कुलपतिः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

Shree Somnath Sanskrit University

(Estd. by Government of Gujarat)

Rajendra Bhuvan Road, VERAVAL-362 266
District : Gir Somnath, Gujarat, INDIA
Phone : 02876 - 244531 • Fax : 02876 - 244417

Prof. Ark Nath Chaudhary
Vice - Chancellor

Ref. : SSSU/VC/224/2016

Date - 16-2-2016



शुभकामनासन्देशः

प्रियाः प्रो. चन्द्रशेखरमहोदयाः

प्राचार्याः

राष्ट्रियसंस्थानस्य मुम्बईस्थस्य क.जे. सोमैया-संस्कृतविद्यापीठपरिसरस्य राष्ट्रियशोधपत्रिका 'विद्यारश्मिः' इति प्राकाश्यं नीयमानेति विज्ञाय प्रसादमनुभवामि ।

भवतां नेतृत्त्वे व्याकरणशिक्षाशास्त्रसाहित्यज्योतिषशास्त्रादिविषयेऽध्याप्यमानानां सुयोग्यानाम् आचार्याणाम् उपाचार्याणां सहायकाचार्याणां च शोधलेखैः, विशिष्टविदुषां वैदुष्यपूर्णैः लेखैः, शोधर्थिनाञ्च शोधपरकैः मूल्यवद्धिः लेखैः, छात्रान्तराणां च भाषात्रये गवेषणापरकज्ञानपूर्णलेखैः सम्भृता ग्रथिता चेयं पत्रिका संस्कृतशास्त्रजिज्ञासूनां कृते भृशं उपकारिका स्यादिति विभावये ।

अवसरेऽस्मिन् प्राचार्यसहितेभ्य आचार्यच्छात्रेभ्यः मदीया अशेषशुभकामनाः सन्तु ।

भवदीयः

(प्रो. अर्कनाथचौधरी)
कुलपतिः

Phone : (R) 02876-244530, (M) 094266 87450, - 08462830055
Email : vc.sssuni@gmail.com, choudharyarknath@gmail.com

प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

Prof. Ramesh Kumar Pandey
Vice Chancellor

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
'ए' ग्रेड (नैक द्वारा)
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110 016

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
'A' Grade (By NAAC)
B-4, Qutub Institutional Area, New Delhi-110 016

दिनाङ्कः: 12.02.2016

मङ्गलसन्देशः

अतितरां मुदमाप्नोमि विदित्वेदं यन्मुम्बापुरीस्थराष्ट्रियसंस्कृतसंस्थानपरिसरेण के.जे. सोमैयासंस्कृतविद्यापीठेन संस्कृतशास्त्रीयज्ञानविज्ञानाधारिता 'विद्यारश्मिः' इति राष्ट्रियशोधपत्रिका नचिरान्नानाविचारगोचरा प्रकाशतामानीयत इति। अनुभवविभवभव्यं किमपि प्रकाशन-मवगजवरजयोपक्रमं विधत्त इत्यसंशयं वक्तुमुचितम्।

इदमत्रोक्तं नैव यत् संस्कृतं न भाषामात्रमपितु संस्कृतं नो जीवनं भारतीयानां, जीवनोन्नायकञ्चेति। संस्कृते विद्यमानानि शास्त्राणि पुरातनकालात्प्रसृतानि प्रथयन्ति स्वमूलत्वं साम्प्रतमप्यत्याधुनिकविद्यासु। शिक्षाशास्त्रेऽपि संस्कृतस्याऽऽवैदिककालादप्रतिमं योगदानं दरीदृश्यते सुतराम्। शिक्षासमाजयोः सर्वाङ्गविकासायास्ति वस्तुतः परस्परं प्रति परस्परानुगुण्यं शास्त्रसम्मत-मनुभवसम्मतं च। पटभूमौ चित्राभिव्यक्तिरिव समग्रसमाजस्य पृष्ठभूमावेव शिक्षा परिस्फुरति। अद्यत्वे निखिलेऽपि विश्वे विश्वविद्यालयसदृशानि नानाशिक्षायतनानि शोभन्ते, प्रसारयन्ति च शिक्षामौपचारिकीं विकासाय सामाजिकानाम्। किन्तु, नेदमस्माभिर्विस्मर्तव्यं भारतीयैर्यत् न स समाजो देशो वा शाश्वपदवीं लभते, यस्य शिक्षायतनाद् बहिरपि अनौपचारिकशिक्षाया विस्तृतः परिधिर्नास्ति। वस्तुतस्तु एतादृशपरिधिरेवास्मद्देशसभ्यताया अद्वितीयो जीवातुः। मध्यकालीनयुरोप इवास्माकं देशेऽपि शास्त्रशिक्षायाः प्राधान्यमासीत्। परन्तु समाजे विशिष्ट-साधारण जनयोर्नित्यं संवादः प्रचलन्नासीत्। पण्डितापण्डितानां गङ्गास्नानमरुभूमिव्यवहारवत् वैपरीत्यं न प्रतीयते स्म। न तादृशोऽनादृतो भागो देशेऽस्मिन्नासीत् यत्र रामायण-महाभारत-गीता-भागवत-पौराणिकाख्यानानां धर्मव्याख्या नित्यं न प्रसरति स्म। कठिनतराऽपि विद्या रसाविगलिततया कोमलतासम्पुटेन प्रदीयते स्म। अद्यापि सैषा परम्परा भारतीयशिक्षाक्षेत्रे प्रवर्तते, गतानुगतिकोर्वग च नो बौद्धिकता यस्याः प्रमाणमेव। अतस्तादृश-परम्परोद्बुद्धविद्यायाः शिक्षायाश्च सिद्धान्तानामेकैकप्रतिपाद्यवस्तु परिपक्वबुद्धीनां सुकुमारमतीनां च लाभाय पत्रिकायामस्मिन् विन्यस्तुं क्रियमाणोऽयं प्रयत्नोऽवश्यं प्रशस्यः। विश्वसन्नस्मि 'विद्यारश्मिः' भस्मीकृत्य सकलं तमः सन्ततमखिलानर्थान् प्रकाशयिष्यति विश्वस्मिन्निति।

रमेशकुमारपाण्डेयः
(रमेशकुमारपाण्डेयः)

दूरभाषः: 011-26851253, 26564003, Fax: 011- 26520255
E-mail: profrkpandey@yahoo.co.in, vcslbsrsv@yahoo.co.in

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA
SHRI VIHAR, PURI – 752003, ODISHA

Prof. Gangadhar Panda
VICE-CHANCELLOR

Ph. (06752) 211663 (Off.)
251640 (Res.)
250484 (Fax)
visit : www.sjsv.nic.in
E-mail : Sanskrit.university@yahoo.com



शिवसङ्कल्पः

सुरसरिदिव सुरभारती नित्यप्रभावा । सुरधुनी न केवलमान्तरिकं दैन्यं दूरीकरोति, अपि तु हृदयस्य जाड्यान्धकारञ्चापहन्ति। उक्तं च पण्डितराजेन –

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां द्रुतं दूरीकुर्वन् सकृदुपगतो दृष्टिसरणिम् ।
अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥

सुरधुनीव सुरभारती वैदिकसंहितात आरभ्यार्वाचीनसंस्कृतं यावन्निरवधि जगदुपकरोति । संस्कृतं पुरा सर्वेषामेव शास्त्राणां माध्यमरूपेण व्यवहृतमासीत् । अष्टादशविद्याभिः साकं चतुःषष्टिकला अप्यनया वर्णिता अभूवन् । रामायणसमये इयं कथिता भाषेति निश्चप्रचं हनुमद्-वचनाद् ज्ञातुं शक्यते –

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति ॥ (रामा. सुन्दर. ५/१४)

रामायणादिकाव्यम् । परवर्त्तिकाले यावन्ति काव्यानि धरणीतले लब्धानि तानि रामायणोपजीव्यानि । अपरमार्षकाव्यं महाभारतमपि परवर्त्तियुगस्योपजीव्यमभवत् । एकलक्षपरिमितश्लोकैर्व्यासेनामितबुद्धिना एतन्माध्यमेन सर्वाणि शास्त्राण्यञ्जसा प्रतिपादितानि । तन्महिमानं वर्णयता महाभारतेनोच्यते –

अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् । काव्यशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥ (महा. आदि २/८३)

साम्प्रतं यच्छोधकार्यं समीक्षणात्मकमध्ययनं वा दरीदृश्यते तत्तद्ग्रन्थमुररीकृत्य तथा पुरा नावलोक्यते स्म । परन्तु वेदानां वेदाङ्गानि (ब्राह्मणग्रन्थाश्च) व्याकरणे पाणिनेरष्टाध्याय्याः वार्त्तिकं भाष्यं च, तदनु प्रातिशाख्यानि, उपनिषदामुपरि शाङ्करभाष्यं च गहनं प्रगतं च शोधकार्यमिति वक्तुं शक्यते । काव्येषु बृहत्त्रयी नाम- भारविमाघश्रीहर्षकाव्यान्यधिकृत्य समालोचकशिरोमणेर्मल्लिनाथस्य यथाक्रमं घण्टापथ –सर्वङ्कषा–जीवातुटीकाः परमगवेषणासाध्या इति निगदितुं नास्ति शङ्कापङ्कावशेषः । पुराणेषु 'विद्यावतां भागवते परीक्षा' इति न्यायेन भागवतमनुशीलयद्भिः समालोचकैरुक्तं यद् धर्मार्थकाममोक्षरूपश्चतुर्वर्गस्तत्रैव वर्त्तते । यथा सतीचरितावहगाहनेन धर्मः, ध्रुवचरितेनार्थः, पृथुचरितेन कामः, पुरञ्जनचरितेन च मोक्षपुरुषार्थो यथाक्रमं समासाद्यन्ते । विष्णुपुराणमपि भगवच्छब्दस्य शोधपरकव्याख्यां विदधाति ।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ विष्णुपुराणम् – ६/५/७४

एतादृशं शोधकार्यं स्वकुक्षौ धारयन्तीं शास्त्रीयज्ञानं मोक्षपरकं वेदादिशास्त्रं, विज्ञानपरकं च शिल्पशास्त्रं पुष्णन्तीं राष्ट्रियसंस्कृतसंस्थानाङ्गभूतो मुम्बईनगरस्थो विद्याविहारपरिसरो राष्ट्रियशोधपत्रिकां 'विद्यारश्मिः' इति नामिकामह्नाय प्रकाश्यमानयतीति निशम्य मोमुद्यते मे हृदयम् । अस्याः सफलतां कामयमानः कालिदासप्रणीतेन भरतवाक्येन शुभाशंसां वितनोमि –

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु । सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥

गङ्गाधरपण्डा
24/2/16

प्रो. गङ्गाधरपण्डा
कुलपतिः

प्रो. एम् चन्द्रशेखरः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ४०००७७

Prof. M. Chandrashekhar
Principal
Rashtriya Sanskrit Sansthan
(Deemed University)
K. J. Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai – 400 077

प्रास्ताविकम्

स्थिरो भव । आशुर्भव । पृथुर्भव । - यजु. ११-४४

अथ समस्तजगदाधारस्सकलकल्याणकृच्छ्रुतिरिति प्रामाणिकसंविद् । प्रामाणिकैश्च भगवती श्रुतिरभ्युपकृता, तदितरेषामपि तच्छ्रुतिम्प्रत्यस्त्येवादर इत्यार्यावर्तनिकायाकूतिर्नात्र प्रमाणान्तरापेक्षा ।

अतोऽध्ययनाध्यापनपरिपाट्या पुनश्शास्त्रसंरक्षणं बोभूयादिति चिन्तावृत्तेः परिणामः खलु शास्त्रशिक्षणैकरतं वैदिकन्ध्येयं परिदधानं राष्ट्रियसंस्कृतसंस्थानमिति सकलविद्वज्जातसुरभारती-समुपासकसमवायसंविदितमेव ।

नवयुगेऽस्मिन् संस्कृतविद्यायाः नवोत्थाने संस्थानस्यावदानं नितरां वर्तत एव । बृहत्तमाख्य- मानितविश्वविद्यालयरूपवृक्षस्य नैकाः शाखाः परिसरत्वेन प्रथितास्सन्ति । एकादशपरिसरेष्वेतेषु प्रतिवर्षं चतुस्सहस्राधिकाश्छात्रा अधीयानाः प्रथयन्ति संस्कृतस्य तारुण्यम् ।

तत्रायं मुम्बादेव्याश्चरणयोः प्रतिष्ठापितः मुम्बईपरिसरस्सुविद्यार्थी वर्धतेतराम् । प्रतिवत्सरमिव ऐषमो वार्षिकोत्सवसन्दर्भे **विद्यारश्मिः** इति नाम्नी राष्ट्रियवार्षिकशोधपत्रिका प्रकाश्यत इति मोमुदीति नश्चेतः । शोधपत्रिकायामस्यां विद्वन्मणीनामाचार्याणां, गुरूणां, प्राध्यापकानां, शोध-च्छात्राणां, विद्यार्थिनाञ्च नानाशास्त्रनिबन्धाः ग्रथितास्सन्ति ।

शोधपत्रिकायाः यशस्वितायै स्वीयशुभसन्देशप्रेषणेनोपकृतवद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः विद्वत्तल्लजेभ्यः प्रो. पी. एन्. शास्त्रिवर्येभ्यः हार्दं कार्तज्ञ्यं व्यनक्त्ययं परिसरः ।

एवमेव शोधपत्रिकामिमां स्वीयशुभकामनाभिः फलीकृतवद्भ्यः सर्वेभ्यः नैकसंस्कृतविश्वविद्यालय कुलपतिभ्यः परिसरोऽयं स्वीयं कार्तज्ञ्यं बिभर्ति ।

शोधपत्रिकां सुष्ठु सम्पादितवते विद्वद्गणायास्तु भूरि शुभम् ।

विद्यारश्मिरिति पत्रिका विद्वज्जनतोषिणी शास्त्रविद्योतिनी च भूयादिति भूतगणाधिसेवितं गजाननं सम्प्रार्थये ।

॥ समस्तसन्मङ्गलानि सन्तु ॥

(प्रो. एम्. चन्द्रशेखरः)
प्राचार्यः

भावपुष्पम्

विद्या भगवती नराणां रूपत्वेन, प्रच्छन्नगुप्तधनत्वेन, भोगकरीत्वेन, यशःसुखकरीत्वेन गुरूणां गुरुत्वेन, देशान्तरेऽपि बन्धुजनत्वेन, परदेवतात्वेन, सर्व्वैः पूज्यत्वेन, मानवत्वसम्पादकत्वेन च नो कस्योपास्येयं निखिले जगतीतले । बालो रोदिति सत्यां बुभुक्षायां तत्र विद्यैव हेतुः । कान्तः कान्तां कामयते प्रकामं तस्मिन् विद्यैव कारणम्। गुरुः शिष्यं शास्ति स्वपुत्रस्येवेत्यत्र विद्यैव निमित्तम् । भक्तो भगवन्तं वश्यं करोति कारणं विद्यैव तत्र । किं बहुना, पृथिव्याः या क्षान्तिः, वायोः यद् वानम्, वह्नेर्यद् द्योतकतादि, नभसो विभुत्वम्, अपां स्निग्धः स्पर्शः, कालस्य यदाश्रयत्वम्, तत्र सर्वत्रैव प्रयोजकत्वं विद्याया एवेति विद्यावतां न तिरोहितन्तावत् । जन्मन आरभ्य आमृत्यु जनो महत्त्वादस्माद् विद्यामेवानुगच्छति, विद्यामेवाश्रयति, विद्यामेव चावाप्य मृत्युं तरति । सेयं विद्या भगवती प्रसन्ना सती यदा लोकं प्रसादयितुं वाञ्छति तदा तस्याः कश्चन रश्मिरुदेति । सोऽयञ्च रश्मिः व्याप्तं तमः सारयति, तृषितान् तर्पयति, पिपासितान् पाययति, बुभुत्सितांश्च बोधयति । तादृश एव कश्चन रश्मी राष्ट्रियवार्षिकशोधपत्रिका 'विद्यारश्मिः' इति नाम्ना विश्रुता विद्वज्जनैर्नैकवर्षेभ्यः समादृता स्वस्या इव स्वयमेव या, ततः सद्य उत्पन्नः सन् वर्षे तत्रभवताम्भवताम्पुरस्तादुपस्थितो विदुषां शोधार्थिनाञ्च मनो मोदयितुमुत्सहते, समुत्सहते चास्माकं हृदयं नैवेद्यमिदमावर्ण्टयितुं भवत्सु ।

दिग्दिगन्ते संस्कृतस्य ध्वजमुद्दोलयितुं गृहीतावधृतप्रतिज्ञं नवदेहलीस्थं राष्ट्रियसंस्कृतसंस्थानं विविधविधयोजनायोजनेन संस्कृतभाषां, संस्कृतशास्त्रं, संस्कृतशोधादिकञ्च स्वयं प्रोन्नयते, समग्रे राष्ट्रे प्रसृतपरिसरद्वारा प्रोन्नाययति चेति रीत्या मुम्बईस्थेन क. जे. सोमैयासंस्कृतविद्यापीठेन प्रतिवर्षमेषा पत्रिका निजगुणगौरवगर्भिताऽपि प्रकाश्यते । अस्मिन् सारस्वतोपक्रमे संस्थानस्य कुलपतय आचार्य्यपरमेश्वरनारायणशास्त्रिवर्य्याः, सोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतय आचार्य्यार्कनाथचौधरीमहोदयाः, श्रीलालबहादुरशास्त्रिसंस्कृतविश्वविद्यालयस्य कुलपतय आचार्य्यरमेशकुमारपाण्डेयमहाशयाः, जगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतय आचार्य्यगङ्गाधरपण्डामहाभावाः स्वस्वाशीर्वाक्कुसुमैः सनाथीकृतपत्रिकाः परिसरप्राचार्य्यसमितसम्पादकानां नूनं महान्तमुपकारमकार्षुरिति भूयो भूयो भावयामः ।

संस्कृतहिन्द्याङ्ग्लभाषात्रयेणोद्भासितायां शोधपत्रिकायाममुष्याम् अष्टत्रिंशत्संख्याकान् धीरधिषणयोपनिबद्धान् निबन्धान् प्रदाय रश्मौ रश्मित्वसाधकान् विदुषः शोधार्थिनश्च वयमाभारवाचा संस्तुमः, प्रस्तुमश्च परिसरप्राचार्य्याणामाचार्य्याणाम् एम्. चन्द्रशेखरमहानुभावानां कृते कार्तज्ञभावान्, येषां प्रदत्तसकलसौविध्येन पत्रिकेयं प्रकाशतां गता । अथ चान्ते पत्रिकाया अस्या विन्यसने, प्रबन्धने च जातायै मानवसुलभायै त्रुटये सुविनम्रभावेन भवतामौदार्य्ये विश्वसिमः, आत्मानं च तस्मादाश्वसिमः ।

छिद्यादन्धतमो रश्मिर्भिद्याद् भेदं भयप्रदम् ।
विद्यादविद्या च मेदिन्यां खिद्येताथ न लेखनी ॥

सम्पादकाः

शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च

क्र. सं.	विषयः	लेखकः	पृष्ठाङ्कः
1	पालिसाहित्यपरिप्रेक्ष्ये पारमिता (एकं विश्लेषणम्)	प्रो. एम्. चन्द्रशेखरः	1
2	संस्कृताध्यापकानां व्यक्तित्वविकासः, उपायाश्च	प्रो. लोकमान्यमिश्रः	8
3	अपभ्रंशेषु शक्तिविचारः	प्रो. प्रकाशचन्द्रः	17
4	ध्वन्यालोकस्थध्वनिलक्षणकारिकाविवेकः	प्रो. ई. एम्. राजन्	27
5	शिक्षामनोविज्ञानस्य प्रयोगविधिः	प्रो. मदनमोहनझाः	31
6	शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः	प्रो. बोधकुमारझाः	40
7	सूत्रक्रमानुसारिणी व्याकरणशिक्षणपद्धतिः	डा. देवदत्तसरोदे	48
8	भारतीयसंविधानस्य मूलावधारणानां विश्लेषणं समालोचनञ्च	डा. वी. एस्. वी. भास्कररेड्डी	58
9	Variations in the Sanskrit & the English Grammer Systems	Dr. Narayanan E. R.	71
10	व्याकरणशास्त्रदृष्ट्या वाचनाभिव्यक्त्यो-र्भाषामनोविज्ञानम्	डा. गायत्रीमुरलीकृष्णः	75
11	वेदव्याख्या में निरुक्तकार का अवदान	डा. जयप्रकाश नारायण	81
12	प्रश्नप्रकरणप्रेरकवैविध्यकौशलयोः वैशिष्ट्यम्	डा. सच्चिदानन्दमूर्तिः	89
13	सुमुहूर्त्तनामकरणवैशिष्ट्यम्	डा. जयकृष्णन् नम्पूतिरि एन्. डि.	98
14	वास्तुशास्त्रे मुहूर्त्तविचारः	डा. विष्णुकुमारनिर्मलः	108
15	राधाचरितमहाकाव्यसमीक्षा	डा. स्वर्गकुमारमिश्रः	113
16	हिन्दी वाङ्मय में संस्कृत वाङ्मय का प्रभाव	डा. संजय कुमार मिश्र	124
17	वृत्तिस्वरूपविमर्शः	डा. मनमोहनतिवारी	130
18	एकविंशशताब्द्यां दूरशिक्षा	डा. सीतारामशर्मा	134
19	काव्य का शाश्वत प्रयोजन 'परोपकार'	डा. राजेशकुमारशुक्ल	144
20	Dramatic Purpose of Supernatural interventions in the plays of Kalidasa and Shakespeare	Dr. Shweta Sood	152

21	वृत्तिविमर्शः	डा. माधवदत्तपाण्डेयः	160
22	समासवृत्तिविमर्शः	डा. नवीनकुमारमिश्रः	165
23	विवाह में मेलापक विचार	डा. सुभाषचन्द्र मिश्र	172
24	शुभाशुभशकुन निर्णय	डा. आशीष कुमार चौधरी	183
25	वक्रोक्तिविमर्शः	डा. राकेशकुमारजैनः	192
26	संस्कृत एवं हिन्दी साहित्य के आधार पर रामचरितमानस में रसविचार	डा. (श्रीमती) गीतादेवी दूबे	198
27	शिक्षकस्य व्यक्तित्वं वैयवसायिक-क्षमतोन्नयनहेतुः	डा. कुमारः	208
28	लक्षणा तेन षड्विधा	डा. एम्. सुदर्शनचिपळूणकरः	213
29	A Comparative Study of Kalidasa's Abijnanasakuntalam and Shakespeare's – The tempest	Dr. Suman Singh	216
30	शिक्षक में सामाजिक दृष्टिकोण	डा. सुनील कुमार शर्मा	223
31	वेधशालायाः परिचयः	श्रीविजयानन्दः अडिगः	230
32	मराठीभाषाविज्ञाने वृत्तिविमर्शः	सुरेश चेमटे	235
33	परम्परानुरूपसूत्रवृत्तिस्वरूपविमर्शः	सुश्रीः मौनिका बोल्ला	241
34	सभ्याभरणे समर्थसूत्रवृत्तिविचारः	एल्. सविता आर्या	248
35	Relation Between English & Sanskrit Literature	Trupti Mohanta	252
36	विवाहे मेलापकस्य महत्त्वम्	नूतानी ग्रहाचार्य	268
37	शब्दार्थसम्बन्धस्वरूप	महात्मा वीणापाणि त्रिपाठी	275
38	परमलघुमञ्जूषानुसारं लक्षणाखण्डनविमर्शः	ऋतम्भरा पाण्डेय	281

❖❖❖

पालिसाहित्यपरिप्रेक्ष्ये पारमिता
(एकं विश्लेषणम्)

✍प्रो. एम्. चन्द्रशेखरः

(पालिसाहित्यं भारतीयसाहित्येषु नैकवैशिष्ट्येनानुत्तमं स्थानं धत्ते । तेषु वैशिष्ट्येषु बौद्धदर्शननिदर्शनकारकत्वं सर्वतो विलक्षणम् । परमुपेक्षितमिवेदानीं साहित्यमिदम् । अङ्गुलिगण्या एव विद्वांसोऽत्र लेखनीं व्यापारयन्ति, तथापि मणिं केचनैव क्रीणन्ति तस्मात्तस्य महत्त्वं न ह्रसति । इदानीमपि एतादृशा निबन्धा मनीषिभिः लिख्यन्ते, येभ्यः तत्साहित्यस्य गाधता, तत्रत्यप्रतिपाद्यस्य च ग्राह्यता संभवति । अयं तादृश एव कश्चन निबन्धः पारमितां क्रोडीकृत्य यथा विन्यस्तः, सोऽध्ययनैकगम्यः । पारमितायाः त्रैविध्यं सपरिकरमत्र निरूपितम् । भूमिकाया निष्कर्षेण च समन्वितोऽयं निबन्धः किमपि दार्शनिकं निगूढं तत्त्वमतितरां प्रख्यापयति ।)

यं बुद्धो भासती वाचं, खेमं निब्बाणपत्तिया ।
दुक्खस्सन्तकिरियाय, सा वे वाचानमुत्तमा ॥

(सुत्तनिपातात्)

भूमिका

ख्रीष्टात् प्रागेव बुद्धवचनानि जनभाषायां संरक्षितान्यासन् । भगवता बुद्धेन तदानीं व्यापकतया मगधप्रान्ते परिभ्रमणं कृतम्, तस्मात् '**मागधी**' इति संज्ञिता जनभाषा गच्छता कालेन पालिभाषा इति प्रसिद्धिमुपगता । सम्प्रति त्रिपिटकेषु वर्णितानि बुद्धवचनान्युपलभ्यन्ते । अट्ठकथासु बहुधा विभक्तानि बुद्धवचनान्यवलोक्यन्ते ।

पालिसाहित्ये बुद्धवचनानां संरक्षणकारणाद् एवास्य वैपुल्यं महत्त्वं चानुमातुं शक्यम् । विशिष्य पालिसाहित्ये धर्मदर्शनेतिहासकाव्यतत्त्वानि भूरिशः परिलक्ष्यन्ते ।

बौद्धपरम्परायां पारमितानां किमपि विशिष्टं महत्त्वं विद्यते । बुद्धत्वप्राप्तौ विशिष्य हेतुभूतानां बुद्धकारकतत्त्वानां पारमी उत परमिता इति नाम । पारमिताया अर्थः-पारं व्रजनम् (पारम् इता) इति । पराकाष्ठाऽवाप्तिः इति फलितोर्थः[१] ।

पारमिता

दानशीलशान्त्यादिषु कस्याश्चिदपि पारमितायाः पूर्त्तये सर्वतोभावेन परिपूर्णोत्सर्ग एव पारमिता इति निगद्यते । एताः दशधा विभक्तास्सन्ति ।

उपपारमिता

यस्याः कस्याश्चिदपि पारमितायाः प्रतिपूर्त्तये बाह्यवस्तूनां परित्यागपुरस्सरं गुणविशेष-भरितचरमभावापन्नता 'उपपारमिता' इत्यभिधीयते ।

परमार्थपारमिता

दानादिपरिपाकादिना जीवनपरित्यागपूर्वकं परमभावोपगतगुणविशेषावाप्तिः एव परमार्थशब्देन परिगृह्यते । परमार्थेन युता पारमिता परमार्थपारमिता इत्यर्थः पर्यवस्यति । जातककथासु परमार्थपारमितायाः स्थानं महत्त्वपूर्णं वरीवर्ति । बोधिसत्त्वेन विहितासु विस्तृतचर्चासु बाहुल्येन परमाथपारमितायाः प्रसङ्गः जातककथाभिरवगम्यते । बाधिसत्त्वेन अभ्यागतब्राह्मणाय कृतः शरीरत्याग एव परमार्थपारमिता इति जातककथायामभिवर्णितः[२] । वस्तुतः खुद्दकनिकायस्य 'बुद्धवंस' प्रकरणे सारिपुत्रस्य प्रश्नत्वेनायाति पारमिता कथनम् । तद्यथा -

'' एकदा बुद्धं प्रसन्नचित्तमवलोक्य सारिपुत्रेण पारसीपूरणवृत्तान्तमभिज्ञातुं पृष्टम् - हे भगवन् ! भवता दशपारमितानां, दशोपपारमितानां, दशपरमार्थपारमितानाञ्च परिपूरणं कथङ्कारेण विहितम्''[३] इति ।

अमुमेव प्रश्नमुत्तरता बुद्धेन; स्वीया, अतीतबुद्धानां च पूर्वकथाः प्रसादिताः । एतस्मिन्नेव क्रमे पारमितानामाख्यानं प्रपञ्चितम्[४] । परन्तु, विस्तरेण पारमितानां सुव्यवस्थितं वर्णनं जातकस्याट्ठकथासु निदानकथायामुपलभ्यते[५] । यस्याः लेखकोऽस्ति आचार्यः बुद्धघोषः[६]।

शोधपत्रेऽस्मिन् वैशेषिकतया दशपारमितानाम् (दान-शील-नैष्क्रम्य-प्रज्ञा-वीर्य-क्षान्ति-सत्य-अधिष्ठान-मैत्री-उपेक्षा) एव विश्लेषणं विधीयते ।

१. दानपारमिता

बौद्धधर्मे कुशलाकुशलकर्माणि बहुधा विवेचितानि । अस्यां दानशीलभावनादिकुशलकर्मणां चर्चा विहिताऽस्ति।[७] चेतनाया अपरं नाम भवति कर्म । फलतः

दानं परित्यागचेतनायाः द्योतकम्।[८] अस्याः कार्यद्वारेणोत्पन्नतायां सत्यां कायकर्म इति, वाग्द्वारेणोत्पन्नतायां तु मनः कर्म इति च व्यपदेशः[९] ।

जातककथाभिः बोधिसत्त्वस्य निर्लिप्तसहजभावनया दानपारमितायाः परिचयः सम्प्राप्यते। उदाहरणत्वेन - अकीर्तिब्राह्मणः[१०], संखब्राह्मणः[११], राजाशिबिः[१२] इत्यादिभिः दानिभिः पारमितापूर्त्यर्थं विहितं कार्यं श्लाघ्यम् । तदत्र सुष्ठु वर्णितम् ।

२. **शीलपारमिता**

शीलं बौद्धसाधनायाऽऽधारभूतम् । शीलाधारेण एव ब्रह्मचर्यपालनं भवितुमर्हति । वस्तुतः शीलेन;श्रद्धा-स्मृतिः-बलं-बोध्यङ्गादिकुशलधर्माः विकसिताः भवन्ति । अत उच्यते -**'सीले पतिट्ठाय नरो सपञ्ञो'** इति । अतः शीलाभ्यासेन विना साधनायां कुलपुत्राणां प्रतिष्ठा नैवोपजायते । यथा -

सासने कुलपुत्तानं पतिट्ठा नत्थि विना ॥ इति ।

अतो बौद्धसाधकेन शीलं रक्षणीयम् ।[१३] शीलं बहुविधम् उच्यते - पञ्चशीलं-अट्ठशीलं-दशशीलं-इन्द्रियसंवरशीलं-आहारपरिशुद्धिशीलं-यातिमोक्खसंवरशीलम् इति । जातके शीलपालनं पारमितात्वेन परिगण्यते ।

३. **नैष्क्रम्यपारमिता**

नेक्खम्म शब्दः नैष्क्रम्य, निष्क्राम्य इति च द्विधा प्रयुज्यते । बुद्धस्य देशना विशेषतो वैराग्यरूपा एव । मानवः सर्वकर्मपरित्यागेन नैष्क्रम्याभिलाषी[१४] स्यात् । प्रवृत्तेरस्याः परमभावप्राप्तिरेव नैष्क्रम्यपारमिता इति प्रोच्यते ।

बोधिसत्त्वेन स्वीयं विशालसाम्राज्यं तृणीकृत्यऽनासक्त्या नैष्क्रम्यपरमभावस्थितिरधिगता इति चूलसुत्तसोमजातकविवरणेन[१५] परिज्ञायते ।

४. **प्रज्ञापारमिता**

शीलं-समाधिः-प्रज्ञा इति बौद्धसाधना त्रिविधा । एतेषु साधनाविशेषेषु **प्रज्ञा** ज्ञानविशेषरूपा । येन संसारस्य वस्तुस्वरूपात्मकं यथार्थज्ञानमुपजायते । अनेन निर्वाणप्राप्तिर्भवति । प्रतिस्फुटप्रज्ञया मानवः इहामुत्रफलभोगविरागितयाऽऽत्यन्तिकदुःखात् विमुक्तो भवति ।[१६] अस्यैव कुशलचित्तस्य सम्प्रयुक्तविपश्यनाज्ञानमित्यपि[१७] संज्ञा । एतस्यैव ज्ञानस्य चरमोपलब्धिः प्रज्ञापारमिता इति व्यवह्रियते ।

५. वीर्यपारमिता

सत्कर्मणां सम्यक् सम्पादनाय नितरामपेक्षितास्सन्ति पञ्चगुणाः । ते- श्रद्धा-वीर्य-स्मृतिः-समाधिः-प्रज्ञा च । श्रद्धया विश्वासः, वीर्येणोत्साहः, स्मृत्या जागरणम्, समाधिना एकाग्रता, प्रज्ञया च ज्ञानस्य वृद्धिरुपजायते । वीर्यं शक्तेः पर्यायरूपम् । अतो मानवानां कार्येषु प्रवृत्तिर्जायते । यथा मृगराजः सिंहः सर्वास्ववस्थासु अमितोत्साहेन स्वपराक्रमं प्रदर्शयति तथा साधकोऽपि वीर्यपारमितायाः परिपूर्तये तत्परो[१८] भवेत् ।

६. क्षान्तिपारमिता

क्षान्तिस्तु मानापमानयोरुपस्थितावपि समस्थितिः । जातककथायामस्याः तुलना पृथिव्या कृता विद्यते । यथा पृथिव्या त्याज्यात्याज्यशुद्धाशुद्धवस्तूनां च भारः सह्यते तथाऽपि पृथिवी सर्वान् क्षाम्यति, तद्वदेव क्षान्तिरपि । पालिगाथासु क्षान्तिवादजातकेऽस्याः विशदं स्वरूपमुपलभ्यते । तीक्ष्णपरशुनाऽऽहतोऽपि बोधिसत्त्वः नैवाभवत् क्रोधितः[१९]। यतो हि, अत्र क्षान्तिरेव हेतुः । अतो पारमिता इयं क्षान्तिपरमार्थपारमिता इत्युदीरिता ।

७. सत्यपारमिता

कस्या अपि घटनाया याथातथ्यरूपेण व्यक्तीकरणमेव सत्यम् इत्युच्यते । अत एव बुद्धः **तथागत** इति ख्यातः। भगवता बुद्धेन शिक्षापदान्युपदिष्टानि विद्यन्ते[२०]। तेषु चतुर्थशिक्षापदमसत्यभाषणाद्विरतिः। सांसारिकदुःखैरात्मानं पृथक्कर्तुमुपदिष्टेषु चतुर्षु धर्मेषु प्रथमस्थाने सत्यस्य परिग्रहणं[२१] विहितम् ।

सत्यपालनाय बोधिसत्त्वः स्वप्राणोत्सर्गाय सिद्धोऽभूत् इति सुतसोमकजातककथा सन्दर्शयति ।

८. अधिष्ठानपारमिता

अधिष्ठानं नाम दृढनिश्चयः । सत्कर्मप्रतिपादनाय दृढनिश्चयः परमावश्यकः । अभीप्सितार्थप्राप्तौ दृढनिश्चय एव मूलकारणं भवति । दृढाधिष्ठाने सति पारमिताप्राप्तिर्भवति। अन्यथा न । अतः सम्बोधिप्राप्तये सङ्कल्पितेन बोधिसत्त्वेनापराजितासनेऽवस्थाय अधिष्ठानपरमार्थपारमिता समधिगता ।

९. मैत्रीपारमिता

अद्वेषचित्तता नाम मैत्रीपारमिता । यथा माता स्वपरिवाराय सर्वदा मङ्गलकामनां करोति तथैव सर्वेषु प्राणिषु मैत्रीभावनायाः सञ्चारः । यथोक्तम् -

सुखिनो व खेमिनो होन्तु,सब्बे सत्ता भवन्तु सुखितत्ता । इति

बोधिसत्त्वः निर्भीकस्सन् अरण्ये विहरति स्म । तस्यायं विहारः अभयविहार इति संज्ञितः । **विसुद्धमग्ग** इति ग्रन्थस्य नवमे परिच्छेदे मैत्रीपारमिता विषये विस्तरेणोल्लेखः प्राप्यते।

१०. उपेक्षापारमिता

उपेक्षा इत्यस्याभिप्रायोऽस्ति माध्यस्थभावः । तत्र अदुःखम्-असुखम् अनयोर्भावो नाम उपेक्षा इति तात्पर्यम् । विशिष्य मानवैः वेदनीयानि पञ्च वर्तन्ते । तानि-सुखम्, दुःखम्, सौमनस्यम्, दौमंनस्यम्, उपेक्षा च । अत्र क्रमेण कायिकानन्दं सुखम्, कायिकपीडा दुःखम्, मानसिकसुखं सौमनस्यं, मानसिकदुःखं दौमंनस्यम्, सुखदुःखयोरनपेक्षा उपेक्षा[२२] इत्युपबृंहणम् । एतद्रूपे परमभावप्राप्तिरेव उपेक्षापारमिता भवति ।

उपसंहारः

विशेषतो पालिसाहित्ये विस्तरेण पारमितानां वर्णनमुपलभ्यते । यया विधया जैनपरम्परायां तीर्थङ्करत्वप्राप्तये कारणीभूताः षोडशभावनाः वाञ्छिताः तयैव विधया बद्धत्वप्राप्तये दशपारमितानां परिपालनमनिवार्यम् । दशपारमितासु जैनपरम्परागतधर्मेषु च सामीपताऽवलोक्यते[२३] ।

दशपारमितानां समावेशः सुगमतयाऽष्टाङ्गिकमार्गे भवितुमर्हति । पारमितनां सङ्ख्यादृष्ट्या पूर्वापरवर्तिग्रन्थेषु भेदो दृश्यते । आर्यऽसङ्गेन महायानसूत्रालङ्कारे पारमितानां षट्कं परिदर्शितम् । वस्तुतः सर्वाः पारमिताः त्यागाधारिताः । अत्र त्यागस्यैव प्राधन्यम् । अतः त्यागः, पारमितायाः परम्परायां त्रिद्या विभक्तः -

(क) **वस्त्वन्तर्गतत्वेन** - अन्नं, पानं, धनं, रजतं, सुवर्णं, गृहम्, रथः च ।

(ख) **अङ्गत्यागान्तर्गतत्वेन** - **शरीर**- हस्तः, पादः, चक्षुरादिषु कस्याप्यङ्गस्य त्यागः ।

(ग) **जीवनान्तर्गतत्वेन** - जीवनोत्सर्ग एव जीवनपरित्यागः इति ।

विशिष्य त्यागविषये जातककथासु वर्णनमुपलभ्यत । अत एव त्यागसम्बद्धविषय-गतभेदकारणात्पारमितानां त्रैविध्यं स्वीक्रियते । यथा -

(क) पारमिता (ख) उपपारमिता (ग) परमार्थपारमिता इति । पारमितानां कथनक्रमे, तासां परिपालनक्रमे च भेदोऽस्त्येव ।

अतः पालिसाहित्ये प्रपञ्चिताः सर्वाः पारमिताः बुद्धत्वप्राप्तौ हेतुभूताः इति ।

सन्दर्भाः

1. नेतिप्पकरण पृ. 89
2. भिक्खाय उपगतं दिस्वा, सकत्तानं परिच्चजिं दानेन मे समो नात्थी, एसा मे दान पारमीति एवं अत्तपरिच्चागं करोन्तस्सदान पारमिता परमत्थपारमिता नाम जाता – निदानकथा, पृ. 112
3. दानं सीलं च नेक्खम्मं, पञ्ञविरियं च कीदिसं । खन्ति सच्चमधिष्ठानं मेत्तुपेक्खा च कीदिसं । दस पारमी तथा धीर, कीदिसी लोक नायक । कथं उपपारमी पुण्णा, परमत्थपारमी कथं ।। बुद्धवंस, पृ. 304.
4. तस्स पुट्ठे विनयाकासि, करवकमधुरगिरी । निब्बापयन्तो हृदयं, हासयन्तो सदेवकं । बुद्धवंस, पृ. 305
5. निदानकथा, पृ. 48-69
6. निदानकथा, पृ. 112-116
7. अभिधम्मत्थसंगहो, पृ. 98
8. दीयति अनेन दानं, परिच्चागचेतना । विभाषा टीका, पृ. 134
9. अभिधम्मत्थसंगहो, पृ. 98
10. जातक 4, पृ. 438-444
11. तत्रैव, पृ. 214-220
12. तत्रैव, पृ. 609-620
13. किकीव अण्डं, चमरी व बालधिं पियं व पुत्रं व एककं ।
    तथेव सीलं अनुरक्खमानका सुपेसला होथ सदा सगाथेति ।।
    विसुद्धिमग्ग, पृ. 23
14. निदानकथा, पृ. 52

15. जातक 5, पृ. 260-274

16. सब्बे संखारा अनिच्या ति यदा पञ्ञाय पस्सति ।
अथ निब्बदन्ति धीरा, सब्ब दुक्खा विमुच्चति ।। धम्मपद, पृ. 42

17. विसुद्धिमग्ग, पृ. 1-5

18. निदानकथा, पृ. 54

19. अचेतनं व कोट्टेन्ते तिण्हेन फरसुना ममं । कासिराणे न कुप्पामि, एसा मे खन्ति पारमी ।। निदानकथा, पृ. 114

20. खुद्दकपाठ, पृ. 1

21. यस्सेते चतुरो धम्मा, वानरिन्द यथा तव । सच्च धम्मो धिति चागो, दिट्ठं सो अतिवट्टति ।। वानरिन्द जातक, पृ. 39

22. अट्ठसालिनी बुद्धघोष, पृ. 157

23. आगम एवं त्रिपिटिक, पृ. 134- 135

प्राचार्य्यः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

संस्कृताध्यापकानां व्यक्तित्वविकासः उपायाश्च

✍प्रो. लोकमान्यमिश्रः

(व्यक्तित्वं हि शिक्षकाणां परमा योग्यता । तदेव देशविकासस्य कारणं मन्वते विद्वांसः। मनोविज्ञानं यथोपनिषद्भिरुपकल्पितं तदाश्रित्य निबन्धरचयित्रा छात्राध्यापकोपकाराय परिकल्पितम्, येन शिक्षकः सर्वोत्तमगुणयुक्तः सञ्जायते । गुणयुक्तेन हि शिक्षकेण निर्मीयन्ते सदोत्तमाः छात्राः । स्थितप्रज्ञता, प्रसन्नता, ज्ञानम्, आत्मविश्वासः, शिल्पनैपुण्यमिति नैके गुणाः शिक्षकेनार्जनीया इति सन्दिशन्ती रचनेयं सहृदयानां हृदयं समावर्जयिष्यतीत्यत्र नास्ति सन्देहः ।)

भारतस्याभिप्रायः **भा** - दीप्तिः, कान्तिः आभा वेति, ज्ञातस्य दीप्तिरित्यर्थः, **रतम्** लीनम् इति । ज्ञानाभायां रतिरित्यर्थः । आशयोऽयं यत्र ज्ञानान्वेषणे रताः संलग्नाः जनाः निवसन्तीति ।[1] वस्तुतः ज्ञानस्य समेषामपि विषयाणां तत्त्वानामाविष्काराणां जनकत्वेन प्रसिद्धं वर्तते भारतम् । सर्वेषां ज्ञानविषयाणां प्रवर्तनं भारत एव सञ्जातम् । एतस्यैव तत्त्वस्य प्रकाशनं सर्वत्र क्रियते । विशिष्य तु क्रोष्टोः 2014 तमेऽब्दे मुम्बईनगरे समायोजितायां ''**भारतीयविज्ञानकाँग्रेस**'' इत्यस्यां विद्वद्भिः ऐकमत्येन विहितम् ।

सर्वविदितं तथ्यमेतद्वर्तते यत् कस्यचिदपि देशस्य विकासस्तदैव सम्भवति, यदा तत्रत्याः जनाः सुशिक्षिताः भवन्ति । जनानां हि शिक्षा गुणवत्तायुता स्यात् । ते स्वकीयस्याप्तस्य ज्ञानस्य समुचितं प्रयोगं कर्तुं प्रभवेयुः । एतत्कृते शिक्षायां प्रौद्योगिक्याः अधिकाधिकः प्रयोगो विधेयः, येन हि छात्राणां बौद्धिकस्तरेऽभिवृद्धिः स्यात् ।

स्वबुद्ध्या चिन्तनशक्त्या च मानवाः स्थूलतत्त्वैः सह बुद्धि-स्मृति-व्यक्तित्वप्रभृतिभिः सूक्ष्मतत्त्वैः परिचयमवाप्तुं समुत्सुकाः भवन्ति । भारतीयवाङ्मये तु एतेषां तत्त्वानां बाहुल्यं परिदृश्यते । एतेषां तत्त्वानां निरूपणकारणादेव संस्कृतवाङ्मये वैपुल्यं प्राप्यते । एतेषु तत्त्वेषु आत्मतत्त्वस्य ब्रह्मतत्त्वस्य वा निरूपणं हि अन्यतमं विद्यते ।

यद्यपि मनोविज्ञानशास्त्रमतीव नूतनं शास्त्रे मन्यते, तथाऽपि मनोविज्ञानस्य तत्त्वानि संस्कृतवाङ्मये विराजन्त एव । सुप्राचीनासु वैदिकसंहितासु, उपनिषत्सु, दार्शनिकग्रन्थेषु

महाभारतादिग्रन्थेषु च आधुनिकयुगे प्रचलितानां मनोविज्ञानशास्त्रस्य तत्त्वानां विवेचनम् आनुषङ्गिकरूपेण यत्र तत्र प्राप्यते । यतो हि भारतीयतत्त्वविदां दृष्टिः संश्लेषणात्मिका आसीत् ।

मनोविज्ञानस्य तत्त्वेषु व्यक्तित्वस्य तत्त्वं सुमहत्त्वपूर्णं भवति । एतस्य विवेचने शिक्षामनोवैज्ञानिकाः विशिष्टां रुचिं प्रकटितवन्तः । अत्यन्तं हि जटिलं भवति व्यक्तित्वाभिधानं तत्त्वम् । भारतीयदर्शने विज्ञानमयादिपञ्चकोशैर्निरूपितं व्यक्तित्वतत्त्वम् । कोशस्तु आवरणमाच्छादनं वेति रूपेण ख्यापितोऽस्ति । यथा पलाण्डोः प्रत्येकमावरणं पृथक्कृत्वैव तदाभ्यन्तरीयवस्तुनः अवबोधो भवति, तथैव जीवशरीरे अन्नमयकोशः, प्राणमयकोशः, मनोमयकोशः, विज्ञानमयकोशः, आनन्दमयकोशश्चेति पञ्चकोशाः विद्यमानाः भवन्ति । पञ्चकोशानां माध्यमेन जनः आत्मनो वास्तविकस्वरूपेण परिचितो भवति ।

भारतीयपरम्परायां व्यक्तित्वस्य अवधारणा श्रीमद्भगवद्गीतायां गुणत्रयनिरूपणेनापि प्रतिपादिता वर्तते । सत्त्वरजस्तमोगुणानां प्रभावो मानवव्यवहारे सर्वैरनुभूयते । सर्वेषु विविधगुणानां प्राधान्यं सततमवलोक्यते । सत्त्वरजस्तमोगुणैः प्रभावितो जन एव परिपक्वो न भवति । एतत्कृते सः गुणातीतः स्यात् । गुणातीतस्य लक्षणं हि तत्र निरूपितं वर्तते । यथा हि-

समदुःखसुखस्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाऽप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥

(श्रीमद्भगवद्गीता १४.२४-२५)

श्रीमद्भगवद्गीतायाः द्वितीयाध्याये स्थितप्रज्ञस्य लक्षणानि विशदा प्रतिपादितानि सन्ति-

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषीत किमासीत व्रजेत किम् ॥

(श्रीमद्भगवद्गीता २.५४)

श्रीरामचरितमानसेऽपि रामस्तुतिः स्थितप्रज्ञस्य लक्षणं संसूचयति-

प्रसन्नतां या न गताभिषेकतस्तथा न मम्ले वनवासदुःखतः ।

मुखाम्बुजश्रीः रघुनन्दनस्य मे सदाऽस्तु सा मञ्जुलमङ्गलप्रदा ॥

(अयोध्याकाण्डः, २)

साम्प्रतिकाः भारतीयाः मनोविज्ञानशास्त्रिणो मनोविज्ञानं पाश्चात्त्येभ्यः समुद्भूतम् इति मन्वते । ते स्वयमपि मनोविज्ञानस्य भारतीयपरम्परया सुपरिचिताः न विद्यन्ते । ते भारतीयशास्त्रेषु मनोविज्ञानस्य प्रचलितानां सिद्धान्तानामन्वेषणम् आधुनिकमनोविज्ञानस्य तत्त्वानामुल्लङ्घनं मन्वते ।

आधुनिकयुगे प्रचलिते मनोविज्ञानशास्त्रे व्यक्तित्वविषये प्रभूतो विचारो विहितो वर्तते । शिक्षा स्वकीये समग्ररूपे बालानां व्यक्तित्वस्य विकासकर्त्रीति मन्यते । मनोविज्ञानशास्त्रे व्यक्तित्वस्य नैकाः परिभाषाः विकसिताः वर्तन्ते । सामाजिकदशायां हि व्यक्तिः विविधः प्रभाविता भवति । तत्कृते आवश्यकमिदं भवति यत् स स्वकामनानां सामाजिकदशानां च मध्ये सामंजस्यं स्थापयेदिति । व्यक्तित्वस्य पक्षद्वयं भवतः - आन्तरिकं बाह्यञ्चेति । एकस्मिन् सुभाषिते उभयोः पक्षयोः समन्वयनं दृष्टव्यं वर्तते । यथा हि-

वस्त्रेण वपुषा वाचा विद्यया विनयेन च ।
वकारैः पञ्चभियुक्तो नरः संयाति पात्रताम् ॥

संस्कृतशिक्षकाणां सन्दर्भे एतस्य निर्वचनं विशिष्टं भवितुमर्हति। अत्र 'नरः संयाति पात्रताम्' इत्यस्थले 'शिक्षको याति पात्रताम्' इत्यपि पाठो भवितुमर्हति । **वस्त्रेण** हि बाह्यपक्षस्य प्रदर्शनं भवति । संस्कृताध्यापकस्य वस्त्राणि वस्तुतः मालिन्यविरहितानि शिक्षकाणां कृते च आदर्शभूतानि अवसरोचितानि च भवेयुः । वर्णेषु श्वेतवर्णं शिक्षकाणां कृते श्रेयस्करं स्वीक्रियते । शिक्षकस्य वस्त्रेषु छात्राणामवधानं न स्यात् प्रत्युत यत्किमपि स बोधयति तदुपरि एव तेषामेकाग्रता जायेत ।

संस्कृतशिक्षको **वपुषा** पुष्टः सुदृढश्च भवेत् । मुखे स सर्वदा स्मितं धारयेत् । एतेन आत्मविश्वासस्य द्योतनं भवति । प्रसन्नवदनस्य शिक्षकस्य सम्मुखं छात्रः स्वकीयानां शिक्षणसमस्यानां वैयक्तिकसमस्यानामपि प्रकाशनं कर्तुं प्रभवन्ति । एतेन स छात्रेषु लोकप्रियो भवति । परम्परया स्वविषयं प्रति छात्राणां ध्यानाकर्षणं कर्तुं प्रभवति । नियमितेन योगाभ्यासादिकर्मणा वपुः नियन्त्रितं जायते । सर्वाणि कर्मेन्द्रियाणि सक्रियाणि भवन्ति । क्रमेण ज्ञानेन्द्रियाण्यपि प्रभावोत्पादकानि भवितुमर्हन्ति ।

संस्कृताध्यापकस्य व्यक्तित्वे **वाण्याः** स्थानमपि अतीवमहत्त्वपूर्णं भवति । शिक्षावेदाङ्गे माधुर्यादिगुणोपेता वाणी प्रशस्ता वर्तते । देशकालपरिस्थितिमालक्ष्य शुद्धोच्चारणेन धाराप्रवाहेण च प्रभावोत्पादकं वाक्कौशलं संस्कृतशिक्षकेषु अवश्यमेव अपेक्ष्यते । शिक्षणे छात्राणां सहभागे वाण्याः प्रयोगोऽनिवार्यो भवति । संस्कृताध्यापकस्य वाक् निर्दुष्टा स्यात् । स्खलनादिभ्यः पुनरुच्चारणाच्च शिक्षको विरमेत् । साम्प्रतिके युगे उत्तरप्रदेशीयेन चौधरिचरणसिंहविश्वविद्यालयेन (मेरठनगरे स्थितेन) एतन्निर्णीतं यत् येषां वाणी स्खलिता वर्तते, तेषां प्रवेशो निषिद्धः शिक्षकप्रशिक्षणकेन्द्रेषु स्यादिति ।

विद्या हि संस्कृताध्यापकस्य व्यक्तित्वे महत्त्वपूर्णां भूमिकां निर्वहति । भारतीयशास्त्रे विद्या, ज्ञानं, प्रज्ञा, बुद्धिः विवेकश्चेति शब्दाः समानार्थे प्रयुज्यन्ते । एतेषां महत्त्वाय अनेके सन्दर्भाः विविधेषु ग्रन्थेषु सर्वत्र निरूपिताः वर्तन्ते । यथा हि-

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥[२]
विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥[३]
ज्ञानं तृतीयं मनुजस्य नेत्रम् ।
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।[४]
नास्ति प्रज्ञासमं चक्षुः ।[५]
बुद्धिर्यस्य बलं तस्य ।[६]
यस्य नास्ति विवेकस्तु केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रोर्थान् दर्वी पाकरसानिव ॥
तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।
आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥[७]

विद्यायाः ज्ञानस्य वा अर्जनाय संस्कृताध्यापकः सदैव तत्परो भवेत् । साम्प्रतिके युगे वैज्ञानिकैः विविधेषु क्षेत्रेषु विविधाः आविष्काराः कृताः । तेषां विषये संस्कृताध्यापको नूनमेव

जानीयात् । पत्रपत्रिकाभिः स स्वज्ञाने सततमभिवृद्धिं विदध्यात् । सम्प्रति तु चलध्वनौ अन्तर्जालतन्त्रैः (Internet) विविधाः उपायाः यथासमयं प्रदर्श्यन्ते । संस्कृताध्यापको रुचिपूर्वकं तल्लाभैः युतो भवेत् ।

विनयस्तु विद्यायाः प्रतिफलं भवति । संस्कृताध्यापको न कदाऽपि अहंकारयुतो भवेत्। प्रत्युत स तु यथाकालम् अहंकारस्य दोषान् प्रदर्शयेत् । सदाचारशिक्षायै एव विविधानां शास्त्राणां प्रवर्तनमभवत् । संस्कृतवाङ्मयस्य विविधाः काव्यादिग्रन्थाः ''रामादिवत् प्रवर्तितव्यं न रावणादिवदि''ति सूचयन्ति । विनयशीलो जन एव समेषां प्रियः, लोकप्रियो लोकमान्यो वा भवितुमर्हति । एतत्कृते क्रोधस्य परिहारः सदैव विधोयः । ''शेषं कोपेन पूरयेत्'' प्रभृतय आभाणकाः हास्यायैव स्यात्, व्यवहारे तु सदैव वर्जनीयाः । वस्तुतः विनयं हि व्यवहारस्य मूलं भवति । संस्कृतशिक्षकस्तु विनयस्य प्रतिमूर्तिसदृशो भवेत् ।

विद्यालये शिक्षककक्षे संस्कृताध्यापकस्य स्थितिः अतीव विशिष्टा भवति । एतस्य प्रमुखं कारणं भवति यत् पाठ्यचर्यासु संस्कृतस्य स्थानं न तथा गौरवयुतं भवति यथा हि गणितविज्ञानादिविषयाणां भवति । संस्कृतेतरविषयाणां शिक्षकाः स्वकीयस्य विषयस्य मूलरूपे योरोपीयज्ञानमेव हेतुत्वेन मन्वते । संस्कृतशिक्षको यथावसरं तेषां विषयाणां मूलत्वेन भारतीयज्ञानं प्रदर्शयति चेत् तेषामवधानं न केवलं संस्कृतं प्रति नेतुं शक्तो भविष्यति प्रत्युत स्वकीयस्य गौरवेऽपि अभिवृद्धिं कर्तुं शक्नोति । यथा हि **'न्यूटन'**नामधेयस्य वैज्ञानिकस्य पृथिव्याः गुरुत्वाकर्षणसिद्धान्तस्य प्रतिपादकत्वं मन्यमानः शिक्षकः भारतीयज्ञानस्य **''आकृष्टशक्तिर्मही''** इति ज्ञास्यति चेत्तदानीम् इतोऽपि ज्ञातुं स जिज्ञासुर्भविष्यति । संस्कृतशिक्षकोऽपि तत्कृते बोधानाय बद्धपरिकरो भूयात् ।

मातृभाषायाः शब्दानां मूलत्वेन संस्कृतस्य प्रतिपादनेन संस्कृताध्यापको मातृभाषाा शिक्षकस्यापि प्रियो भवितुं शक्नोति । अत्र 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' इति समुद्घोषो वर्तते । एवं क्रमेण संस्कृताध्यापकः शिक्षककक्षे केन्द्रभूतो भवितुमर्हति न तूपेक्षितः।

संस्कृताध्यापकः सहशिक्षकशिक्षिकान् यथावसरं बोधयेद्यत् संस्कृतभाषा हि सर्वासां भाषाणां जननी प्राचीनतमा च भाषा वर्तते । अस्यां वर्तमानाः विषयाः न कस्यामपि भाषायां दरीदृश्यन्ते । संस्कृतज्ञाः सुसज्जनाः सुसंस्कृताः भूत्वा आदर्शभूताः जायन्ते । अत एव कथ्यते यत् –

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥[6]

संस्कृतमन्तरा न कोऽपि मानवः समाजो राष्ट्रं वा शान्तिमधिगन्तुं शक्तो भवति । अस्यामेव भाषायां मानवसंस्कृतेरितिहासोपनिबद्धो वर्तते । एषा हि विविधजनसमुदायेषु राष्ट्रियतां जागरयति । संस्कृतज्ञाः परस्परं भेदभावं विस्मृत्य राष्ट्रहिताय तत्पराः भवन्ति । संस्कृतमेव भाषाया हि विविधतायां सत्यामपि एकतायाः संस्थापनार्थं महोपकरोति । संस्कृतवाङ्मयाश्रयणेनैव प्राच्यपाश्चात्त्यसंस्कृत्योः समन्वयः संगतिश्च अवगम्यते । एषा भाषा हि भारतस्य सांस्कृतिकनिधिरूपेण विराजते । संस्कृतज्ञः स्वयमपि संस्कृतनिधिना सुपरिचितो भवेत् । संस्कृतभाषायाः अर्थवैचित्र्यं संस्कृताध्यापकः सदाचरणतत्पराः प्रकृतिदृष्टान्तैः प्रकटयेत् । अत्र सद् आचरणतत्पराः = ब्राह्मणाः, सदा च रणतत्पराः = क्षत्रियाः, सदाचरणे (विचरणे) तत्पराः = वैश्याः, सदा चरणे (चरणसेवायां) तत्पराः = शूद्राः इति व्युत्पत्त्यो भवितुमर्हन्ति ।

विविधावसरेषु विविधानां संस्काराणां सम्पादनं भारतीयानां वैशिष्ट्यं भवति । प्रायशः जनाः संस्काराणां वैज्ञानिकताभिः सुपरिचिताः न भवन्ति । प्राप्तावसरो विद्वान् संस्कृताध्यापकस्तेषां संस्काराणां वैज्ञानिकं महत्त्वं प्रदर्श्य जनानुपकर्तुं शक्नोति । तेषां संस्काराणां निर्दुष्टं सम्पादनक्रममपि प्रदर्शयति चेदेतेन संस्कृतस्य गौरवे अभिवृद्धिः भविष्यति ।

शिक्षकस्य सर्वाधिकमहत्त्वपूर्णं हि कर्म भवति शिक्षणम् । संस्कृताध्यापको नूनमेव कर्मण्यस्मिन् विदग्धो भवेत् । केचन संस्कृताध्यापकाः शिक्षणकर्मणि रुचिं न प्रदर्शयन्ति । तथाविधानां संस्कृताध्यापकानां कृते **'कलिविडम्बनम्'** इति कटूक्तिग्रन्थे भणितिरपि वर्तते । यथा हि –

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति ।

इति पाठयता पाठे काठिन्यं कुत्र वर्तते ॥ इति ।

संस्कृताध्यापकाः प्रायशः कस्मिंश्चिद् साहित्यादिविषये नैपुण्यं प्राप्य शिक्षणाय प्रवृत्ताः भवन्ति । तत्रापि तथा नैपुण्यं वैदग्ध्यं वा नार्जयन्ति यथा हि अपेक्ष्यते । परं शास्त्रैकस्याध्ययनेन विषये सुस्पष्टता नायाति । आयुर्वेदग्रन्थे चिकित्सकानां कृते भणितिर्वर्तते यत् –

एकं शास्त्रमधीयानो न विद्यात् शास्त्रनिश्चयम् ।
एवं बहुश्रुतं शास्त्रं विजानीयात् चिकित्सक: ॥ इति ।

यथा चिकित्सकस्य कृते बहुश्रुतत्वम् अपेक्ष्यते तथैव संस्कृताध्यापकस्य कृतेऽपि निर्वहणीयम् । वस्तुतस्तु यो हि शिक्षणस्य साहसिकं कर्म कर्तुं यतते, स तु नूनमेव अधिगमशीलो भवेत् ।[९] न कस्मिन्नपि शिक्षकप्रशिक्षणमहाविद्यालये शिक्षणस्य सर्वासां परिस्थितीनां प्राक्कल्पनं सम्भवति । शिक्षणावस्थायां सर्वदा नूतनपरिस्थितय: प्रादुर्भवन्ति । एतासु परिस्थितिषु स्वाध्याय एव श्रेयस्करो भवति । श्रुतिरपि– ''स्वाध्यायान्मा प्रमद:'' ''स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति'' च निर्दिशति।[१०] संस्कृताध्यापकास्तु नूनमेव श्रुतिवचनानुपालका: स्युरेव । अन्यथा जनास्तेषां कृते क्वचित् नास्तिका इति आरोपयिष्यन्ति । ''न ज्ञानवृद्धषु वय: समीक्ष्यते'' इत्यनुसारेण यत्र कुत्रापि ज्ञानं वर्तते तत: ग्राह्यता विधेया ।

संस्कृताध्यापक: देशाटनप्रियो भवेत् । देशाटनेन परिस्थितीनां वातावरणानां च यथार्थज्ञानं सम्भवति । यथार्थज्ञानमन्तरा अनुभव: साक्षात् (First Hand) न सम्भवति । भारतीयसंस्कृते: प्रत्यक्षीकरणं देशाटनेन जायते । देशाटनस्य महत्त्वकारणादेव शिक्षकप्रशिक्षणकेन्द्रेषु पाठ्यचर्याणां विद्यमानता वर्तते । देशाटनेन विविधसंस्कृतीनां परिचयपुरस्सरं तेषां मध्ये तुलनादिकं कर्तुमर्हन्ति संस्कृतशिक्षका: ।

संस्कृताध्यापको नूनमेव शिक्षणप्रौद्योगिक्या परिचितो भवत् तस्या उपयोगं च शिक्षणे विदध्यात् । छात्राणां विषये रुच्युत्पादनाय विविधोपकरणानां प्रयोगो निश्चयने कुर्यात् संस्कृताध्यापक: । प्रौद्योगिक्या: नूतनप्रयोगेणापि संस्कृताध्यापको विज्ञो भवेत् । स न केवलं स्वयं शिक्षणप्रौद्योगिक्या: प्रयोगं कुर्यात् प्रत्युत सहाध्यापकान् अपि स तत्कृते प्रेरयेत् ।

संस्कृताध्यापको विविधकलानां ज्ञानं धारयेत् । **''शक्तो मूकोऽपि यत्कर्तुं कलासंज्ञं तु तत्स्मृतम्''** इति लक्षणेव कलाया: गौरवमत्र समुद्गीतं वर्तते । मानवो हि सृष्टिकर्तुरनन्यकृतिर्वर्तते । प्रत्येकं मानवो हि कलादृष्ट्या विशिष्ट एव भवति । संस्कृताध्यापको हि नाट्यादिकलासु वैदग्ध्यं प्राप्नुयात् । कलानां प्रदर्शनेन स छात्राणामभिरुचि: संस्कृते स्थापयितुं शक्नोति ।

विद्यालये छात्राणां सर्वाङ्गीणविकासाय पाठ्यचर्याया: निर्धारणं क्रियते । पाठ्यचर्यायां पाठ्यसहगामिक्रियासु साहित्यिकानां सांस्कृतिकानाञ्च क्रियाणां व्यवस्था क्रियते । प्रायश:

शिक्षकाः एतासां क्रियाणामायोजने तटस्थाः भवन्ति । संस्कृताध्यापकः महता समुत्साहेन एतासां क्रियाणाम् आयोजनं विधाय प्राचार्यस्य छात्राणां सहशिक्षकाणाञ्च प्रियो भवितुं शक्नोति

एतदतिरिच्य बहवः व्यक्तित्वविकासविधयः तादृशाः सन्ति, येषां मूलं सर्वथा संस्कृतशास्त्रेष्वेव उपनिबद्धमस्ति, यथा हि – योगः, आध्यात्म्यम्, विचारे व्यवहारे च बाह्यान्तरिकैक्यमित्यादयः । एवमेव शारीरिकभाषायाम् (Body Language) अवधानम्, उत्तमवक्तृतायाः सम्पादनात्पूर्वं उत्तमश्रोतृतासम्पादनम्, सकारात्मकं चिन्तनम्, अपरिचितैः नवजनैः सह मेलनम्, दृढाभिमतनिर्माणमित्यादयो बहवः उपायाः सन्ति तादृशाः, यैः संस्कृतशिक्षकस्य व्यक्तित्वविकासे सुतरां साहाय्यं प्राप्यते । सारतः एतद्वक्तुं शक्यते यत् संस्कृतशिक्षकाणां व्यक्तित्वविकासस्य सूत्राणि संस्कृतवाङ्मये निहितान्येव सन्ति, आवश्यकता तु तेषां सूत्राणां व्यावहारिकप्रयोगस्यैव वरीवर्तते ।

सन्दर्भाः

1. वर्षं तद् भारतं नाम, भारती यत्र सन्ततिः ।
2. नीतिशतकम्, 20.
3. हितोपदेशः, मित्रलाभः, 6.
4. श्रीमद्भगवद्गीता, 4/38.
5. महाभारतम्, शान्तिपर्व, 277/36.
6. चाणक्यनीतिः, 10/16.
7. श्रीविष्णुपुराणम्, 1.19.41
8. मनुस्मृतिः, 2/20.
9. One, who dares to teach, must never cease to learn. – John Cotton Dana
10. ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्न्यश्च स्वाध्यायप्रवचने च । मानुष्यं च स्वाध्यायप्रवचने च । प्रज्ञा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचन च । प्रजापतिश्च स्वाध्यायप्रवचने च। सत्यमिति सत्यवचा शमीतरः । तपः इति तपो नित्यपौरुशिष्टः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः इति । – तैत्तिरीयोपनिषद्, शिक्षावल्ली, 9/1.

सन्दर्भग्रन्थसूची

1. मिश्रः, आज़ादः (प्रधानसम्पादकः), संस्कृतभाषाशिक्षणम्, मध्यप्रदेशसंस्कृतबोर्ड, मध्यप्रदेश, 2004 ।
2. पाण्डेयः, इन्दिराचरणः, संस्कृत शिक्षण समीक्षण, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, प्रकाशनविभागः, 1992 ।
3. माथुर, एस्. एस्., शिक्षणकला, शिक्षण तकनीक एवं नवीन पद्धतियाँ, विनोद पुस्तक मन्दिर, आगरा ।
4. सफाया, रघुनाथ, संस्कृत शिक्षण, हरियाणा ग्रन्थ अकादमी, 1990 ।
5. पाण्डेय, रामशकल, संस्कृत शिक्षण, विनोद पुस्तक मन्दिर, आगरा ।
6. संस्कृत आयोग का प्रतिवेदन, (अलखनिरञ्जनपाण्डेयकृत हिन्दी अनुवाद) सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी ।
7. दण्डी, काव्यादर्शः ।
8. भर्तृहरिः, वाक्यपदीयम् ।
9. Bokil, Vinayak Pandurang; A New Approach to Sanskrit, Chitrashala Prakashan, Poona, 1956
10. Apte, Vaman Shivaram; The Student's Guide to Sanskrit Composition, The Standard Publishing Co., 1929.

आचार्योऽध्यक्षश्च (शिक्षाशास्त्रविभागः)

राष्ट्रियसंस्कृतसंस्थानम्,

लखनऊपरिसरः, लखनऊ ।

❖❖❖

अपभ्रंशेषु शक्तिविचारः

✍प्रो. प्रकाशचन्द्रः

(पातञ्जलेन जलेन अभ्युक्ष्य वाक्यपदीयविटपच्छायामाश्रित्य भूषणमञ्जूषादिक-मुद्घाट्यापभ्रंशेषु शक्तिर्वा न वा ? यद्यस्ति तत्कुतः ? नास्ति चेत् कुतः? इत्यादिविचारपरोऽयं निबन्धो विचारकान् नूनं केनचिन्नवेन विचारबन्धनेनाबध्नाति । वस्तुतः शक्तिः व्यवहारप्रमाणा । स च व्यवहारः अपभ्रंशेषु शक्तिं साधयति । शक्तिग्राहकेषु व्यवहारोऽनितरसाधारणः । तद्बलेन निबन्धेनानेन वैयाकरणसिद्धान्तं युक्तियुक्तं प्रतिपादयन्तः आचार्याः भाषिकशक्तिं विन्यस्य 'एकः शब्दः सम्यग्ज्ञातः' इत्युद्धरन्तः कामपि लोकोत्तरां शब्दशक्तिमपि सङ्केतयन्ति ।)

सर्वोऽपि लोकव्यवहारः शब्दाश्रितः । शब्दश्च स्वार्थेन सहैव व्यवहारयोग्यो भवति । अर्थं विना शब्दप्रयोगो न सम्भवति । तयोः शब्दार्थयोः स्वाभाविकः कश्चन सम्बन्धो भवति यश्च प्रयोगदृष्ट्या परम्परया तयोः नित्यत्वेनावतिष्ठते ।

शब्दस्य नित्यत्ववाचकत्वविषये 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्याप्रसङ्गे भाष्यकारः कथयति 'कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति, लोकतः । यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति ।।'[1] स्वं रूपम् इति सूत्रेऽपि भाष्यकारः कथयति - 'शब्देनोच्चारितेनार्थो गम्यते'[2]

अत्र कैयटः कथयति 'इह योग्यतालक्षणेन सम्बन्धेन शब्दोऽर्थं लोके प्रत्याययति ।'[3] एतत्कैयटकथनं वाक्यपदीयमतानुसारि विद्यते यथोक्तं तत्र भर्तृहरिणा

'इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता' यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ।।[4]

अर्थाद् यथा चक्षुरादीनामिन्द्रियाणां रूपादिविषये ग्राहकता शक्तिरनादियोग्यता युक्ता स्वतः सिद्धा भवति तथैव शब्दानामर्थैः सहानादिर्योग्यता स्वाभाविकी शक्तिर्भवति यया उच्चारितमात्रादर्थप्रत्ययः सम्भवति ।

अत्र हेलाराजो भाष्यप्रमाणप्रस्तुतिपूर्वकं कथयति 'समवायादिनिमित्तानपेक्षयै-वोच्चारितमात्राच्छब्दादर्थप्रत्ययोत्पत्तेरकृत्रिमा शक्तिरवसीयते ।' अर्थमात्रेण हि शब्दमात्रस्या-

वियोगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते । तथा योग्यता स्वाभाविकी सिद्धा संकेतस्तु तामेव द्योतयति । तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षया ग्राहकता । न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः । एवं गवार्थे घटशब्दनिवेशोऽसाधुः । तथा हि भाष्यम् **'यो हि गामश्व इति ब्रूयान्न जातुचित् संप्रत्ययः स्यात्'** इति ।[5] (म. भा. सू. 1/2/64)

हेलाराजोद्धृतं भाष्यवचनं शब्दार्थयोरनादियोग्यतासम्बन्धं स्पष्टं निर्दिशति अर्थात् वाक्यपदीयकारमतं भाष्यसम्मतमेव विद्यते ।

काशिकाकारः समर्थः पदविधिः इति सूत्रे समर्थपदं शक्त्याश्रयबोधकं विद्यत इति स्वोकृत्य कथयति 'समर्थः शक्तः । विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः ।'[6] तत्र न्यासकारः काशिकाशयं स्पष्टयन् निगदति 'समर्थः शक्त इति । स्वकार्यनिर्वर्तनक्षम इत्यर्थः । स हि लोके समर्थ इत्युच्यते । स्वार्थप्रतिपादनमेव शब्दानां स्वकार्यम् । ये चेह लौकिका वैदिकाश्च शब्दा अधिकृतास्ते सर्वे एव स्वकार्यप्रतिपादनं प्रति समर्थाः ।'[7]

तदेवं शब्दार्थयोरनादिसम्बन्धात्मिका योग्यतैव शक्तिपदवाच्या भवति भाष्यवाक्य-पदीयादिप्रमाणेन । परवर्तिभिश्च आचार्यैर्भट्टोजिदीक्षितकौण्डभट्ट नागेशभट्टादिभिश्च स्वस्वग्रन्थेषु शब्दशक्तिविषयो भाष्यादिप्रमाणेन विस्तरेण, आंशिक मतभेदपूर्वकं, विवेचितः । मीमांसकनैयायिकादीनां च मतानि तैः समीक्षितानि ।

अस्मिन् सन्दर्भेऽयमपि विषयो विस्तरेण शब्दशास्त्रे विचारितो दृश्यते यत् सा शक्तिः यथा साधुशब्देषु व्याकरणसिद्धशब्देषु भवति तथैव किमपभ्रंशेषु अपशब्देषु असाधुशब्देषु च भवति न वा?

पत्रस्यास्य मुख्यप्रतिपयाद्यविषयोऽस्ति अपभ्रंशेषु शक्तिविचारः ।

अपभ्रंशस्वरूपम्

संस्कृतादपभ्रश्यति तस्मात् अपभ्रंशः । भ्रंशु अधःपतने इति धातोः पचाद्यचि अपभ्रंशो भवति स एव अपशब्दः । अर्थात् अपभ्रष्टशब्दोऽपशब्दः । द्वे व्याकरणानिष्पन्नस्य गावीत्यादेः।[8]

महाभाष्ये उभयोः शब्दयोः प्रयोगो दृश्यते, यथा भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गावी गोणी गोता

गोपोतलिकेत्येवमादयोऽपभ्रंशाः ।[9] विषयोऽयं भर्तृहरिणा विस्तरेण विचारितः । यथा वाक्यपदीयकारिकाऽस्ति

'शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥'[10]

कारिकाभिप्रायं मतत्रयप्रतिपादनपुरस्सरं स्पष्टयन् कथयति स्वोपज्ञवृत्तौ हरिवृषभः

'शब्दप्रकृतिरपभ्रंश इति संग्रहकारः ।
नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद् विद्यते ॥'

सर्वस्यैव हि साधुरेवाभ्रंशस्य प्रकृतिः । प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते । तत्र गौरिति प्रयोक्तव्येऽशक्त्या प्रमादादिभिर्वा गाव्यादय-स्तत्प्रकृतयोऽपभ्रंशाः प्रयुज्यन्ते । ते च सास्नादिमत्येव लब्धस्वरूपाः साधुत्वं विजहति । अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते । न ह्येतेषां रूपमात्रप्रतिबद्धमसाधुत्वम् ।[11]

अस्मिन् सन्दर्भे अग्रिमाः तिस्रः कारिका अपि द्रष्टव्याः

अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम् ॥
ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ।
न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥[१२]

अपभ्रंशेषु शक्तिविचारः

लोकव्यवहाराय लोके विविधाश्शब्दाः प्रयुज्यन्ते किन्तु सर्वे जनाः सर्वान् शब्दान् तेषामर्थांश्च न जानन्ति ज्ञातुं वा शक्नुवन्ति । यतो हि लोके एक एव शब्दः देशादिभेदकारणात् पृथक्पृथगर्थाभिधायी भवति यथा भाष्यकारो निगदति 'एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते त शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । विकार एनमार्या भाषन्ते शव इति ।' हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्या प्रयुञ्जते ।[13] दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु यथा लोके शब्दा देशादिभेदनिमित्ताद् भिन्नभिन्नार्थेषु प्रयुज्यन्ते तथैव तेषां शब्दानामर्थात् साधुशब्दानामपभ्रंशा अपि

तेषु तेष्वर्थेषु प्रयुञ्जाना दृश्यन्ते । देशान्तरे च अन्येष्वर्थेषु अपि प्रयुज्यन्ते, यथाभाष्यविवेचनेन ज्ञातुं शक्यते।

अपभ्रंशेष्वपि सा योग्यतालक्षणा शब्दार्थसम्बन्धात्मिका शक्तिः शब्देष्विव भवति न वेति शास्त्रकारैः विषयो विस्तरेण विचारितो विद्यते ।

यथा महाभाष्यकारः शब्दोपदेशप्रसङ्गे प्रश्नोत्तरमाध्यमेन कथयति, 'शब्दानु-शासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् ? किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेश इति । किं पुनरत्र ज्यायः लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशः गरीयानपशब्दोपदेशः । एकैकस्यापि शब्दस्य बहवोऽभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशा । इष्टान्वाख्यनमपि भवति ।'[14] इष्टेति साधुशब्दप्रयोगाद् धर्मावाप्तेरित्यर्थ इति कैयटः ।[15] अग्रे तत्रैव भाष्यकारः निर्दिशति 'समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवति ।'[16]

आचार्यभर्तृहरिः अस्मिन् विषये स्पष्टं कथयति

'शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः ।'[१७]

अर्थात् शिष्टेभ्यः पाणिन्यादिभ्यः सम्प्राप्ताद् व्याकरणात् सिद्धाः साधवः साधुशब्दा धर्मसाधनभूता अभ्युदयकारिणो भवन्ति । अन्ये तद्विपरीतास्त्वसाधवो साधुशब्देभ्योऽर्थवैलक्षण्ये सत्यपि न धर्मसाधनम् । अर्थप्रत्ययस्तु उभाभ्यां साध्वसाधुशब्देभ्योऽर्थवैलक्षण्ये सत्यपि न धर्मसाधनम् । अर्थप्रत्ययस्तु उभाभ्यां साध्वसाधुशब्दाभ्यां समानरूपेण भवति अर्थादर्थबोधिका शक्तिरुभयविधशब्दापशब्देषु भवति, किन्तु अभ्युदयार्थिभिः साधुशब्दैरेव व्यवहर्तव्यम् । यथा तत्रैव वाक्यपदीये निगदति -

यथैषां तत्र सामर्थ्यं धर्मेऽप्येव प्रतीयताम् ।
साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिनाम् ।।[१८]

कारिकाशयं स्पष्टयति वृत्तिकारः यथा - 'सन्ति चेह दृष्टफलाः कश्चित् प्रतिशब्दं शक्तय इत्यागमादवसीयते । सत्यागमे साधूनामपि तथैवावसीयतां धर्मसाधन-त्वमित्यतोऽभ्युदयार्थिभिरनतिशङ्कनीयां स्मृतिमविच्छिन्नशिष्टसमाचारां परिगृह्य व्यवहारे साधव

एव शब्दाः प्रयोक्तव्याः ।'[19] (स्वोपज्ञवृत्तिः वा. प. 1/139) अनेन भाष्यवाक्यपदीयादिनिर्देशेन स्पष्टतया ज्ञातुं शक्यते यच्छब्दापशब्दयोः उभयोरपि समानरूपेणार्थबोधिका शब्दशक्तिर्भवति तदनु अन्ये वैयाकरणा अपि अपभ्रंशेषु शक्तिं स्वीकुर्वन्तः स्वग्रन्थेषु अमुं विषयं युक्तिप्रमाणाभ्यां चर्चितवन्तः ।

नैयायिकमतम्

नैयायिका 'ईश्वरेच्छां शक्तित्वेन' मन्यमानाः केवलं साधुशब्देष्वेव शक्तिं मन्यन्ते यतो हि ते 'ईश्वरसंकेतमेव' शक्तित्वेनाङ्गीकुर्वन्ति । न च ईश्वरः कदापि अपशब्दात्मिकामिच्छां कर्तुं प्रभवति । तेषां मते असाधुशब्दैर्यज्ज्ञानं भवति तत् साधुशब्दभ्रमात् साधुशब्दस्मरणाद् वा भवति यथोक्तं न्यायमञ्जर्यां गवादय एव वाचकशक्तेराश्रयो न गाव्यादयः, ... नैयायिकानां समयः प्रतिपत्त्युपायः स त्वीश्वरप्रणीतः प्रथमसर्गात् प्रवृत्तौ मीमांसकाभ्युपगतनैसर्गिक शक्तिसोदर्य एव न मादृशरचितपरिमितविषयसमयसमानः, स च गवादिशब्देष्वेव प्राप्तप्रतिष्ठो न गाव्यादिषु, ते तु वर्णसारूप्यच्छायया गवादिशब्दस्मृतिमादधानास्तदर्थप्रतिपत्तिहेतुतामुगच्छन्तीति।[20]

नैयायिकमतप्रत्याख्यानम्

वैयाकरणकौण्डभट्टः वैयाकरणभूषणसारे नैयायिकमतं युक्तिपूर्वकमस्वीकुर्वन् कथयति 'अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणात्ततो बोधः तानविदुषां पामराणामपि बोधात् तेषां साधोरबोधाच्च ।'[21]

कौण्डभट्टमनुकुर्वन् वैयाकरणनागेशभट्टोऽपि नैयायिकमतं प्रायः समानयुक्तिभि-र्निराकुर्वन् नैयायिकमतप्रतिपादनपुरस्सरं परमलघुमञ्जूषायां कथयति 'यत्तु तार्किका असाधुशब्देन साधुस्मरणद्वाराऽर्थबोध इत्याहुः । तन्न, साधुस्मरणं विनाऽपि बोधानुभवात् । तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च' [22] अर्थात् साधुशब्दस्य स्मरणं विनाऽपि गाव्यादिभिः असाधुभिरपशब्दैरपि लोके गवादिसाधुशब्दार्थस्य बोधो दृश्यते, अथ च ये साधुशब्दान् न जानन्ति तेषामपि बोधो न स्याद् यदि साधुशब्दस्मरणन बोधः स्वीक्रियते । अपि च शक्तिभ्रमादपि असाधुशब्देषु बोधशक्तिर्नैव स्वीकर्तुं शक्यत यथा निगदति मञ्जूषाकारः 'न च शक्तिभ्रमाद् बोधोऽसाधुशब्देष्विति वाच्यम् निस्स्न्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात् । अत एव स्त्रीशूद्रबालादीनामुच्चारिते साधावर्थसंशये तदभ्रंशेनार्थनिर्णयः'[23] अर्थादसाधुशब्देषु

साधुशब्दानां शक्तिभ्रमाद् बोधो भवतीति नैयायिकमतमपि न्यायसंगतं नास्ति यतो हि भ्रमः तत्रैव भवितुमर्हति यत्र सन्देहः स्यात्, किन्तु यत्र सन्देहो नास्ति तत्र भ्रमोऽपि न सम्भवति । सन्देहाभावादेव अपभ्रंशा अपशब्दा असाधुशब्दाश्च अर्थबोधनपूर्वकं लोके प्रयुक्ता दृश्यन्ते । अथ च तत्र भ्रमत्वायोगादेव कदाचित् साधुशब्दोच्चारिते स्त्रीशूद्रबालादीनामर्थसंशये अर्थविषयके सन्देहे उत्पन्ने सति तदभ्रंशेन साधुशब्दस्याभ्रंशशब्दोच्चारणेन अर्थनिश्चयो विधीयते ।

कौण्डभट्टनागेशयोः चिन्तनस्य मूले वाक्यपदीयस्य कारिकाद्वयं प्रमाणत्वेन द्रष्टुं शक्यते।

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥
पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृभिः ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥[24]

नागेशभट्टोऽपभ्रंशेष्वपि शक्तिः भवतीति सिद्धान्तं स्वीकर्तुं हेतुद्वयप्रस्तुतिपूर्वकं कथयति 'सा च शक्तिस्साधुष्विवाभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् । व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम् । अत एव बालानां तिरश्चां चान्वयबोधः न हि तेषां तदैव तत्सम्भवः ।'[25]

अर्थात् गाव्यादिलोकप्रचलितापभ्रंशेषु तादृशी अर्थबोधिका शक्तिर्भवति यादृशी गवादिसाधुशब्देषु भवति इति स्वीकरणे कारणमस्ति लोकव्यवहारः । यथा कस्मिंश्चिद् ग्रामे गौरित्यस्य स्थाने 'गावी' इत्यादिः अपभ्रंशः प्रचलितोऽस्ति व्यवहारे तस्यैव प्रयोगः भवति तेनैव च अपभ्रंशेन सास्नादिमतः प्राण्यर्थस्य बोधोऽपि भवति । अर्थाल्लोकव्यवहारकारणात् तस्मिन्नपशब्देऽपि समाना अर्थबोधिका शक्तिः सिद्धा भवति ।

द्वितीयं कारणं वर्तते पूर्वजन्मानुभूतशक्तिस्मरणम् । अतः पूर्वजन्मानुभूतशक्तिस्मरणादेव बालानां पशुपक्षिणाञ्चान्वयबोधोऽर्थात् पदार्थसम्बन्धसामान्यज्ञानं दृश्यते, तेषामिङ्गितैर्निमिषितैः संकेतैरव्यक्तध्वनिभिश्चैतत् स्पष्टं ज्ञायते यत् तेषु पूर्वजन्मशक्तिस्मरणकारणभूता सामान्यज्ञानावस्था उद्भूता भवति न हि तत्काले एव जन्मकाले आद्यबोधकालो वा तेषां तत्सम्भवः शक्तिज्ञानसम्भवः शक्तिग्रहो न सम्भव इति भावः ।

एतत्कारणद्वयं भर्तृहरिणा शब्दान्तरेण पूर्वमेव निर्दिष्टमासीत् अर्थात् नागेशभट्टस्य कथनं भर्तृहरिप्रमाणसिद्धं भवति, यथोक्तं वाक्यपदीयकारेण –

इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।

तां पूर्वाहितसंस्कारो बालोऽपि पतिपद्यते ॥[26]

अर्थात् लोके इतिकर्तव्यता इदमित्थं कर्तव्यमिति ज्ञानं शब्दाश्रितं विद्यते, शब्दश्च व्यवहाराधीनः । व्यवहारे शब्दापशब्दाः उभयविधा अपि शब्दाः प्रयुज्यन्ते । पूर्वजन्म संस्कारवशात् तामितिकर्तव्यतां बालोऽप्यस्मदादिव्यवहारं दृष्ट्वा पूर्वजन्मसंस्कारवशाच्च प्रतिपद्यते ।

अथ च प्रतिभात्मिकया शक्त्या सर्वेषु प्राणिषु इतिकर्तव्यतारूपः व्यवहारः सर्वत्र द्रष्टुं शक्यते यथा वाक्यपदीयस्य कारिकाद्वयं प्रमाणत्वेन द्रष्टुं शक्यते

'साक्षाच्छब्देन जनितां भावनानुगमेन वा ।

इतिकर्तव्यतायां तां न कश्चिदतिवर्तते ॥

प्रमाणत्वेन तां लोके सर्वः समनुपश्यति ।'[२७]

समारम्भाः प्रतायन्ते तिरश्चामपितद्वशात् तत्र पुण्यराजः कारिकाशयं स्पष्टयन् कथयति – 'सा साक्षाच्छब्देन कदाचित् व्यवहारकाले जन्यते जन्मान्तरभावनावशेन वा गजवाजिप्रभतीनामपि तन्मूल एव कर्तव्यतारूप सर्वत्र व्यवहारः ।', 'सर्वः कश्चित्तामेव भगवतीं स्वप्रतिभां प्रमाणत्वेन पश्यति । तथा चोच्यते सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः इति तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति न तदपह्नवेन आत्मा वञ्चनीयः'[28]

'तिरश्चाञ्चन्वयबोधः' इति यन्नागेशभट्टेनोक्तं तस्य तत्कथनं वाक्यपदीयानुसारि एव वर्तत इति प्रमाणत्वेन स्वीकर्तुं शक्यते ।

मीमांसामतम्

मोमांसादर्शने साध्वसाध्वपभ्रंशादिविषये विस्तरेण चर्चा कृता विद्यते । तेषां मते साधुशब्दे एव अनादिशक्तिर्भवति अर्थाद् अन्येषु अपभ्रंशादिषु सा अनादिशक्तिर्न भवति 'एषामेकोऽनादिरन्येऽपभ्रंशाः'[29]। अस्मिन् विषये जैमिनिसूत्रं च प्रमाणयन्ति । सूत्रमस्ति 'तदशक्तिश्चानुरूपत्वात्'[30] अर्थात् अशक्त्या असामर्थ्येन साधूनामेव तथोच्चारण–

मर्थतोऽवयवयतश्चानुरूपत्वादित्यर्थकम् । तत्र शाबरभाष्योक्तं विद्यते 'तस्माद् यमभियुक्ता उपदिशन्ति एष एव साधुः साधुरित्यवगन्तव्यः' तेषां मते अपभ्रंशेषु यद्यपि अनादिशक्तिर्न भवति तथापि ते साधुशब्दवदर्थबोधका भवन्ति, साधुशब्दार्थस्मरणं च तत्र बोधकारणं भवति । यथोक्तं दृश्यते शाबरभाष्ये 'तेन गाव्यादिभ्यः सास्नादिमानवगम्यते, अनुरूपो हि गाव्यादिर्गोशब्दस्य ।', 'गाव्यादिदर्शनाद् गोशब्दस्मरणम् । ततः सास्नादिमानवगम्यते'[30]

निष्कर्षः

तदेवमपभ्रंशेषु शक्तिविचारप्रसङ्गे भवेन्नाम शास्त्रकारेषु आंशिको मतभेदः किन्तु लोकव्यवहारे अपभ्रंशानामपशब्दानामसाधुशब्दानां वा सत्ता सर्वैः तथैव स्वीक्रियते यथा साधुशब्दानामङ्गीक्रियते ।

अत्र सर्वेषां मतानां परीक्षणेन महाभाष्यवाक्यपदीयादिग्रन्थानां प्रमाणेन वैयाकरणानां मतं युक्तिसङ्गतं व्यावहारिकं शास्त्रप्रेरकञ्चेति स्वीकर्तुं शक्यते ।

लोकव्यवहारदृष्ट्या उभयोः शब्दापशब्दयोः समाना गतिर्भवति किन्तु शब्देनैवार्थोभिधेयः नापशब्देन अन्यथा शास्त्रवैयर्थ्यापत्तिः स्यात् । यथा निर्दिशति भगवान् भाष्यकारः 'समानायामर्थावगतौ शब्देन चापशब्देन च तत्र धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति ।'[32]

अर्थाद् उभयविधशब्देषु अर्थबोधिका शाब्दबोधकारणभूता शक्तिर्भवति । अपभ्रंशेषु सा शक्तिः साधुशब्दस्मरणकारणात् साक्षाद्वा भवतु नाम अभ्युदयार्थिभिः शब्देनैवार्थोऽभिधेयः नापशब्देनेति भावः । एवञ्च क्रियमाणमर्थाच्छास्त्रज्ञानपूर्वकमुच्चार्यमाणं साधुशब्दोच्चारण-मभ्युदयकारि भवति । यथा 'एकः पूर्वपरयोः इति सूत्रभाष्ये पुनः स्मारयन् निगदति भाष्यकारः।', **'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति।'**[३३]

अर्थात् एकोऽपि साधुशब्दः सम्यक्तया ज्ञातः अवगतः शास्त्रसिद्धो यदि प्रयुज्यते स स्वर्गे लोके चोभयत्रापि कामान् पिपर्ति, शास्त्ररक्षणे च समर्थो भवतीति नात्र सन्देहः, साधुशब्द एव बह्मस्वरूपो भवतीतिशम् ।

सन्दर्भाः

1. म. भा. पस्पशाह्निकम्
2. म. भा. 1/1/68 सूत्र
3. तत्रैव प्रदीपः
4. वा. प. सम्बन्धसमुद्देशः कारिका 29
5. तत्रैव हेलाराजः
6. काशिका 2/1/2 सूत्रे
7. तत्रैव न्यासः
8. अमरकोषः 1/6/2
9. म. भा. पस्पशाह्निकम्
10. वा. प. 1/147
11. तत्रैव स्वोपज्ञवृत्तिः
12. वा. प. 1/48-50
13. म. भा. पस्पशाह्निकम्
14. म. भा. पस्पशाह्निकम्
15. तत्रैव प्रदीपः
16. म. भा. पस्पशाह्निकम्
17. वा. प. 1/27
18. वा. प. 1/139
19. तत्रैव स्वोपज्ञवृत्तिः
20. न्यायमञ्जरी पृ. 388
21. वैयाकरणभूषणसारः, शक्तिनिर्णयः ।
22. परमलघुमञ्जूषाशक्तिनिरूपणम् ।
23. तत्रैव
24. वा. प. 152-153
25. परमलघुमञ्जूषाशक्तिनिरूपणम् ।

26. वा. प. 1/121
27. वा. प. 2/146-147
28. तत्रैव पुण्यराजः
29. मी. द. शाबरभाष्यम् 1/3/26
30. मी. द. 1/3/28
31. मी. द. शा. भा. 1/3/29
32. म. भा. पस्पशाह्निकम्
33. म. भा. 6/1/84 सूत्रे

आचार्य्यः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

ध्वन्यालोकस्थध्वनिलक्षणकारिकाविवेकः

✍प्रो. ई. एम्. राजन्

(आलोकायते ध्वन्यालोकः काव्यशास्त्रपङ्क्तौ । तत्र हेतुद्वयम् - ग्रन्थप्रतिपाद्यम्, विदुषां तत्रादरपूर्वकं कृतसूक्ष्मेक्षणञ्च । महती परम्परा काचन ध्वन्यालोकपरिशीलनस्य । वस्तुतः तत्र-तत्रोद्धृतकारिकाघटकः शब्दः, तद्घटितं वाक्यञ्च कल्पद्रुमं प्रतिस्पर्धते । कल्पका मनीषिणः स्वस्ववासनानुसारं ततः फलानि गृह्णन्ति । प्रकृतनिबन्धकारः वैशिष्ट्यमिदमेव वीक्षमाणो ध्वनिलक्षणकारिकां विविनक्ति । प्रसिद्धटीकानां सन्दर्भैः साकं विदुषः स्वोपज्ञमत्र स्वर्णे सुगन्धमुत्पादयति ।)

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधय सर्वविद्यानां दक्षिणामूर्तये नमः ॥

आलङ्कारिकप्रस्थानेषु रसालङ्काररीतिध्वनिवक्रोक्त्यौचित्यादिषु ध्वनिप्रस्थानमनुमन्यन्ते प्रायेणालङ्कारिकाः । एतं द्रष्टाऽऽनन्दवर्धनाचार्यः प्रतिष्ठापकोऽभिनवगुप्ताचार्यः । तत्रानन्दवर्धनाचार्यः ध्वन्यालोकेन स्वग्रन्थेन ध्वनिं सहृदयानां समक्षं प्रादर्शयद्द्वितीयेन निजलोचनेन ध्वन्यालोकव्याख्यानेन ध्वनेः प्रतिष्ठामकारि । अत एवाभिनवगुप्तपादः स्वव्याख्याने उच्चैरुदघोषयद् यथा -

किं लोचनं विनाऽऽलोकः भाति चन्द्रिकयाऽपि हि ।
तेनाभिनवगुप्तेन लोचनोन्मीलनं कृतम्[1] इति ।

तत्र भामहवामनादिभिर्ध्वनिदिगुन्मीलिता ।[2] परं ध्वनिरिति शब्दस्तैर्न कृतः । परमनन्तरमागतैर्यथालिखितपाठकैः स न दृष्टः परं दृष्ट्वाहं ध्वनिप्रपञ्चं निर्मामीति आनन्दवर्धनाचार्यस्याशयः । आचार्यवामनः भामहश्च ध्वनिदिगुन्मीलनं विधत्तः स्मेति अभिनवगुप्ताचार्यः ।

अत्रोभयत्र वाच्यव्यतिरिक्तमर्थान्तरमस्तीति सूचितमन्तत आनन्दवर्धनाचार्यः ध्वनिमपश्यत्। तत्र ध्वनावभाववादिनं भाक्तवादिनमनिर्वचनीयवादिनञ्चाशङ्क्य तत्राभाववादं दूषयन्नानन्दवर्धनाचार्यः 'अस्ति ध्वनिः' इति वाक्येनास्तित्वम् प्रतिज्ञाय ध्वनिलक्षणमाह -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ इति ।

अस्यावतारिकायामानन्दवर्धन आह 'एवं ध्वनेस्सत्तां सत्त्वञ्च प्रतिपाद्य लक्षणे समन्वयन्नाह यत्रार्थेति ।' अत्राभिनवगुप्तः आह – सत्तां सद्भावं साधुभावं प्रतिपाद्येति । तत्राभाववादखण्डनेन सद्भावः प्रतिपादितः । प्राधान्यञ्च –

सरस्वती साधु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।

अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् । इति ।

पुनरितिहासमुखेन प्राधान्यमाह –

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।

क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ इति ।

अत्र कारिकारूपं ध्वनिलक्षणमुक्तम् ।

अन्वयः – यत्र उपसर्जनीकृतस्वार्थौ अर्थः शब्दो वा तम् अर्थं व्यङ्क्तः सः काव्यविशेषः ध्वनिः इति सूरिभिः कथितः ॥

व्याख्या – यत्र इति यच्छब्दात् सप्तम्यर्थे त्रल्लन्तो यस्मिन्निति लभ्यते, यच्छब्दः काव्यपर इति यस्मिन् काव्ये । अर्थशब्दयोर्विशेषणमुपसर्जनीकृतस्वार्थौ इति । समस्तपदात्मकं विशेषणमिति विग्रहो वक्तव्यः । स च यथा – स्वश्चार्थश्च स्वार्थौ । उपसर्जनीकृतौ स्वार्थौ याभ्यां तावुपसर्जनीकृतस्वार्थौ । अन्यपदार्थः शब्दार्थौ । स्वार्थौ इति द्वन्द्वः, विशेष्य च स्वार्थयोर्विशेषणं यथाक्रमम् अर्थस्य शब्दस्य च भवति । एवम् उपसर्जनीकृतस्वः अर्थः, उपसर्जनीकृतार्थः शब्दः । स्वशब्द आत्मवाची इति अभिनवगुप्ताचार्यः । स्वशब्दोऽत्र विशेष्यार्थपरः । तथा च उपसर्जनीकृतः अप्रधानीकृतः अर्थः येनार्थेन स उपसर्जनीकृतार्थः । इदमत्र तात्पर्यं यदर्थ आत्मानमप्रधानं करोति ।

द्वितीयं विशेष्यं शब्दः, तस्य च विशेषणं उपसर्जनीकृतार्थ इति । तथा च उपसर्जनीकृतः अर्थः येन शब्देन स उपसर्जनीकृतार्थशब्दः । इदमत्र तात्पर्यम् – यच्छब्दः स्वीयम् अर्थम् अप्रधानं करोति । तादृशौ अर्थशब्दौ तम् अर्थम् अभिव्यङ्क्तः द्योतयतः स ध्वनिरिति सूरिभिः कथितः । तमर्थमित्यत्र तच्छब्दः व्यङ्ग्यपरः – प्राक् प्रतीयमानं पुनरन्यदेव

सरस्वती स्वादु तदर्थवस्तु इति कारिकाभ्यां निर्दिष्टः । तथा सर्वात्मनार्थस्य वाच्यस्याप्राधान्ये व्यङ्ग्यस्य प्राधान्ये स अर्थः ध्वनिर्भवति ।

काव्यस्यात्मा ध्वनिर्भवति, स च त्रिविधः वस्त्वलङ्काररसैः । तत्र रसशब्देन भावादय उपलक्षणविधया ग्राह्याः । ते यथा - भावः-रसाभासः-भावाभासः- भावोदयः-भावशान्तिः-भावसन्धिः-भावशबलिमा च । सत्स्वपि बहुषु ध्वनिषु रस एव काव्यस्यात्मा । तत्र बीजं स्वानुभवः इतिहासश्च । इतिहासो यथा -

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।

क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ इति ।

वस्त्वलंकारध्वनी रसं प्रति पर्यवस्येत इति न तयोः रसापेक्षया प्राधान्यमिति रस एवात्मा भवितुम् अर्हति ।

आनन्दवर्धनाचार्यः स्वयमेव कानिचित्पदानि व्याख्याति । अर्थः वाच्यविशेषः शब्दो वाचकविशेषः । केषाञ्चन पदानां व्याख्याऽकारि अभिनवगुप्तेनापि । तथा हि - वा शब्द उभयार्थकः, तस्य विकल्पार्थपक्ष शब्दस्तमर्थं व्यनक्ति अनेन हि शब्दार्थयोरन्यतरव्यञ्जकत्वं मुख्यतयोक्तं तद्द्वारा ध्वनेः वैविध्यं शब्दशक्त्यशक्तिमूलत्वेन । विकल्पार्थप्रयोगो यथा - शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत् इति । क्वचित्समुच्चयार्थत्वमपि वाकारस्य प्रसिद्धं - यथा मत्पुत्र्या मम वा मुकुन्दगहता भाग्यं न संक्षीयताम् इत्यत्र वरुणस्य प्रार्थनायाम् (श्रीपादसप्ततिः)। तथा च शब्दस्य प्राधान्येन व्यञ्जकत्वेऽर्थस्य गौणतया, अर्थस्य प्रधानतया व्यञ्जकत्वे शब्दस्य गाणतया व्यञ्जकत्वमित्यत्राभिप्रेतमालङ्कारिकैः । तदुक्तं साहित्यदर्पणे -

सूरिभिरिति पदस्य यद्यपि काव्यतत्त्वविद्भिरिति विवक्षितोऽर्थस्तथापि ध्वनिशब्द इदम्प्रथमतयोच्चारितम् अतस्तेषु आधमर्ण्यं प्रकाशयन्नानन्दवर्धनाचार्यः 'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्' इति । अत्राचार्यः महिमभट्टः काव्यानुमितिमङ्गीकुर्वाणः पदस्यैकाभिधा शक्तिः शक्त्यन्तरं लक्षणा व्यञ्जना च नास्तीति अर्थस्सर्वोऽपि अर्थान्तरे लिङ्गं भवितुमर्हति । तत्रादौ व्यक्तिविवेके एषः ध्वनिलक्षणमेकैकं पदमादाय दूषयन् दश दोषान् वितनुते ।

तत्राद्यो दोषः-उपसर्जनीकृतात्म(र्थ)त्वम् अर्थस्य विशेषणं न देयं, व्यभिचाराभावात् । अर्थस्सर्वदोपसर्जन एव व्यङ्ग्यार्थार्थमुपादीयमानत्वात् । अत्रोच्यते काव्ये प्राधान्याऽप्राधान्य-

विवेकच्चमन्काराधीनः । अतः क्वाचेद्वाच्यार्थस्य चमत्कारस्स्यात् इत्यस्ति व्यभिचारः । शब्दस्य विशेषणत्वं नाभिमतं किन्तु शब्दस्स्वीयमर्थमप्रधानं विधायेति तात्पर्यम् । वाकारोऽपि तेन दूषितस्सोऽनुचितः यतो हि उभयथाऽपि सामञ्जस्यं प्रागुपदर्शितम् । अत एव व्यङ्क्त इत्यत्रापि समाधानं दत्तप्रायम् । सामान्ये सत्येव विशेषो वक्तव्यम् । काव्यमेकविधं रसवदेवेति विशेषदलं दूषितमनेन, वाच्यस्य चमत्कारोऽनुभवसिद्धेऽलङ्कारे समासोक्त्यादावतः गुणीभूतव्यङ्ग्यत्वं काव्यप्रकारो वर्तत एव । तदादिशब्दानां बुद्धिविषयतावछेदकावछिन्ने शान्तिस्वीकारात् लक्षणे निर्दिष्टः लिङ्गविपरिणामो न दोषाय ।

शक्तिस्वीकारादिति नयेन लिङ्गपरिवर्तनं न दोषाय । इत्येवं दर्शितेन पथा सर्वेषामुद्दिष्टदोषाणां परिहारस्सुशक एवेति केचन मुख्यदोषाः परिहृताः ।

लक्षण उपसर्जनीकृतस्वाथौ इति दलं समासोक्त्यादौ व्यङ्ग्यार्थप्रकाशकेऽलङ्कारेऽतिव्याप्तिवारणाय । दलमन्यथा अर्थशब्दौ तमर्थं व्यङ्क्त इत्येव लक्षणं स्यादेवं – 'अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमा' इति समासोक्तौ चन्द नायकव्यवहारोऽभिव्यज्यत इति तस्य ध्वनित्वं स्यात् । उपसर्जनीकृतस्वार्थाविति दले दत्ते वाच्यार्थस्यात्र रत्युद्दीपकत्वेन प्राधान्यादुपसर्जनीकृतस्वार्थत्वं नायातमिति नातिव्याप्तिः ।

उदा. प्रायच्छतोच्चैः कुसुमानि मानिनी, विपक्षगोत्रं दयितेन लम्भिता ।
न किञ्चिदूच चरणेन केवलं, लिलेख बाष्पाकुललोचना भुवम् ॥ इति।

अत्र नायक आलम्बनम्, दयितकर्तकविपक्षगोत्रकथनमुद्दीपनम्, चरणकरणकभ्लेखनादि अनुभावः, आभ्यां दैन्यं भावस्तदनु विप्रलम्भश्च प्रकाशते । इदमत्र वक्तव्यम् – यदानन्दवर्धनाचार्यस्येदं ध्वनिलक्षणं गौरवावहमिति सरस्वत्या अवताररूपः आचार्यमम्मटः सूत्रयति यथा – इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित' इति ।

आचार्य्यः (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
मुम्बई – ७७

❖❖❖

शिक्षामनोविज्ञानस्य प्रयोगविधिः

✍ **प्रो. मदनमोहनझाः**

(सकलस्यापि ज्ञानस्य मूलं मन एव सवैरभ्युपगम्यते । मन एव ज्ञानस्य ग्रहोतृ, विश्लेषयितृ, ख्यापयितृ च । तस्मात् शिक्षाया अपि ज्ञानात्मकत्वात् मनसः, तस्य विज्ञानस्य च महन्महत्त्वम् । शिक्षामनोविज्ञानविषयः शिक्षाशास्त्रीयाध्येयेषु मूर्धन्यभिषिक्तः । तत्रापि तत्प्रयोगविधिः नितरामिति विचिन्त्याचार्य्यप्रवरेण झामहोदयेनात्र निबन्धे लेखनी व्यापारिता । निबन्धेऽस्मिन् प्राच्यावाच्यविदुषां सिद्धान्तं निरूपयता 'कथं प्रयोगः कर्त्तव्यः' इति प्रयोगोऽपि प्रयुक्तः, अन्ते निष्कर्षेण च निबन्धमाबध्नता निबन्धशीर्षकण सह पूर्णो न्यायो विहित इति निबन्धेनानेनावगम्यते ।)

वस्तुतः शिक्षाक्षेत्रे मनोविज्ञानस्य प्रवेशः साम्प्रतिके युगे एव सञ्जातः इति मन्यते । अपि चास्य प्रवर्त्तकाः वैदेशिकाः विद्वांसः इति मन्यन्ते । परं किमिदं सत्यम्? यतो हि अस्माकं वैदिकशिक्षायामपि मनोविज्ञानस्य समन्वयः समवलोक्यते । प्रकृतिमूलकशिक्षायाः उद्घोषकः पाश्चात्त्य विद्वान् **रूशो** मन्यते। परं रूशो अस्माकं भारतीयविचारधारातः प्रेरितः दृश्यते । यतोहि अस्माकं विचारधारा इयमेवास्ति यत्–

प्रकृतिं यान्ति भूतानि

एवम् अस्याः एव विचारधारायाः प्रेरिताः रूशोप्रभृतयः **Back to Nature** इति स्वीकृतवन्तः । अपि च संस्कृतवाङ्मये संवेगानां बृहद्वर्णनं दृश्यते । यथा–

रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा ।
जुगुप्सा विस्मयञ्चेति स्थायिभावाः प्रकीर्तिताः ॥

प्राचीनकाले एभ्यः संवेगेभ्यः प्रेरिताः शिक्षणव्यवस्था आसीत् । यथा पञ्चतन्त्रे सर्वथा मनोवैज्ञानिकी शिक्षणव्यवस्था आसीत् । अपि च कालिदासः **प्रयोगविज्ञानम्** इत्युक्त्वा शिक्षायाः व्यावहारिकं पक्षमपि स्वीकृतवान् ।

१. प्रो. सुरेशभटनागरः – शिक्षामनोविज्ञानं मनोविज्ञानस्य व्यावहारिकं रूपमस्ति । अस्य सिद्धान्तनिरूपणं यस्मिन् क्षेत्रे भवति तस्य क्षेत्रस्याधारे एव तत्सम्बद्धस्य मनोविज्ञानस्य

नामनिरूपणं भवति । अतः यदि मनोविज्ञानस्य सिद्धान्तस्य निरूपणं शिक्षाक्षेत्रे भवति तर्हि शिक्षा-सम्बद्धितस्य मनोविज्ञानस्य नाम शिक्षामनोविज्ञानमिति ।

२. डॉ. रामपालसिंहवर्मा - शिक्षामनोविज्ञानं मनोविज्ञानशास्त्रस्य सा शाखा अस्ति या शिक्षासम्बन्धिसमस्यायाः विवेचनं, विश्लेषणं, समाधानञ्चोपस्थापयति ।

३. प्रो. ई. स्कीनरः - शिक्षामनोविज्ञानं स्वकीयमर्थं शिक्षातः अर्थात् सामाजिकप्रक्रियातः तथा च मनोविज्ञानतः अर्थात् व्यवहारसम्बन्धिविज्ञानतः स्पष्टयति ।

४. प्रो. राधावल्लभोपाध्यायः - शिक्षामनोविज्ञानमेकं विधायकं मनोविज्ञानमस्ति, येन शैक्षणिक-परिस्थितीनां मनोवैज्ञानिकमध्ययनं विधाय मानवीयव्यवहारः विश्लिष्यते । यस्योत्थानं, विकासः, निर्देशनञ्च शिक्षायाः सामाजिकप्रक्रियाद्वारा भवति ।

५. डॉ. शालिग्रामत्रिपाठी - शिक्षामनोविज्ञाने मानवव्यवहारस्याध्ययनम्, अन्वेषणं, निरीक्षणं, सिद्धान्तानां समस्यानाञ्चाध्ययनं, समाधानपद्धतीनां प्रयोगाणामधिगमस्य चाध्ययनं भवति । एतदतिरिक्तानां विविधानां परिभाषाणामवलोकनेन ज्ञायते यत्-

क. मनोविज्ञानं व्यावहारिकं विज्ञानमस्ति । अस्य सार्थकता अध्ययनानन्तरं व्यवहारस्य संशोधनेन ज्ञायते ।

ख. शिक्षामनोविज्ञानं मनोविज्ञानस्य सिद्धान्तमनुसृत्य विधायकविज्ञानस्य श्रेण्यामागच्छति ।

ग. शिक्षामनोविज्ञानं जीवनस्य वास्तविकतां स्वीकृत्य उच्चादर्शप्राप्तये साहाय्यं करोति ।

घ. शिक्षामनोविज्ञानं समाजस्थानां समेषां सामाजिकानां कृते उपयोगी वर्तते ।

प्रयोगात्मकः विधिः Experimental Methods

Jahoda (1959) जहोदामहोदयस्यानुसारेण प्रयोगः परिकल्पनायाः परीक्षणस्य एकः विधिः अस्ति ।

L. Festinger (1953) एल्. फेस्टिङ्गरमहोदयस्यानुसारेण प्रयोगस्य मूलाधारः स्वतन्त्रचरपरिवर्तनेन जायमानस्य प्रभावस्याध्ययनमस्ति ।

अतः प्रतिपादयितुं शक्नुमः यत् प्रयोगेषु चरं योजनानुसारं न्यूनाधिकीकृत्य नियन्त्रितदशायां निरीक्षणं कृत्वा उपकल्पनायाः सत्यापनं जायते । अर्थादाश्रिते चरे स्वतन्त्रचरस्य प्रभावस्याध्ययनं भवति । अपि च चराणां पारस्परिकसम्बन्धितस्याप्यध्ययनं

भवति। मनोविज्ञाने व्यवहारस्य कारणान्वेषणार्थं प्रयोगः सम्पाद्यते । अपि च प्रयोगेषु आधारितः विधिः प्रयोगात्मकः विधिः भवति ।

प्रयोगात्मकविधेः वैशिष्ट्यम्-

1. प्रयोगात्मकः विधिः सत्यापनतया (Verifiability) सम्पन्नः भवति ।
2. प्रयोगात्मकः विधिः वस्तुनिष्ठः (Objectivity) भवति ।
3. निश्चयात्मकोऽयं (Defineteness) प्रयोगात्मकः विधिः ।
4. सामान्योऽयं (Generality) प्रयोगात्मकः विधिः ।
5. पूर्वकथनीयतायां (Predictability) क्षमः अयं विधिः ।

प्रयोगस्य प्रकारः

प्रयोगप्रकारस्य विषये प्रायः मनोवैज्ञानिकेषु मतवैभिन्न्यं वर्तते । अण्डरवुडमहोदयस्यानुसारेण प्रयोगः द्विविधः भवति । परं मैकगुईन-महोदयस्यानुसारेण प्रयोगः सामान्यदृष्ट्या प्रायः एक एव भवति । केवलं समस्योद्देश्यानामाधारे एव अस्य वर्गीकरणं कर्तुं शक्यते । यथा-

१. अन्वेषकाः प्रयोगाः - येषु प्रयोगेषु समस्यायाः ज्ञानं प्रयोगकर्तॄणां पार्श्वे सामान्यमेव भवति ते एव प्रयोगाः भवन्ति अन्वेषकाः प्रयोगाः ।

२. सिद्धप्रयोगाः - येषु प्रयोगेषु प्रयोगकर्त्रा स्पष्टरूपेणोपकल्पना उपकल्पयितुं शक्यते ते प्रयोगाः भवन्ति सिद्धप्रयोगाः । उपकल्पनायाः आधारे पूर्वकथनं कर्तुं शक्यते यच्चरोऽयं निश्चितरूपेण प्रभावपूर्णः वर्तते न वेति ।

३. क्रूशियलप्रयोगाः - येषु प्रयोगेषु प्रयोगकर्त्रा एकाधिका उपल्कल्पना परीक्ष्यते त एव भवन्ति क्रूशियलप्रयोगाः ।

प्रयोगात्मकमनोविज्ञानस्य क्षेत्रम्

1. ज्ञानेन्द्रियः तत्सम्बन्धिनो उत्तेजना च (Senses and their Stimulus)
2. संवेदनात्मकप्रक्रियाः (Sensory Processes)
3. मनोभौतिकी प्रक्रिया (Psychophysics Processes)
4. कार्यपालकप्रक्रिया (Motor Responses)
5. अधिगमः अनुबन्धनं, स्थानान्तरणञ्च (Learning Conditioning and transfer)

6. स्मृतिः विस्मृतिश्च (Memory and Forgetting)
7. चिन्तनं समाधानञ्च (Thinking and Problem Solving)
8. प्रत्यक्षीकरणम् (Preception)
9. प्रेरणमन्तर्नोदश्च (Motivation and Drives)
10. सामाजिकप्रक्रिया (Social Provesses)
11. भाषा (Language)
12. मनोमितिमापनञ्च (Psychometrics and Scaling)

अस्मिन्नेव क्षेत्रे मनोविज्ञानं प्रयोगात्मकरूपेण कार्यं करोति । प्रयोगात्मकमनोविज्ञानस्यास्य महत्त्वं प्रायः शिक्षणक्षेत्रे बहु अस्ति परं मनोविज्ञानस्य क्षेत्रेऽपि अस्य महत्त्वं प्रतिपादयन्ति विद्वांसः यत् मनोविज्ञानस्य सर्वाः शाखाः न केवलं परस्परं सम्बन्धिताः अपितु परस्पराश्रिताः सन्ति । अतः प्रयोगात्मकमनोविज्ञानम् एतान् प्रयोगान् वैज्ञानिकतां प्रति नयति ।

प्रयोगात्मकमनोविज्ञानस्य क्षेत्राणां स्पष्टीकरणम्-

1. मानसिकक्रियाणामध्ययनम् ।
2. मानवव्यवहारस्याध्ययनम् ।
3. प्रयोगात्मकक्रियाणामध्ययनम् ।
4. शारीरिकक्रियाणामध्ययनम् ।
5. वंशानुक्रमस्याध्ययनम् ।
6. वातावरणस्याध्ययनम् ।
7. अवस्थानामध्ययनम् ।
8. अधिगमप्रक्रियायाः अध्ययनम् ।
9. रुचेः अरुचेश्चाध्ययनम् ।
10. प्रेरणायाः अध्ययनम् ।
11. मूलप्रवृत्तीनामध्ययनम् ।
12. वैयक्तिकभिन्नतायाः अध्ययनम् ।
13. अपराधानामन्वेषणम् ।
14. असामान्यबालकानामध्ययनम् ।
15. मानसिकस्वास्थ्यस्याध्ययनम् ।
16. समूहगतिशीलतायाः अध्ययनम् ।
17. निर्देशनस्याध्ययनम् ।
18. समायोजनस्याध्ययनम् ।
19. अचेतनमनसः अध्ययनम् ।
20. अध्यापनविधीनामध्ययनम् ।
21. पाठ्यक्रमनिर्माणस्याध्ययनम् ।
22. शिक्षासमस्यानामध्ययनम् ।
23. विद्यालयीयपरिवेशस्याध्ययनम् ।
24. अध्यापनस्य मूल्याङ्कनम् ।
25. अनुशासनस्याध्ययनम् ।

प्रयोगलेखनम्

वैज्ञानिकेषु मनोवैज्ञानिकेषु च प्रयोगेषु प्रयोगकरणमेवावश्यकं पर्याप्तं वा न भवति अपितु तेषां प्रयोगाणामालेखनिर्माणमपि आवश्यकं भवति । यद्यपि प्रयोगलेखने वैज्ञानिकेषु प्रायः मतवैभिन्न्यं दृश्यते । तथापि सर्वेषां वैज्ञानिकानां प्रयोगलेखनस्याधारः तु समस्या, समस्यापरिचयः, प्रयोगपद्धतिः, परिणामः, निष्कर्षः, सन्दर्भः इत्येव भवति । अतः अत्रापि मनोवैज्ञानिकेषु प्रयोगेषु अयमेवाधारः स्वीक्रियते । एतेषामाधारे एव प्रकरणेऽस्मिन् प्रयोगलेखनप्रकारः वर्ण्यते । सर्वेषां सोपानानां विवरणमत्र प्रस्तूयते । एतेषामुदाहरणात्मकं प्रदर्शनं विभिन्नेषु प्रयोगेषु कारयिष्यते ।

१. **शीर्षकः (Title)** – अस्मिन् सोपाने प्रयोगस्य नाम लेखनीयं भवति । शीर्षकः सरलः, संक्षिप्तः, स्पष्टः, सार्थकश्च भवेत् ।

२. **समस्या (Problem)** – सोपानेऽस्मिन् प्रयोगस्योद्देश्यम् अल्पेषु शब्देषु लेखनीयं भवति । यथा बोधविस्तारस्य अवधानविस्तारस्य वा तुलनात्मकमध्ययनम् । अर्थात् समाधानार्थं प्रस्तावितः प्रश्नः एव समस्या भवति । समस्येयं प्रयोगकर्तुः रुच्यनुसारिणी, अभियोग्यतानुकूला, उपयोगिनी, मापनीया अल्पव्ययसाध्या, अल्पसमयसाध्या च भवेत् ।

३. **प्रयोगः (Experiment)** – उपक्रमेऽस्मिन् प्रयोगस्य सैद्धान्तिकपृष्ठभूमेः बृहद्वर्णनं, सम्बन्धितस्य इतिहासस्य च वर्णनं करणीयम् । अर्थात् अस्य प्रयोगस्य कः सिद्धान्तः, को वा सिद्धान्तप्रतिपादकः, के च नियमोपनियमाः, प्रयोगोऽयं कुतः समारब्धः, इत्यादिकं वृत्तान्तं लेखनीयम् ।

४. **उपकल्पना (Hypothesis)** – कस्याश्चित् समस्यायाः सम्भावितोत्तरमेव भवत्युपकल्पना । अर्थात् उपकल्पना चराणामनुमाने आधारितं, तर्कपूर्णं, परीक्षणीयं, प्रस्तावितञ्च वक्तव्यमस्ति, यस्याधेयः प्रयोगः भवति ।

उपकल्पनायाः कार्यम्-

क. प्रयोगस्याध्ययने कार्ये च दिशानिर्देशनं मार्गनिर्देशनं वा करोत्युपकल्पना अर्थात् उद्देश्यानामनुगमनार्थं मार्गं प्रयच्छति उपकल्पना ।

ख. उपकल्पना अनुसन्धानस्य समस्यायाश्च उद्देश्यं सुनिश्चितं करोति ।

ग. प्रयोगे प्रमुखतत्त्वानां संकलने सहायिका भवत्युपकल्पना ।

घ. उपकल्पना सर्वासु परिस्थितिषु निष्कर्षान्वेषणे सहायिका भवति ।

ङ. उपकल्पनामाध्यमेन पुनरीक्षणं सरलं भवति ।

च. प्रयोगस्य स्वरूपमुपकल्पनया निर्दिष्टं भवति ।

फलतः उपकल्पना एव प्रयोगस्य मूलाधारः भवति । अतः अस्याः निर्धारणं सम्यक्तया करणीयम् । अस्याः निर्धारणे निम्नलिखितेषु विन्दुषु अवधानं देयम् ।

क. उपकल्पना समस्यायाः पर्याप्तमुत्तरं स्यात् ।

ख. उपकल्पना समस्यायाः सरलमुत्तरं स्यात् ।

ग. प्रत्ययानां परिभाषीकरणदृष्ट्या उपकल्पना स्पष्टा स्यात् ।

घ. उपकल्पना विशिष्टा स्यात् ।

ङ. शून्या उपकल्पना श्रेष्ठ भवति ।

च. उपकल्पनायां प्रयोगसिद्धत्त्वमवश्यं स्यात् ।

छ. उपकल्पना एवं स्यात् यस्याः परीक्षणाय उपकरणं सुलभं स्यात् ।

ज. उपकल्पना सिद्धान्तसम्बन्धिता स्यात् ।

मैकगुईन (F.J.MC.Guigan) महोदयस्यानुसारेण उपकल्पना द्विविधा भवति । सार्वभौमिक्युपकल्पना (Universal) अस्तित्त्वात्मिक्युपकल्पना (Existential) च ।

५. चरः (Variable) – यः अस्मान् प्रतिक्रियाकरणार्थमभिप्रेरयति, उत्तेजयति वा स एव चरः भवति । यथा सर्पं दृष्ट्वा भयात् अस्माकं शरीरे कम्पनं जायते । अत्र सर्पः भवति चरः, यं दृष्ट्वा शरीरे कम्पनरूपिका प्रतिक्रिया सञ्जाता । अत्र सर्पः उत्तेजनाचरः (Stimulus – Variable = S-V) अस्ति तथा कम्पनरूपात्मकः व्यवहारः प्रतिक्रियाचरः (Response Variable = R-V) इत्यस्ति । कश्चन एकः कारकः भवति यः प्रतिक्रियाचरमुत्तेजनाचरं वा प्रभावयति सः कारकः भवति जैविकः चरः (Organismic - Variable) । एतेषां चराणां वर्गीकरणं त्रिविधं भवति । स्वतन्त्रचरः परतन्त्रचरः मध्यवर्तिचरश्च । येषु चरेषु प्रयोगकर्तुः नियन्त्रणं भवति ते भवन्ति स्वतन्त्रचराः । यथा साहयर्यपरीक्षणे प्रदर्शिताः उद्दीपकशब्दाः स्वतन्त्रचराः भवन्ति । अपि च ये चराः प्रयोगकर्त्रा प्रस्तुतस्य चरस्य प्रदर्शनेन प्रतिक्रियारूपेण प्रदर्शिताः भवन्ति तथा अदर्शनेन अदर्शिताः भवन्ति त एव चराः परतन्त्रचराः भवन्ति । अर्थात् प्रयोगकर्तुः अधीनस्थाः चराः स्वतन्त्रचराः तथा

प्रयोज्यस्य अधीनस्थाः चराः परतन्त्रचराः वा भवन्ति । ये चराः स्वतन्त्रं परतन्त्रं च चरं प्रभावयन्ति त एव चराः भवन्ति मध्यवर्तिनः चराः ।

६. सहायकोपकरणानि - प्रयोगेषु येषामुपकरणानां सामग्रीणां वा आवश्यकता भवति तेषां सर्वेषामुल्लेखः सोपानेऽस्मिन् करणीयः । यथा-एकः प्रयोगः भवति शब्दसूचीविधिमाध्यमेन स्वतन्त्रसाहचर्यस्य परीक्षणम् । प्रयोगेस्मिन् प्रयुक्तानां सामग्रीणां नामानि सहायकोपकरणसोपाने एवं लिख्यन्ते ।

क. 25, 50, 130 वा सार्थकोद्दीपकशब्दानां शब्दसूची ।

ख. समयाङ्कनाय विरामघटिका ।

ग. सूच्याच्छादनार्थं धवलपटः ।

घ. प्रतिक्रियाया अङ्कनार्थं कर्गजं, लेखिनी इत्यादयः ।

७. प्रयोज्यविवरणम् - सोपानेऽस्मिन् प्रयोज्यस्य विवरणं प्रस्तूयते । अनेन ज्ञायते यत् प्रयोज्यः कीदृशः अस्ति । प्रयोज्यस्य शारीरिकं मानसिकं च स्वास्थ्यं कथमस्ति । अत्र प्रयोज्यस्य निम्नलिखितानां विवरणानामावश्यकता भवति । यथा-प्रयोज्यस्य नाम, आयुः, कक्षा, योग्यता, लिङ्गं, शारीरिकं स्वास्थ्यं, मानसिकं स्वास्थ्यमिति ।

८. नियन्त्रणम् - नियन्त्रणं नाम प्रयोगात्मकं नियन्त्रणम् । अर्थात् प्रयोगार्थं ये ये विषयाः अपेक्षिताः अवधेयाश्च भवन्ति तेषां प्रयोगदृष्ट्या नियन्त्रणम् । अर्थात् यत्र प्रयोगः भवति तत्स्थाने शान्तं प्रकाशयुक्तं च अस्ति न वा । प्रयोगानुगुणं प्रयोगोपयुक्तानामुपकरणानां यन्त्रादीनां च संस्थापनं सम्यक् रूपेण जातं न वा इत्यादिकमपि सोपानेऽस्मिन् उल्लेखनीयम् ।

९. प्रयोज्यं प्रति निर्देशाः - प्रयोगकर्ता तु प्रयोगेण सह पूर्णपरिचितः भवति, परं प्रयोज्यः पूर्णतया अपरिचितः भवति । अतः प्रयोगे सः प्रयोज्यः कीदृशः सहयोगं करिष्यति अर्थात् प्रयोगे कानि कानि कार्याणि करिष्यति प्रयोज्यः इति सर्वं सोपानेऽस्मिन् लेखनीयं भवति । यथा दर्पणरेखाङ्कनमिति प्रयोगे प्रदीयमानाः निर्देशाः निम्नलिखिताः भवन्ति ।

क. उपविशतु भवान् । प्रथमतः मया दत्तं 'रेडी' इति संकेतं श्रुत्वा भवान् हस्ते काष्ठलेखनीं धृत्वा प्रयोगं कर्तुं सन्नद्धः भवतु ।

ख. 'रेडी' इति संकेतात् परं 'स्टार्ट' इति संकेतः मया प्रदास्यते । ततः भवान् दर्पणे नक्षत्रप्रतिबिम्बं दृष्ट्वा आरम्भबिन्दुतः नक्षत्रस्योभयोः रेखयोः मध्ये काष्ठलेखनीं चालयन् पुनः आरम्भबिन्दुं प्रति आगच्छतु ।

ग. अत्र लेखनीचालने अतिशीघ्रता न कर्तव्या । नक्षत्रस्योभयोः रेखयोर्मध्ये एव लेखनीचालनं कर्तव्यम् । यदि नक्षत्ररेखाभ्यां लेखनी बहिर्गच्छति तर्हि लेखनीं कृष्ट्वा एव पुनः रेखयोर्मध्ये आनयतु ।

घ. भवान् यदा यदा लेखन्या रेखे स्पर्शयति, रेखाभ्यां बहिर्गच्छति च तदा तदा भवतः त्रुटिः परिगण्यत ।

ङ. एवं कारेण प्रथमं वारत्रयम् अन्तिमवारत्रयं च प्रयासः वामहस्तेन, मध्ये षड्वारं च दक्षिणहस्तेन करोतु ।

च. प्रयोगे भवतां व्यवहारः परिणामश्च गुप्तः भविष्यति । अस्य प्रकाशनं न भविष्यति । अतः निःसंकोचेन व्यवहरतु भवान् ।

छ. प्रयोगसम्बन्धिनी काचिद्वार्ता यदि भवता नावगता तर्हि निःसंकोचेन पृच्छतु । इत्यादयः निर्देशः प्रदीयते ।

९. प्रस्तुतीकरणम् – प्रयोगकर्त्ता प्रयोगशालायामागच्छति । सः एकं प्रयोज्यमपि आनयति । प्रयोगानुगुणं यन्त्रोपकरणादिकं यथास्थानं संस्थापयति । प्रयोज्यमाहूय स्वागतपूर्वकं आसनं ददाति । प्रयोज्येन सह सौहार्द्रं संस्थाप्य तं प्रयोगानुगुणं निर्दिश्य प्रयोगारम्भं करोति ।

१०.प्रयोगविधिः – सोपानेऽस्मिन् प्रयोगसम्पादनसम्बन्धितानां सर्वासां क्रियोपक्रियाणामुल्लेखः करणीयः । अर्थात् एकस्मिन् प्रयोगे आरम्भतः प्रयोगान्तं यावत् प्रयोगकर्त्रा याः क्रियाः सम्पादिताः भवन्ति तासां सर्वासामुल्लेखः सोपानेऽस्मिन् करणीयः । यथा प्रयोगकर्ता प्रयोगशालामागच्छति, प्रयोज्यमाह्वयति, सर्वाणि उपकरणानि यथस्थानं संस्थापयति, पुनः प्रयोगानुगुणं प्रयोज्याय निर्देशं ददाति इत्यादयः ।

११.परिणामः – सोपानेऽस्मिन् प्रयोगसम्बन्धितानां प्रदत्तानां विवरणं भवति । प्रयोगेण प्राप्तानां प्रदत्तानां विवरणं भवति । तेषां सांख्यिकीयं विश्लेषणं भवति । तथा एतेषामाधारेण परिणामं ज्ञात्वा संक्षेपेण तस्योल्लेखः भवति ।

१२.अन्तर्दर्शनविवरणम् – सोपानेऽस्मिन् प्रयोज्येन प्रयोगकाले किमनुभूतम्? अर्थात् प्रयोगकरणे किं काठिन्यं किं वा सारल्यमनुभूतम्? प्रयोज्यस्य मनसि प्रयोगसमये किं किं जातम्? इत्यादिकं विवरणं प्रयोज्येन लिख्यते ।

१३.निष्कर्षः – सोपानेऽस्मिन् प्रयोगस्य परिणामः स्पष्टतया संक्षेपेण लिख्यते । अपि च या उपकल्पना प्रयोगकर्त्रा प्रयोगारम्भे उपकल्पिता सा सत्यापिता भवति न वेति सर्वं विवरणं लिख्यत ।

एतदतिरिक्तमपि विभिन्नाः तालिकाः स्तम्भाकृतयः सारिण्यः रेखाचित्राणि च निर्मीयन्ते । यथा योजनासारिणी, फलाङ्कसारिणी इत्यादयः । एतेषां स्वरूपादिकं सम्बद्धे प्रयोगे विवृतं वर्तते । प्रयोगस्य परिणामः स्तम्भाद्याकृतिमाध्यमेन सांख्यिकीयगणनामाध्यमेन च प्रदर्शनीयः भवति ।

आचार्य्यः (शिक्षाविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैया संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई – ७७

❖❖❖

शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः

✍ प्रो. बोधकुमारझाः

(ब्रह्माण्डे यत्किमपि सत्यं, शिवं, सुन्दरं च, तत्सवं शिवात्मकमेवेति आतिष्ठन्ते शिवतत्त्वविदः । क्वचिच्छिवः चाक्षुषप्रत्यक्षतां क्वचिच्च तदप्रत्यक्षतां धत्ते इति त्वन्यत् । भारतीयदर्शनेषु व्याकरणमपि दर्शनत्वेन प्राचीनकालादेव प्रतिष्ठितम् । अस्मिन् शब्दाद्वैतवादः आत्मभूतः स्फोटवादरूपेण समुपास्यते शाब्दिकैः । निबन्धेऽस्मिन् तमेव सिद्धान्तमाश्रित्य क्रमशः शिवतत्त्वं, स्फोटतत्त्वं, स्फोटतत्त्वस्य ब्रह्मरूपत्वं, शिवस्फोटयोश्चाभेदः नानायुक्तिभिः निरूपितम् ।)

अथेदं शिवतत्त्वं नाम किम्? स्फोटतत्त्वं नाम किम्? इति प्रतिपाद्य शिवतत्त्वानां स्फोटतत्त्वेषु गवेषणञ्च विधाय एकयैव श्रुत्या शिवतत्त्वस्फोटतत्त्वयोः यथा निरूपणं तथा प्रस्तवीमीति प्रतिजाने । तत्र तावत्-

किमिदं शिवतत्त्वम्?-त्रिशिखिब्राह्मणोपनिषदि[1] शिवस्य नित्यत्वं, शुद्धत्वं, निरञ्जनत्वं, विभुत्वमेकत्वम्; श्वेताश्वतरोपनिषदि[2] शिवस्य मायावत्त्वं, महेश्वरत्वं, व्यापकत्वं; वराहोपनिषदि[3] शिवस्य गुरुत्वम्, वेदत्वम्, देवत्वम्, प्रभुत्वम्, सर्वमयत्वम्; माण्डुक्योपनिषदि[4] शिवस्य शान्तत्वम्, अद्वैतत्वम्, आत्मत्वम्, विज्ञेयत्वम्; सदानन्दोपनिषदि[5] च शिवस्य ब्रह्मणः विष्णोश्चापेक्षया परत्वम्; श्रीमद्भगवद्गीतायां[6] शिवस्य रुद्रत्वम्, शङ्करत्वम्, उपद्रष्टृत्वम्, अनुमन्तृत्वम्, भर्तृत्वम्, भोक्तृत्वम्, परमात्मत्वम्, परपुरुषत्वं च भूयो भूयस्तत्र तत्र शब्दतः अर्थतश्चोक्तम् । सिद्धान्तशैवदर्शने[7] च शिवस्य ज्ञानक्रियात्मकशक्तिद्वययुतत्वम्, स्वतन्त्रत्वम्, प्रभुत्वम्, पतित्वञ्च प्रतिपाद्यते । स चायं पतिः निष्कम्पोऽचलमूर्त्तिमान् । द्विधा हि आत्मनां मूर्तिः - चला, अचला चेति । तत्र चला तत्त्वभौवनशरीरात्मिका, अचला तु ज्ञानक्रियास्वभावा। तत्रायं पतिरचलमूर्त्तिमान्, न तु भौवनशरीरयुक्तः । अचलमूर्त्तिलक्षणा च शक्तिः सर्वोत्कृष्टा परमाण्वादेरप्यतिसूक्ष्मा सर्वदिग्गता अमृतात्मिका प्रध्वस्तावरणा शान्ता

आद्यन्तशून्या करुणाभरिताऽस्य पत्युः शरीरत्वेनोपचर्यते । पत्युः शक्तिरेव करणम्, तयैव तत्तत्क्रियानिष्पादनात् । यथा लोकेऽमूर्त्तोऽपि कालः क्षणमुहूर्त्तादिकः षड्ऋतुरूपः स्वस्वोचितपुष्पफलादीनां प्रतिक्षणं द्रव्यपरिपाकस्य बाल्ययौवनादेश्च साधकः कर्त्ता प्रख्यायते, एवममूर्त्तोऽपि शिवः कार्य्यं क्षित्यादिकं जगत् स्वकीययेच्छाशक्त्या निष्पादयतीति । सिद्धान्तकौमुदीकारः श्रीमद्भट्टोजिदीक्षितः कौमुदीग्रन्थमध्ये स्वकृते मङ्गले शिवस्य श्रोत्रियत्वेन योग्यत्वेन च प्रसिद्धत्वम्, गुणवत्त्वम्, प्रत्यहं महर्षिभिः तोष्टूय्यमानत्त्वम्, विभुत्वम्, सर्वोत्कर्षेण वर्त्तित्त्वम्, अगुणत्वं च प्रतिपादयति[8] । न चैकस्यैव ताष्टूय्यमानत्वम्, अगुणत्वञ्चेति विरुद्धमिति वाच्यम्, स्तुतिप्रयोजकीभूतानामनन्तकल्याणगुणानां श्रुतिस्मृतिसिद्धत्वेऽपि वियदादिवत् व्यावहारिकत्वात् तदभावस्य च पारमार्थिकत्वाद् विरोधाभावात् । न च श्लोकेऽस्मिन् शिवपदानुपादाने कथं शिवस्यैतानि विशेषणानीत्यपि वाच्यम्, ग्रन्थान्तमङ्गले शिवस्यैव कीर्त्तनात् ग्रन्थमध्यस्थमङ्गलेऽपि तथैव ज्ञेयौचित्यात् । ग्रन्थान्तमङ्गले च श्रीमद्भट्टो भवानीविश्वनाथपदमुच्चार्य शिवस्य सम्पृक्तस्वरूपं नः पुरस्तात् प्रस्तौति[9] । अयमेव भूषणसारकारिकान्ते शब्दतत्त्वात्मकत्वम्, निरञ्जनत्वम्, ब्रह्मत्वम्, अक्षरत्वम्, पूर्णात्मत्वञ्च शिवस्य आवेदयति[10] । भूषणसारकृत् कौण्डभट्टश्च विष्णोः रूपाद् अभिन्नं गौरीरमणरूपं स्मृत्वा जगद्विवर्त्तस्योपादानकारणत्वम्, शेषभूषणत्वम्, अशेषफलदातृत्वम्, भवाब्धितरणतरित्वं च शिवस्य प्रस्तावयति[11] । परिभाषेन्दु-लघुमञ्जूषाकारो नागेशः शिवस्य साम्बशिवरूपत्वं ग्रन्थादौ ध्यायन् तस्य ब्रह्मत्वमामनति[12] ।

किमिदं स्फोटतत्त्वम्? - तत्र तावत् स्फुट्यते ध्वनिना अभिव्यज्यत इति कर्म्मव्युत्पत्त्या, स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च घञन्तः स्फोटशब्दो निष्पद्यते । अतश्च ध्वनिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्यवसन्नम् । वस्तुतस्तु वैयाकरणसिद्धान्तानुसारं[13] यदनादिनिधनं शब्दात्मकं ब्रह्म तज्ज्ञानार्थमेव प्रकृतिप्रत्ययादिविभागः काल्पनिकः कृतो वर्त्तते । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते - इति रीत्या शास्त्रेषु प्रक्रियाभेदेन अविद्याया एवोपवर्णनम्, तत एव च सत्यस्योपलब्धिः । अयञ्च स्फोटात्मकः शब्दः तत्तत्प्राणिहृदयदेशाऽवच्छिन्नाकाशदेशस्थः विराट्पुरुषस्यापि हृदयरूपबाह्याकाशदेशस्थ-श्च । स चैको लाघवात् । विभुश्च व्यापनात् । यथैकत्र श्वेतद्रव्ये रूपं व्यापकम्, सर्वावयवावच्छेदेन सम्बद्धम्, तथायमप्याकाशदेशस्थः तथा वक्तुं शक्य इति विभुत्वं स्फुटम् ।

एवमेव ''सोऽयं गकारो यः पूर्वदिने श्रुतः'' इति प्रत्यभिज्ञया तावत्कालं स्थिरत्वसिद्धौ स्फोटस्य नित्यत्वे पर्यवसानम् । शब्दनित्यत्ववाद एव स्फोटवादस्याधारः । ''तदशिष्यं संज्ञाप्रमाणत्वात्[14]'' ''पृषोदरादीनि यथोपदिष्टम्[15]'' इत्यादीनि सूत्राणि प्रणीय पाणिनिना शब्दस्य नित्यत्वं स्पष्टमेवोद्घुष्टम् । ''सिद्धे शब्दार्थसम्बन्धे[16]'' इति वार्त्तिकमारभता कात्यायनेनापि स्पष्टमेव स्वीकृतं तत् तथ्यम् । महाभाष्यकारेण पतञ्जलिनापि ''नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः[17]'' इत्येवं रूपेण व्याहरता शब्दस्य नित्यत्वमङ्गीकृतम् । अयं च नित्यः स्फोटः ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन यदा मूलाधारे संस्कृतपवनेनाभिव्यज्यते, तदा पवारागित्युच्यते । नाभिपर्यन्तमागच्छता तेन वायुना अभिव्यक्तः केवलं मनोविषयः सूक्ष्मतरः पश्यन्तीत्युच्यते । हृदयर्प्यन्तमागच्छता तेन वायुना अभिव्यक्तः परश्रवणग्रहणायोग्यः सूक्ष्मो मध्यमा वागित्युच्यते। प्राप्य्य कण्ठदेशं मूर्धानमाहत्य परावृत्तेन वायुना अभिव्यक्तो हि स्फोटो वैखरीनाम्ना प्रसिद्धो विवेचितो लघुमञ्जूषायाम्[18] । एतावता स्फोटस्य शब्दतत्त्वं, विभुत्वं, नित्यत्वं, एकत्वञ्चायातम् । तत्र–

स्फोटतत्त्वं ब्रह्मतत्त्वम् एव । वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन[19] शब्दविचाराय प्रवृत्तः सन् वैयाकरणः अद्वैते औपनिषदे ब्रह्मण्यपि व्युत्पद्यते, यतश्च भाष्यवाक्यपदीयभूषणमञ्जूषादौ शब्दस्य ब्रह्मत्वेन निरूपणं कृतमिति विलोकयामः । तत्र महाभाष्ये प्रत्याहाराह्निके ''वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्त्तते'' इति श्लोकवार्त्तिकं व्याचक्षाणः प्रदीपकारः कैयटः ''वेदितव्यो ब्रह्मराशिः'' इति भाष्यप्रतीके ''ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः'' इति स्पष्टतया शब्दस्य ब्रह्मत्वं ब्रवीति । वाक्यपदीयकारो भर्त्तृहरिः ''अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्[20]'' इति ब्रुवाणः शब्दतत्त्वं ब्रह्मतत्त्वमिति प्रतिज्ञाय सम्पूर्णे ब्रह्मकाण्डे शब्दस्य ब्रह्मत्वं निरूपयामास । एवमेव ''इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् । ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः[21]'' इति कारिकां विवेचयन् भट्टकौण्ड आह – ''नामरूपे व्याकरवाणि[22]'' इति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम् । प्रक्रियांशस्त्व-विद्याविजृम्भणमात्रम् । ब्रह्मैवेत्यनेन 'अत्रायं पुरुषः स्वयज्योतिः'[23] 'तमेव भान्तमनुभाति सर्वम्'[24] 'तस्य भासा सर्वमिदं विभाति'[25] इति श्रुतिसिद्धस्वपरप्रकाशत्वं सूचयन् यौगिकस्फोटशब्दाभिधेयत्वं सूचयती'ति । मञ्जूषायां च प्रपञ्चसारस्य श्लोकम्

'बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत् । स एव श्रुतिसम्पन्नः शब्दब्रह्मेति गीयते'[26] इति उद्धरन् नागेशोऽपि शब्दस्य ब्रह्मत्वं स्वीचकार । एवञ्चायं शब्दब्रह्मवाद एव इतरेभ्यो दर्शनेभ्यो व्याकरणदर्शनं परिच्छिनत्ति । अत्र वादे श्रुतयोऽपि प्रमाणत्वेनोपलभ्यन्ते ।

तथाहि यथा 'सच्चिदानन्दं ब्रह्म'[27] इत्यनया श्रुत्या ब्रह्मणः सद्रूपत्वं चिद्रूपत्वमानन्दरूपत्वञ्च प्रतिपादितमस्ति, तथैव 'वाग्वै ब्रह्म'[28] इत्यनया श्रुत्या ब्रह्मणः वाग्रूपत्वमपि विज्ञापितमस्ति । एवं च 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्ति अभिसंविशन्ति'[29] इत्यादिश्रुत्या ब्रह्मणो जगत्कर्तृत्वं, पालयितृत्वं, संहर्त्तृत्वं प्रतिपाद्यते यथा, तथैव 'वागेव विश्वा भुवनानि जज्ञे' इत्यनया वाचो भुवनकर्त्तृत्वम्, 'वागेवेदं बुभुजे' इत्यनया च 'भुज-पालनाभ्यवहारयोः' इति स्मरणात् भुवनपालकत्वं संहारकत्वं च प्रतिपाद्यते । एवञ्चोक्तयोः द्विविधश्रुत्योः एकवाक्यता वाक्तत्त्वस्य ब्रह्मरूपता समागता । तस्यां च चिद्रूपताऽपि सुतरां निश्चेतुं शक्या, 'सच्चिदानन्दं ब्रह्म' 'नित्यं विज्ञानमानन्दं ब्रह्म'[30] इत्यादिश्रुतिजाते ब्रह्मणश्चिद्रूपत्वेन संकीर्त्तनात् । एवं स्थितौ न हि चिद्रूपत्वमेवापितु सद्पत्वामानन्दरूपत्वमपि वाचि नितरां चकास्ति । किञ्च यथा 'घटः सन्' 'पट् सन्' इत्येवंरूपेण आनन्दरूपानुवेधः, 'घटो भाति' 'पटो भाति' इत्यादिरूपेण चिद्रूपानुवेधः, 'घटः प्रियः' इत्यादिरूपेण आनन्दरूपानुवेधः, तथैव वाचकशब्दानुरूपानुवेधोऽपि सर्वत्र प्रपञ्चे बोद्ध्यः । अस्तु ।

द्वयोरभेदत्वम् - शिवतत्त्वं स्फोटतत्त्वं चेत्युभयस्य शब्दात्मकत्वाद् ब्रह्मरूपत्वमेव । उभयस्यैव हृदयरूपमेकमधिकरणम् 'सर्वस्य चाहं हृदि सन्निविष्टः[31]', 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति[32]' 'रुद्राणां शङ्करश्चामि[33]' इति गीतवचनात् 'प्रणवं हीश्वरं विद्यात् सर्वस्य हृदि संस्थितम् । सर्वव्यापिनमोङ्कारं मत्वा धीरो न मुह्यति[34]' इत्युपनिषद्वाक्याच्च शिवस्य हृदयदेशस्थमध्यमाव्यङ्ग्यस्फोटस्य च समानाधिकरणत्वं विज्ञेयम् । योगशिखोपनिषदि अपि शिवस्य परायाश्च समानदेशत्वं भणितम् । तद्यथा - 'शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते । यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता[35]' इति । एवञ्च बृहदारण्यकोपनिषदि यथा 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[36]' इत्युक्त्या ब्रह्मणः उपासनीयत्वं प्रतिपादितम्, तथैव तत्रैव 'वाचं धेनुमुपासीत, तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः' इत्यादिना वाग्रूपस्य स्फोटस्यापि समुपासनीयत्वं प्रदर्श्यते ।

अपि च पारमार्थिकरूपेण यथा ब्रह्मणि नास्ति प्रपञ्चाध्यासः, किन्तु व्यावहारिकमध्यस्तत्वमस्ति । यथा अन्नमयादिकोशाः आनन्दमयस्य शुद्धब्रह्मणः परेत्यपरनामधेयस्य प्राप्त्युपायाः सन्ति । यथोक्तं भूषणे – 'पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता[37]' इति तैत्तिरीयश्रुतौ यथा 'यतो वा इमानि भूतानि जायन्ते[38]' इत्यादिना ब्रह्मणः उपादानत्वं प्रतिपाद्यते तथैव 'स भूरिति व्याहरत्, स भूमिमसृजत् [39]', सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे[40]' इत्यादिश्रुतिस्मृत्यादिभिः शब्दस्यापि उपादानकारणत्वं प्रस्तूयते । भगवान् भर्तृहरिरपि ब्रह्मस्थानीयस्य शिवस्य स्फोटस्य च 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति ब्रुवाणः तयोरभेदं व्यनक्ति । भगवता महाभाष्यकृता 'चत्वारि वाक्परिमिता पदानी[41]' त्यादिना शब्दब्रह्मणः परावाग्रूपता प्रतिपादिता । तत्रैव 'चत्वारि श्रृङ्गा त्रयो अस्य पादा[42]' इत्यादिमन्त्रं व्याचक्षाणो महाभाष्यकारः कथयति – 'महो देवो मर्त्यां आविवेश, महान् देवः शब्दः, मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं यथा स्यादि[43]'ति । अत्र प्रदीपकारेण श्रीकैयटेन महतेत्यस्य 'परेण ब्रह्मणा' इत्यर्थः कृतः । उद्योगकृता श्रीनागेशभट्टेन – 'महान् परब्रह्मरूपो देवोऽन्तर्यामिरूपः शब्दो मर्त्येष्वाविष्ट इत्यर्थः, तदावेशकत्वमाह – महता देवेनेति । साम्यं सायुज्यम्' इति व्याख्यातम् । तदुक्तं हरिणा – 'अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् । प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते[44]' इति । तदेवमुक्तसन्दर्भेण परब्रह्मतत्त्वेन स्फोटतत्त्वात्मकं वाक्तत्त्वं, शिवतत्त्वञ्च, तयोश्चभेदः इत्यवगतम्भवति । किम्बहुना, ऋग्वेदे एकस्मिन्नेव मन्त्रे द्वयोः शिवतत्त्ववाक्तत्त्वयोः निरूपणं कृतम् । स चायं मन्त्रः –

चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्यां अविवेश ॥ इति ।

अत्र मन्त्रे शब्दस्य वृषभत्वेन महादेवत्वेन च निरूपणं विद्वद्रूपेणानुशोचनीयम् । शब्दस्य वृषभत्वं कुत इति तु पतञ्जलिकृतेन व्याख्यानेनावगन्तव्यम् । तथा चोक्तम् – 'चत्वारि श्रृङ्गाणि – पदजातानि, नामाख्यातोपसर्गनिपातश्च । त्रयो अस्य पादाः – त्रयः कालाः – भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे – द्वौ शब्दात्मानौ – नित्यः कार्य्यश्च । सप्त हस्तासो अस्य – सप्त विभक्तयः । त्रिधा बद्धः – त्रिषु स्थानेषु बद्धः – उरसि कण्ठे शिरसीति । वृषभो

वर्षणात् । रोरवीति - शब्दं करोति । कुत एतत् ? रौतिः शब्दकर्म्मा' इत्यादि । अत्र मन्त्रे शिववाहनस्य वृषभस्यैवोपादानं नान्यस्य पश्वादेः, अपि च शिवस्यापरपर्यायस्य सुप्रसिद्धस्य महादेवस्यैव नाम ग्रहणं, नान्यदेवस्येति स्फुटं शिवतत्त्वं चकास्ति । मन्त्रममुमेव पश्यता मया सर्वप्रथमं शब्दतत्त्वस्य शिवतत्त्वस्य चाभेदो दृष्टः, तदनन्तरं चान्यत्र तत्तत्त्वमनुसंहितम् । निबन्धान्ते चैकविचारो मनसि जागरितः यो भवताम्पुरस्तादुपस्थाप्यते - शिवस्य भक्तशिरोमणेः महाकविकालिदासस्य - 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ' इतिरूपे रघुवंशस्य मङ्गलाचरणे 'इव' शब्दस्य यत्सदृशार्थकत्वम्, तत्रत्यं सादृश्यञ्च च न भेदघटितम्, अपितु साधारणधर्मसम्बन्धप्रयोज्यमेव । अथवा इवशब्दः एवार्थक इति गृहाण । तेन शब्दार्थयोः पार्वतीपरमेश्वरयोः चाभेदस्य ज्ञापने कालिदासस्यापि समर्थनमिति प्रत्येमीति प्रतिपाद्य स्फोटाभिन्नं शिवं दिध्यासामि ।

सन्दर्भाः

1. 'नित्यः शुद्धो निरञ्जनो विभुरद्वयः शिवः एकः' (त्रि.ब्रा.-1-1)
2. ''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
   अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥'' (श्वेता.उप.-4-10)
3. ''शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः ।
   शिवोऽस्म्यहं शिवः सर्वं शिवादन्यन्न किञ्चन ॥'' (वराहोपनि.4-32)
4. शान्तं शिवमद्वैतं......., स आत्मा स विज्ञेयः (माण्डु.उप.-आ.प्रक.-7)
5. ''परात्परतरो ब्रह्मा तत्परात्परतो हरिः ।
   तत्परात्परतोऽधीशस्तस्मात्स्यादुत्तरः शिवः ॥'' (सदानन्दो.-4)
6. ''रुद्राणां शङ्करश्चास्मि'' (गी.अ.-10, श्लो.-23)
   ''उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
   परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥'' (गी.अ.-13, श्लो.-22)
7. ''दृक्क्रियात्मकमैश्वर्यं यस्य तद्दात्रपूर्वकम् । ईश्वरः सोऽत्र मन्तव्यः शक्तिद्वययुतः प्रभुः ॥''
   इति । (पराख्यसूत्रस्य शतरत्नसंग्रहोद्धृतस्य व्याख्यानमेतत्)
8. ''श्रौत्रार्हन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।

तोष्टूय्यमानोऽप्यगुणो विभुर्विजयतेतराम् ।।'' (सि.कौ.उत्तरार्द्धमङ्गलाचरणम्)

9. इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ।। (सि.कौ.ग्रन्थान्तमङ्गलम्)

10. ''इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ।।'' (वै.भू.का.-74)

11. ''श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्त्तते ।।'' (वै.भू.सा.का.-1)
''अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ।।'' (पूर्ववत्, का.-2)

12. ''नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः'' (परि.शे.मङ्गलम्)
''नागेशभट्टविदुषा नत्वा साम्बं शिवं लघुः'' (वै.सि.ल.म.-मङ्गलम्)

13. ल.म.र.प्र.पृ.163

14. पा.सू.-1-2-53

15. त्देव-6-3-109

16. पा.महा.,अ.-1, पा.-1, पस्पशाह्निकम्, वा.-1

17. पा.महाभा,अ.-1, पा.-1, आ.-2, जातिपक्षाधिकरणम् ।

18. वै.सि.ल.म., र.प्रभा., पृ.-145, शक्त्याश्रयनिरूपणम् ।

19. शब्दकौस्तुभः, प्र.अ., प्र.पा., प्र.आह्निकम् ।

20. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिकासंख्या-1 ।

21. वैयाकरणभूषणसारः, ग्रन्थान्तमङ्गलम् ।

22. छान्दो.6-3-2

23. बृहदा.4-3-9

24. कठो.5-15, श्वेता.-6-14

25. मुण्डको.-2-2-10

26. प्रपञ्चसारः, पट.-1, श्लो.-431

27. वज्रसूचि.खण्डः-9

28. बृहदार.4-1-2
29. तैत्तरी.उप.-3-1
30. बृ.उप.-3-1-28
31. गी.अ.-15, श्लो.-15
32. गी.अ.-18, श्लो.-61
33. गी.अ.-10, श्लो.-23
34. माण्डु. आगमप्रक.-22
35. योगशिखोपनिषद्-1-169
36. बृहदा.-4-5-6
37. वै.भू.सा.कारिका-79
38. तै.उप.-3-1
39. तै.ब्रा.उप. 2-2-4-2
40. मनुस्मृ.-1-21
41. ऋ.वे.-1-164-46
42. तदेव-4-58-3
43. म.भा.पस्पशा.
44. वा.प.का.-131

आचार्य्यः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

सूत्रक्रमानुसारिणी व्याकरणशिक्षणपद्धतिः

✍डॉ. देवदत्त सरोदे

(व्याकरणशिक्षणपद्धतिः सूत्रक्रमानुसारिणी सूत्रानुवृत्त्यर्थं शास्त्रावगमनार्थं चोपकुरुते । पाणिनीयस्य धातुगणोणादिसूत्रलिङ्गानुशासनैः पञ्चाङ्गत्वम् । पाणिनीयस्य शास्त्रस्य व्याख्यातृषु बहूनामत्र परिचयं रचयिता प्रदर्शयतितराम् । काशिकामाथुर्याद्याः बह्व्यो वृत्तयोऽत्र निरूपिताः । प्रत्येकं वृत्तीनां वैशिष्ट्यमत्र प्रतिपिपादयिषुणा रचयित्रात्र वृत्तिकाराणां नामानि निर्दिष्टानि च । तत्र काशिकायाः परिपूर्णत्वं श्रद्धेयमेव । अपि च प्रथमावृत्तौ प्रदर्शितानामुदाहरणानां स्थालीपुलाकन्यायेन निर्देशोऽप्यत्र श्लाघनीय एव ।)

पुरा कालाद् व्याकरणशिक्षणं मुख्यत्वेन द्विधा प्रवृत्तम् । प्रथमं तावल्लक्षणप्रधानव्याकरणशिक्षणम् अथवा सूत्रानुसारिव्याकरणशिक्षणम् । द्वितीयं तावत् प्रक्रियाप्रधानव्याकरणशिक्षणम् इति । सूत्रानुसारिव्याकरणशिक्षणपद्धतौ अष्टाध्यायी, वृत्तयः, (काशिकावृत्तिः, माथुरीवृत्तिः, निर्लूरवृत्तिः, चुल्लुवृत्तिः इत्यादयः) वार्त्तिकानि महाभाष्यम् इत्यादीनि अन्तर्भवन्ति । प्रक्रियाप्रधानव्याकरणशिक्षणपद्धतौ रूपावतारः, प्रक्रियाकौमुदी, वैयाकरणसिद्धान्तकौमुदो, लघुसिद्धान्तकौमुदी । इह तावत् सूत्रानुसारिव्याकरणशिक्षणपद्धतिषु वृत्तिपद्धतिमधिकृत्य विचारः प्रस्तूयते।

अष्टाध्यायी - पाणिनिव्याकरणपरम्परा -

पाणिनेः प्राक् बहवः वैयाकरणाः समभवन् । ते नैकान् व्याकरणग्रन्थान् रचयामासुः । ततः परं तेषां नाना शालाः प्रवर्तिताः । परन्तु पाणिनेः व्याकरणस्य पुरतः एते व्याकरणग्रन्थाः निष्प्रभाः सञ्जाताः। सर्वत्र पाणिनेः यशः प्रसृतम्[1] पाणिनेः पश्चादपि अनेके वैयाकरणाः पाणिनीयमुपजीव्यैव व्याकरणग्रन्थान् रचयामासुः । अन्ये वैयाकरणाः स्वकीयं स्वतन्त्रं व्याकरणं रचितवन्तः । तथापि एतावति दीर्घे काले पाणिनिना रचितं व्याकरणं न न्यौन्यमवाप । एतच्च पाणिनीयं व्याकरणम् अष्टाध्यायी, अष्टकं पाणिनीयं शब्दानुशासनमिति शब्दैः व्यवह्रियते । एतद् व्याकरणम् अष्टसु अध्यायेषु विभक्तं तस्माद् अष्टकम् अथवा अष्टानामध्यायानां

समाहारोऽस्यामतः अष्टाध्यायी इति उच्यते । प्रत्यध्यायं चत्वारः पादाः सन्ति । सम्पूर्णे अष्टके 32 पादाः, भाष्यमते 3978 सूत्राणि सन्ति ।

पाणिनीयं सम्पूर्णं व्याकरणं तु अष्टाध्यायी, धातुपाठः, गणपाठः, उणादिकोशः, लिङ्गानुशासनम् इति पञ्चसु ग्रन्थेषु पूर्णतामाप्नोति । तस्मात् पञ्चाङ्गं व्याकरणमित्युच्यते ।

इदं व्याकरणं सूत्रबद्धं वर्तते । अष्टाध्याय्यां सूत्राणि तु लक्ष्याणि मनसि निधाय लक्ष्यसाधनाय प्रणीतानि सन्ति । परन्तु सूत्राणां क्रमविन्यासः शब्दसिद्धिप्रक्रियामाश्रित्य नास्ति । अष्टाध्यायी सूत्रे सूत्रकारेण लाघवं दृष्टं स्याद् अतः लाघवाय व्याकरणं सूत्ररूपेण प्रणीतं, परन्तु साक्षात् केवलैः सूत्रैः व्याकरणं ज्ञातुं न पारयामः, अतः तेषां व्याख्यानमपेक्षितम् । भाष्यकारोऽपि आह– 'न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते । किं तर्हि ? व्याख्यानतश्च । ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति । न केवलानि चर्चापदानि व्याख्यानं वृद्धिः, आत् ऐच् इति । किं तर्हि ? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति ।' (महा.1/1/15 वा.भा.) । एतत् व्याख्यानमेव वृत्तिः व्याख्या विवरणम् इत्येतैः पदैः व्यवहियते। पाणिनिना छात्रसुखबोधाय स्वोपज्ञवृत्तिर्विरचितेति श्रूयते परं साम्प्रतिककाले सा वृत्तिर्नोपलभ्यते ।

व्याकरणसूत्राणां सूत्रार्थबोधनाय विषयस्पष्टीकरणाय च सूत्रार्थप्रधानो ग्रन्थो वृत्तिरित्युच्यते । भाष्यकारस्तु एवमाह – का पुनर्वृत्तिः शास्त्रप्रवृत्तिः (म.भाष्य.1/1)[3]। कैयटाऽपि वृत्तिशब्दस्यामुमेवार्थम् आह – वृत्तिः शास्त्रस्य लक्ष्ये प्रवृत्तिः[4]। तदनुगतो निर्देशाऽनु- वृत्तिनिर्देशः । काव्यमीमांसायां राजशेखरस्त्वेवमाह– सूत्रार्थसकलसारविवरणं वृत्तिरिति ।

व्याकरणसूत्राणां सम्यग् अर्थप्रतिपत्तये वृत्तिर्व्याख्यानमनिवार्यम् । तथा च व्याख्यानस्य लक्षणम् –

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपाऽथ समाधानं व्याख्यानं षड्विधं मतम् [5]॥

एवं षड्भिरुपायैः साधनैः सूत्रार्थः सूत्रव्याख्यानं वा कार्यम् ।

अष्टाध्याय्याः काश्चन प्राचीनाः वृत्तयः –

वृत्तिः	**वृत्तिकारः**
स्वोपज्ञवृत्तिः	पाणिनिः
अष्टाध्यायीवृत्तिः	श्वोभूतिः
अष्टाध्यायीवृत्तिः	आचार्यकुणिः
माथुरीवृत्तिः	माथुरः
अष्टाध्यायीवृत्तिः	वररुचिः
शब्दावतारन्यासः	देवनन्दी
अष्टाध्यायीवृत्तिः	चुल्लिभट्टिः
निर्लूरवृत्तिः	निलूरः[7]

पूर्वोक्ताः वृत्तयः पतञ्जलेः महाभाष्यकारात् प्राक् विरचिताः सन्तीति पं. युधिष्ठिर–मीमांसकाः स्वीयग्रन्थे वर्णयन्ति ।

काशिकावृत्तिः –

विद्यमानासु प्राचीनासु वृत्तिषु काशिकैव कृत्स्ना परिपूर्णा विद्यते । अत्र समेषां सूत्राणां सूत्रक्रमेणैव वृत्तिः वर्तते ।

काशिकावृत्तेः स्वरूपं वैशिष्ट्यञ्च –

काशिकावृत्तेः स्वरूपं वैशिष्ट्यञ्च ग्रन्थादौ एवम् उपवर्णितं तच्च –

वृत्तौ भाष्ये तथा धातूनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः॥
इष्ट्युपसङ्ख्यानवती शुद्धगणा विवृतगूढसूत्रार्थाः ।
व्युत्पन्नरूपसिद्धिः वृत्तिरियं काशिका नाम ॥

अनेन वर्णनेन काशिकायाः अनुशीलनेन ज्ञायते यत् वस्तुतः काशिकामन्तरा सूत्रार्थबोधः दुष्करः एव भाष्याध्ययनमपि कष्टायते । परमार्थतः काशिकावृत्त्यैव व्याकरणस्य कृत्स्नस्वरूपं बुध्यते ।

काशिकावृत्तिः काशिका नाम्नाऽपि प्रसिद्धा । वर्तमाने काले प्राचीनार्वाचीनासु सर्ववृत्तिषु इयं वृत्तिः स्वगुणविशेषैः सर्वाः वृत्तीः अतिशेते । एषा वृत्तिः सूत्रक्रमानुसारिणी

विद्यते । अस्याः रचयितारौ वामनजयादित्यौ आस्ताम् । एतौ कश्मीरदेशस्थौ 700 ईस्वीये अभवताम् । अस्यां काशिकायां पूर्वासु विद्यमानासु वृत्तिषु, भाष्ये (महाभाष्ये) धातुपाठे, गणपाठे च तत्र तत्र क्षिप्तस्य व्याकरणशास्त्रस्य सारभूतं तत्त्वं सङ्गृहीतम् ।

इष्टिः – सूत्रे वार्त्तिके नोक्तस्य दृष्टस्य प्रयोगस्य शब्दस्य साधुत्वख्यापनाय वचनम् इष्यते सा इष्टिः इत्यर्थः । एताः इष्टयः महाभाष्ये तत्र तत्र उक्ताः सन्ति ।

सूत्रैः यन्न सिध्यति तदर्थं किञ्चिद् उपसङ्ख्यानं कर्तव्यं भवति । तदेव वार्त्तिकम् ।

इयं काशिकावृत्तिः इष्ट्युपसङ्ख्यानवती अपि च गणाः अत्र शुद्धाः पठिताः सन्ति । गूढसूत्रणामर्थाः विवृत्ताः स्पष्टीकृताः सन्ति । अस्यां शब्दरूपाणां सिद्धिरपि व्युत्पन्ना विद्यते । एवं गुणविशिष्टेयं काशिकावृत्तिः ।

पुरा अस्याः काशिकावृत्तिपद्धत्याः व्याकरणस्य अध्यापनं भृशं प्राचलत् । तस्माद् अस्याः प्रसिद्धानि व्याख्यानानि विवरणानि न्यासपदमञ्जर्यादीनि लोके प्रथितानि ।

न्यासः

काशिकायाः प्रसिद्धा टोका आचार्यजिनेन्द्रबुद्धिपादेन विरचिता काशिकाविवरण-पञ्जिका इति ग्रन्थः । अस्य ग्रन्थकर्तुः कालः 800 ईस्वीयः विद्यते ।

अस्य रचनाशैली सरसं सरलं महाभाष्यमिव गम्भीरमर्थपूर्णञ्च विद्यते । एतस्य ग्रन्थस्य अपरं नामधेयं 'न्यासः' वर्तते । अयं जिनेन्द्रबुद्धिः बोधोसत्त्वदेशीय आचार्यः इत्यप्यभिधोयते । सम्पूर्णायाः काशिकायाः विस्तृतं विवरणं काशिका विवरणपञ्चिकेति नाम्नाऽपि सार्थकं विद्यते।

पदमञ्जरी

काशिकायाः अपरा टीका पदमञ्जरी विद्यते । अस्या रचयिता हरदत्तमिश्रः 1200 ईस्वीये आन्ध्रप्रदेशेऽभवत् । अस्य व्याकरणज्ञानम् अनन्यसाधारणं विद्यते । पदमञ्जयां हरदत्तमिश्रः पतञ्जलिं, भर्तृहरिं, जिनेन्द्रबुद्धिं कैयटञ्च स्मरति तेषां मतानि उद्धरति ।

काशिकावृत्तिमतिरिच्य पाणिनिपरम्परामनुसरन्त्यः अनेकाः वृत्तयः विरचिताः शाब्दिकैः। ताश्च –

क्र. सं	ग्रन्थः	ग्रन्थकर्तुः
1	भागवृत्तिः	विमलमतिः 700 ईस्वीये
2	अष्टाध्यायीविवरणम्	भट्टजयन्तः 850 ईस्वीये
3	अज्ञाता(वृत्तिः)वर्धमानेन उद्धता	भर्त्रीश्वरः ईस्वीये 800 शतके
4	कुण्डली	श्रुतपालः 980 ईस्वीये
5	केशववृत्तिः	केशवः 1175 ईस्वीये
6	दुर्घटवृत्तिः	मैत्रेयरक्षितः 1175 ईस्वीये
7	इन्दुमतीवृत्तिः	इन्दुमित्रः 1180
8	भागवृत्तिः पुरुषकारः	श्रीधरः 1200
9	भाषावृत्तिः	पुरुषोत्तमदेवः 1280
10	भाषावृत्त्यर्थवृत्तिः	सष्टिधरः 1350
11	दुर्घटवृत्तिः	शरणदेवः 1275
12	पाणिनीयदीपिका	नीलकण्ठवाजपेयी 1525
13	पाणिनीयमिताक्षरा	अन्नम्भट्टः 1550
14	शब्दकौस्तुभः	भट्टोजिदीक्षितः 1575
15	शब्दकौस्तुभः	खण्डनम् पण्डितराजजगन्नाथः 1580
16	शब्दकौस्तुभविंशपदी	नागेशः 1600
17	शब्दकौस्तुभप्रभा	वैद्यनाथपायगुण्डे
18	शब्दकौस्तुभविद्योतः	वैद्यनाथशुक्ला
19	शब्दकौस्तुभप्रभा	राघवेन्द्राचार्यः
20	शब्दकौस्तुभभावप्रदीपः	कृष्णमित्रः
21	शब्दकौस्तुभदूषणम्	भास्करदीक्षितः
22	पाणिनीयसूत्रप्रकाशः	अप्पयदीक्षितः 1625
23	व्याकरणसिद्धान्तसुधानिधिः	विश्ववारासूरी 1570

24	शाब्दिकचिन्तामणी	गेपालकृष्णशास्त्रो 1700
25	व्याकरणदीपिका	ओरम्भट्टः
26	अष्टाध्यायीभाष्यम्	स्वामी दयानन्दसरस्वती 1824-1883
27	अष्टाध्यायीप्रदीपः	नारायणसुधो
28	अष्टाध्यायीप्रदीपवृत्तिः	रुद्रधरः
29	मित्रवृत्त्यर्थसङ्ग्रहः	उदयनः
30	वृत्तिसङ्ग्रहः	रामचन्द्रः
31	अष्टाध्यायी तत्त्वदीपिका	अज्ञातकर्तृका जोधपुरग्रन्थागारे
32	पाणिनीयलघुवृत्तिः	अज्ञातकर्तृका तिरुवनन्तपुरस्यपुस्तकालये
33	पाणिनीयलघुविवृत्तिः	अज्ञातकर्तृका मैसूरसर्वकारपुस्तकालये
34	पाणिनीयसूत्रवृत्तिटिप्पणी	अज्ञातकर्तृका मद्राससर्वकारीयपुस्तकालये
35	पाणिनीयसूत्रवृत्तिः	अज्ञातकर्तृका मद्राससर्वकारीयपुस्तकालये

एताः वृत्तीः अतिरिच्य हिन्दीभाषायां, आङ्ग्लभाषायां अष्टाध्याय्याः वृत्तयः रचिताः सन्ति ।

प्रथमावृत्तिः -

सूत्रार्थप्रधानो ग्रन्थो वृत्तिरिति उक्तम् ।

वृत्तिः, व्याख्यानम्, समानार्थकौ अपि च व्याख्यानस्य लक्षणमेवमाहुः-

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपाऽथ समाधानं व्याख्यानं षड्विधं मतम् [६] **॥**

सूत्रार्थसम्पादनाय आदौ सूत्रस्थपदानां विच्छेदः कार्यः । ततः परं पदानाम् अर्थो वक्तव्यः । सूत्रस्थसमस्तपदानां समासविग्रहः कर्तव्यः । ततः परं सूत्रस्थपदानां अनुवृत्तिपदानां च सार्थकपदयोजनामथवा अन्वयं कुर्यात् । अत्रैव सति सन्देहे पूर्वपक्षम् उपस्थाप्य समाधानं विदध्यात् ।

अनेन क्रमेण अष्टाध्याय्याः सूत्रणामर्थः क्रियते चेत् सूत्रार्थो बोधगम्यो जायते । अमुमेव पन्थानम् अनुसरन् पण्डितब्रह्मदत्तजिज्ञासुः महोदयः (1965) अष्टाध्याय्याः प्रथमावृत्तिनाम्नीं एकां विशिष्टां वृत्तिं व्यरचयत् । ब्रह्मदत्तमहाभागाः यदा दिवङ्गताः तदा एषा वृत्तिः तृतीयाध्यायपर्यन्ता सम्पन्ना आसीत् । शिष्टानाम् अध्यायानां वृत्तिं तेषाम् अन्तेवासिनी पण्डिता प्रज्ञा पूर्णतां प्रापयत् ।

विद्यमानायां काशिकावृत्तौ किमर्थमयमभिनवारम्भः ? अष्टाध्यायी तस्याः वृत्तिः काशिका, तस्याः भाष्यं महाभाष्यमेतत् त्रितयं कात्स्न्यं व्याकरणं द्योतयति । व्याकरणाध्ययनसन्दर्भे अष्टाध्याय्याः कण्ठस्थीकरणात् परं साक्षात् काशिकावृत्तेरध्ययनं दुष्करम्, अतः अष्टककण्ठस्थीकरणात् परं काशिकाध्ययनात् प्राग् विषयसुखबोधाय काचित् सरला प्राथमिकी वृत्तिः स्यात्, यत्र उक्तव्याख्यालक्षणानुसारं प्रतिसूत्रं सूत्रस्थपदानां पदच्छेदं विधाय, विभक्तिनिर्देशं कृत्वा सामासिकपदानां सम्यक् विग्रहं कृत्वा, अनुवृत्तिपदानि आहृत्य सार्थकवाक्ययोजनां विधाय सूत्रार्थः सम्पादनीयः । ततः परं सूत्रप्रयोजनानि अथवा सूत्रसम्बद्धानि उदाहरणानि प्रदाय तेषां सिद्धिः कार्या । काशिकावृत्तौ विभक्तिनिर्देशो न दृश्यते। सामासिकपदानां विग्रहोऽपि क्वाचित्कः एव, अनुवृत्तिनिर्देशोऽपि स्पष्टतया न लक्ष्यते। किञ्च सूत्रार्थः उदाहरणेषु कथं चरितार्थ इति संसिद्धिर्न दर्शितः । प्रत्युदाहरणानि, किञ्च क्वचिद् प्रौढविषयोपस्थानात् प्राथमिकस्तरे छात्राः कष्टमनुभवन्ति । अतः एतत् कष्टं परिहर्तुं प्राथमिकस्तरे व्याकरणे छात्राणां प्रवेशः सुकरः स्यात् । तदर्थमेषा प्रथमावृत्तिः विरचिता । प्रथमावृत्तिः अष्टाध्यायीसूत्रक्रमानुसारिणी विद्यते । अत्र आदौ सूत्रं, तस्याधः सूत्रस्थपदानां विच्छेदः, विभक्तिनिर्देशश्च कृतः । ततः परं समस्तपदानां समासविग्रहः विहितः । यदि उपरिष्टाद् अनुवृत्तिः अनुवर्तते तर्हि अनुवृत्तिः उल्लिखिता । पश्चात् पदानां सार्थकमन्वयं कृत्वा सूत्रार्थः कृतः। ततः परं सूत्रप्रयोजनसम्बन्धोनि उदाहरणानि तेषामर्थश्च दत्तः । हिन्दीभाषायां सूत्रार्थः प्रदत्तः । सूत्रेदाहरणानां सिद्धयः परिशिष्टे प्रदर्शिताः सन्ति ।

यद्यपि काशिकायाः प्रागपि बह्व्यः वृत्तयः प्रचलिताः आसन् । एतस्याः पश्चादपि बह्व्यः वृत्तयः विरचिताः सन्ति । ताः सर्वाः वृत्तयः सूत्रार्थस्पष्टीकरणाय तथा सरलीकृताः नासन्, यथा एषा प्रथमावृत्तिः विद्यते । यत्र सर्वेषां सूत्राणां वृत्तिः सरलया गिरा उपन्यस्ता, प्रतिसूत्रमुदाहरणानि दत्तानि, तेषां सिद्धयोऽपि, परिशिष्टे दत्ताः तद्यथा–

रलो व्युपधाद्धलादेः संश्च (अष्टा.१.२.२६)

पदच्छेदः विभक्तिश्च - रलः 5/1, व्युपधात्ह् 5/1, हलादेः 5/1, सन् 1/1, च अव्ययपदम्।

समासः - उश्च इश्च वी (इको यणचि 6/1/74) इत्यनेन यणादेशः । वी उपधे

यस्य स व्युपधः तस्मात् -- द्वन्द्वगर्भो बहुव्रीहिः । हल् आदिर्यस्य स हलादिः, तस्मात् - बहुव्रीहिः ।

अनुवृत्तिः - वा, क्त्वा, न, सेट्, कित् ।

अर्थः - उकारोपधाद् इकारोपधाच्च रलन्ताद्धलादेः धातोः परः सेट् सन्, सेट् क्तवा च वा कितौ न भवतः ।

उदाहरणानि - द्युतित्वा द्योतित्वा । लिखित्वा लेखित्वा । दिद्युतिषते दिद्योतिषते । लिलिखिषति लिलेखिषति ।

प्रथमावृत्तिपठनेन कृत्स्नं व्याकरणमधिगतं भवति। व्याकरणसम्बद्धं शङ्कासमाधानं काशिकायां महाभाष्ये च विस्तरेण विजृम्भितम् । अतः तदेतत् सर्वमिह परित्यक्तम् । आदौ मूलविषयस्य कृत्स्नसम्बोधः स्यात्, तदर्थः अयं यत्नः । प्रथमावृत्तेः सम्यगध्ययनेन काशिकामहाभाष्ये सुविदिते भवतः । प्रथमावृत्तिं विना साक्षात् काशिकापठनं महाभाष्याध्ययनं वा सर्वथा दुष्करं दुरूहं गौरवञ्च भवति । अस्यां वृत्तौ क्वचिदपेक्षितपूर्वपक्षस्य समाधानमपि विहितम् । वस्तुतः प्रथमावृत्तिः महती सुविहिता इति वक्तव्यम् । लोके सर्वेषु क्षेत्रेषु मूलतत्त्वान्वेषणे नियमान्वेषणे सिद्धान्तप्रतिपादने सामान्यत्वसम्पादने वा आदौ भिन्नानि उदाहरणानि विशिष्टाः विषयाः पदार्थाः वा द्रव्याणि वा सूक्ष्मेक्षिकया परिशील्यन्ते । अत्र विशेषेभ्यो भिन्नेभ्यः सामान्यं प्रतिगम्यते । ततः परं तेषु विद्यमानं सामान्यमादाय कञ्चन नियमं कल्पयन्ति । एष नियमः सर्वेषु भिन्नेषु विषयेषु सामान्यतत्त्वं भवति । अतः सर्वत्र अस्य व्याप्तिर्भवति । एष विधिः आधुनिकशिक्षाक्षेत्रे आगमनविधिरिति उच्यते । पाणिनिना लोके विद्यमानानि भिन्नानि पदानि परिशील्य तेषु सामान्यत्वं समाश्रित्य सूत्राणि प्रणीतानि । अतः आगमनविधिना शास्त्रप्रणयनं, ततः परं प्रणीतस्य शास्त्रस्य प्रवचनं स्पष्टीकरणं, सामान्येभ्यो नियमेभ्यो विशिष्टोदाहरणानि प्रति भवन्ति । विशिष्टोदाहरणेषु सामान्यभूतस्य नियमस्य व्याप्तिः प्रदश्यंते । अतः वृत्तिपद्धतिः अथवा अष्टाध्यायीपद्धतिः- वैज्ञानिकी पद्धतिः भवति । यतः सूत्रकारः पाणिनिः आगमनविधिना शास्त्रं रचयामास । पुनः तस्य शिक्षणं, स्पष्टीकरणं वा

निगमनविधिना भवति चेत् अल्पेन आयासेन शास्त्रं स्वायत्तं भवति । लोकेऽपि सर्वाणि शास्त्रणि अनेन विधिना पाठ्यन्ते तत्परिणामश्च प्रसिद्धः ।

उपसंहारः

व्याकरणमध्येतुं सर्वोत्तमविधिरेषः, अत एव व्याकरणं शिक्षयितुं नैकाः वृत्तयः विरचिताः । प्रथमस्तरे वृत्तौ तु - पदच्छेदः, समासविग्रहः, अनुवृत्तिः, सूत्रार्थः, उदाहरणानि, रूपसिद्धयः इत्येतावत् स्यात् । द्वितीयस्तरे वृत्तौ तु - प्रत्युदाहरणानि, शङ्कासमाधानं, गूढविषयविवरणं च स्यात् । काशिका द्वितीयस्तरीयवर्त्तिः प्रतिभाति । अत एव पं. ब्रह्मदत्त-जिज्ञासुना प्रथमस्तरीयवृत्तिः = प्रथमावृत्तिः विरचिता । इयं पद्धतिः क्रमिका, परिपूर्णा, कृत्स्नव्याकरणशिक्षणाय सर्वेभ्यः उपादेयपूर्णा विद्यतेऽनया पद्धत्यैव व्याकरणस्य संरक्षणं प्रसारः संक्रान्तिश्च जायते । अपि च अतिप्राचीनकालाद् आरभ्य अद्यावधि व्याकरणशिक्षणे एषा वृत्तिपद्धतिः समादृता वर्तते अनुवर्तते च । किञ्च अनया पद्धत्या कृत्स्नशास्त्रं परिरक्षितं भवति।

सन्दर्भाः

1. आकुमारं यशः पाणिनेः
2. हरदत्तः पदमञ्जरी - (पृ.1.काशिका) ।
3. समर्थः पदविधिः - इति सूत्रे भाष्यकारः परार्थाभिधानं वृत्तिः इत्याह ।
4. म. भाष्य. द्वितीयाह्निकं अइउण् ।
5. महा. भाष्य. 2.1.1।
6. भाषावृत्तिः -पृ. 16 ।।
7. वृत्तिः - पाणिनीयसूत्राणां विवरणं चुल्लिभट्टिनिर्लूरादिविरचितम् । (न्यासः भाग 1. पृष्ठ 9)।

अनुशीलितग्रन्थाः

1. वाक्यपदीयम्, पण्डित चारुदेवशास्त्रो, मोतीलालबनारसीदास, 1996 दिल्ली ।

2. अष्टाध्यायो, सम्पादकः ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट रेवली, 1998, हरियाणा ।
3. संस्कृतव्याकरणशास्त्र का इतिहास, लेखकः पं. युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट रेवली, 1992 हरियाणा ।
4. प्रथमावृत्तिः, लेखकः- ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट रेवली, 1990, हरियाणा ।
5. काशिका, सम्पादकः आचार्यविजयपालविद्यावारिधि, रामलाल कपूर ट्रस्ट रेवली, 1997, हरियाणा ।
6. पाणिनीयव्याकरणमहाभाष्यम्, भार्गव शास्त्रो, चौखम्बा संस्कृत प्रतिष्ठान, 1987, दिल्ली ।
7. पाणिनिकालीन भारतवर्ष, वासुदेवशरण अग्रवाल, चौखम्बा विद्याभवन, 1996, वाराणसी ।

सहायकाचार्य्यः (शिक्षाविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

भारतीयसंविधानस्य मूलाऽवधारणानां विश्लेषणं समालोचनञ्च

✍डॉ. वी. एस्. वी. भास्कररेड्डी

(न्यायस्वातन्त्र्यसमत्वगरिमाबन्धुत्वैकताऽखण्डतेतिसप्तसिद्धान्तानां मूलावधारणानां विश्लेषणं समालोचनं च रचयिताऽत्र विदधाति । व्यक्तेः गरिमा, जनानां मध्ये बन्धुता, राष्ट्रस्य एकता अखण्डता च रचयित्रा चर्चिताः विषयाः। वर्तमानभारते अभिव्यक्तिस्वतन्त्रता नष्टा, यथा लोकतान्त्रिकप्रकटने कृते सति, जनानामुपरि परिहासः, अपमानम्, आक्रमणम्, हननं च विधीयन्ते इति रचयितुरभिप्रायः। बहुमतजनानां राजनैतिकन्यायः मरीचिकैव भवति ।)

एवमेव सनातनकालादारभ्य केषाञ्चन भारतोयानां जीवने स्मृत्यादिसंहिताग्रन्थेषु उल्लिखितस्य सर्वप्रकारकशोषणात् मुक्तिः प्रदास्यते । भारते लोकतान्त्रिकसमाजवादस्य क्रियान्वयनं क्रियते, अस्यैव परिणामात्मकसमाजवाद इत्युच्यते, अयं गान्धेयवादमार्क्सवादयोः सम्मिश्रितो वादो भवति ।

धर्मनिरपेक्षः

धर्मनिरपेक्षस्य मौलिकार्थो भवति यत् – राजनैतिककार्यकलापेभ्यो धर्मस्य पृथक्करणं भवति, राष्ट्रं तु धर्मसहितमेव भवति, न तु धर्मरहितराष्ट्रम् । अर्थात् राजनैतिकप्राशासनिकादि जनशासनव्यवहारेषु धार्मिकनियमानाम् अनुष्ठानानाम् अनुपालनं नैव क्रियते । धार्मिककार्यकालापाः प्रत्येकं व्यक्तः व्यक्तिगतविचाराः विश्वासाश्च भवन्ति । व्यक्तिगतविचाराः सर्वेषामुपरि नैव आरोप्यन्ते अनुप्रयुज्यते च इति । एवमेव धार्मिककार्यकलापेषु सर्वकारः नैव हस्तक्षेपं करोति, यतः ते व्यक्तिगतविचारविश्वासादयः भवन्ति । भारतराष्ट्रस्य कोऽपि औपचारिकधर्मो (राष्ट्र-धर्मः) न भवति, यः धर्मः सर्वैः नागरिकः अवश्यम् अनुपालनीय इति नियमः अधिनियमो वा नैव निर्मीयते । अर्थात् धार्मिकस्वातन्त्र्यं प्रदास्यते, धर्माधारेण नैव भदभावाः, कस्यचिदपि विशिष्टसौविध्यं प्रावधानं हितम् अवसराश्च नैव परिकल्प्यन्ते । भारते अस्तित्वे आचरणे प्रचलने वा विद्यामानस्य कस्यचिदपि धर्मस्य वैशिष्ट्यम् नैव प्रदीयते । सर्वेषां धर्माणां प्रति निष्पाक्षिकतया च

व्यवह्रियते, प्रत्येकं धर्मस्य समस्वातन्त्र्यं सम्मानं रक्षा च प्रदीयते । कस्यचिदपि धर्मस्य विरोधो नैव क्रियते, सर्वधर्माणां प्रति समभावः प्रदर्शयते । धर्मनिरेपक्षस्य इतोपि अतिमहत्वपूर्ण आशयश्च वर्तते यत् – भारते निवसमानाः नागरिकाः अस्तित्वे विद्यमानस्य कमपि धर्मम् अवश्यम् अनुपालयेयुः इति नियमोपि नैव वर्तते, यदि ते नागरिका अभिलषन्ति चेत् नास्तिकवादस्य / हेतुवादस्य / विज्ञानवादस्य अनुकरणाय अवसराः प्रकल्प्यन्ते, तेषां सम्मानं सुरक्षा च प्रदास्यते इति ।

लोकतान्त्रिकः

लोकतन्त्रशब्दस्य मौलिकार्थो भवति यत् – जनशासनं भवति अर्थात् जनानां हस्तैव सर्वोच्चशक्तिः निहिता भवतीति । भारते जन-प्रातिनिध्य-लोकतन्त्रम् अस्तित्वे वर्तत । भारतराष्ट्रे निवसमानानां नागरिकानां समानाः राजनैतिकाऽधिकाराः (वयस्क-मताधिकारादयः) प्रकल्प्यन्ते । वयस्क-मताधिकाराणां प्रदाने कुत्रचिदपि केनचिदपि कारणेन भेदभावाः पूर्वाग्रहाः स्मृत्यादि संहिताग्रन्थाः नैव अनुपाल्यन्ते । निर्वाचनेन जनाः तेषां प्रतिनिधेः चयनं कर्तुमवसराः प्रकल्प्यन्ते । जन-प्रतिनिधः चयनावसरे वंशवादस्य परिवारवादस्य राजतन्त्रवादस्य अधिनायकवादस्य निरङ्कुशवादस्य च अनुपालनं लेशमात्रमपि नैव क्रियते । अर्थात् अङ्ग-धान-जात्यादिबलस्य प्राधान्यं नैव प्रदीयत इति । जनप्रतिनिधिभिः निर्मितानां सभासु सदनेषु वा पारितानाम् अधिनियमानाम् अध्यादेशानाञ्चानुसारमेव शासनं क्रियते, अधिनियमादि रहितायाः कस्या अभिक्रियायाः वैधता नैव भवति । लोकतन्त्रशासनं नाम जनानां स्वशासनं भवति, स्वशासने जनाः मुक्ततया विविधकार्यक्रमेषु भागग्रहणं कुर्तुं शक्नुवन्ति । जनैः निर्वाचितः सर्वकारः जनानां पति प्रत्येकं पदे दायित्वकारि भवति । जनैः निर्वाचितः सर्वकारः केवलं निर्दिष्टकालं यावदेव प्रशासनं करोति, न तु स्थायीरूपेण प्रशासनं करोति । निर्दिष्टकालात्परं वयस्कमताधिकारेति मानदण्डाधारेण पुनः निर्वाचनं सम्पाद्यते । निर्वाचनेन जनाः तेषां प्रतिनिधीनां परिवर्तनञ्च कर्तुमर्हन्ति । निर्वाचने प्रतिनिधोनां तिरस्करणाय (Right to Reject/NOT) च अधिकारः प्रकल्प्यते । जनप्रतिनिधीनां प्रत्याह्वानाय (Right to Recall) च अवसराः प्रकल्प्यन्ते, परन्तु भारते प्रावधानमिदमस्तित्वे नास्ति ।

गणतन्त्रम्

गणतन्त्रराज्यस्य मौलिकार्थो भवति यत् – गणशब्दस्यार्थो जनाः, तन्त्रं नाम शासनं भवति, अर्थात् जनशासनस्य गणतन्त्रमित्यभिधीयते, न तु राजशासनस्य । निर्वाचनेन एव भारतराष्ट्र प्रथमनागरिकस्य चयनं क्रियत इति । भारतराष्ट्रप्रथमनागरिकस्य चयनावसरे मनुस्मृति-खुर आन-बाईबिल् . . . इत्यादि धार्मिकसंहिताग्रन्थानां न वा अनुसरणं क्रियते, न च वंशवादस्य पारिवारिकवादस्य जातिवादस्य साम्राज्यवादस्य अनुपालनं क्रियते । वंशवादस्य अधिकाराः कस्यचिदपि न भवन्ति । भारते जन्मप्राप्तः कोऽपि व्यक्तिविशेषः, भारतीयनागिरकत्वप्राप्तः व्यक्तिविशेषश्च राष्ट्रपतिपदम् अलङ्कर्तुं योग्यो भवति, परन्तु निर्वाचनेन चितो भवेत् । भारते राष्ट्रपतेः चयनं परोक्षनिवार्चनेन क्रियते, न तु प्रत्यक्षनिर्वाचनेन। निर्वाचनेन चितः व्यक्तिविशेषः निर्दिष्टकालं यावदेव राष्ट्रपतिपदम् अलङ्कर्तुमर्हति, न तु स्थायीरूपेण । यदि पुनः अलङ्कर्तुमिच्छिति चेत् पुनः निर्वाचितो भवितव्यो भवति । निर्दिष्टः व्यक्तिविशेषः कतिवारं राष्ट्रपतिपदमलङ्कर्तुं योग्य भवेदिति नियमो नास्ति साम्प्रतिकभारते, यो नियमो विदेशेषु प्रचलने अस्तित्वे वा वर्तते ।

उद्देशिकायाः सिद्धान्ताः

उद्देशिकायाः सिद्धान्तेषु निर्दिष्टतत्वानामाधारेण भारते निवसमानानां नागरिकानां जीवनाय विकासाय कीदृशप्राकारकप्रावधानानि सौविध्यानि सामाजिकपरिस्थितय अवसराश्च प्रकल्पकामाः सन्तीति ज्ञायते । ते च सिद्धान्ताः यथा – 1. न्यायः 2. स्वतन्त्रता 3. समता 4. गरिमा 5. बन्धुता 6. एकता 7. अखण्डता च इति । क्रमश एकैकस्य सिद्धान्तस्य विश्लेषणमधः प्रस्तूयते । यथा –

न्यायः

भारतीयसंविधानस्योद्दशिकायां प्रोक्तसिद्धान्तेषु अन्यतमो सिद्धान्तो भवति न्यायः । भारते असमानता-भेदभावादिरहितस्य आदर्शसमाजस्य निर्माणाय प्रथमसोपानं भवति न्यायः । अयं प्रत्येकं नागरिकस्य मौलिकाऽधिकारो भवति । न्यायाय अवसरा अप्राप्ते सति न्यायालयस्य शरणाय पत्येकं भारतीयस्याधिकारो भवति । अस्य प्रकारत्रयं निर्दिष्टं वर्तते उद्देशिकायाम् । ते

च यथा – सामाजिकन्यायः, आर्थिकन्यायः राजनैतिकन्यायश्चेति । क्रमशः त्रयाणां विश्लेषणमधोप्रस्तूयते यथा -

सामाजिक-न्यायः

सामाजिक-न्यायेति शब्दस्य मौलिकार्थो भवति यत् – भारते निवसमानानां सर्वेषां जनानां नागरिकाणां शिशूनां बालकानां वा च जीवनस्थ प्रत्यकं पदे जीवनाय विकासाय समाजिकोन्नत्यै च समानाऽवसराः प्रकल्प्यन्ते । अर्थात् सामाजिकजीवने सर्वैस्सह समस्तरत्वं प्राप्तुं सर्वेषां समावसराः प्रकल्प्यन्त इति । सामाजिकजीवने सामाजिकोन्नत्य समस्तरत्वाय च जनानां जन्मस्थान-लिङ्ग-वर्ण-वंश-जात्यादीनामाधारेण नैव भेदभावाः प्रकल्प्यन्ते । अर्थात् जनानां जन्मस्थान-लिङ्ग-वर्ण-वंश-जात्यादि पृष्टभूमेः निरपेक्षम् अवसराः प्रकल्प्यन्त इति, सामाजिक-वैषम्यानां निर्मूलनञ्च क्रियते । एवमेव सनातनकालादारभ्य विशिष्य वैदिककालादारभ्य भारतीयसामाजिकजीवनपरिदृश्ये सरलतया दृश्यमानस्य सामाजिकवञ्जनस्य अस्पृश्यतायाश्च निर्मूलनं क्रियते, सर्वप्रकारक-शोषणात् मुक्तिश्च प्रदास्यते, सामाजिकतया वञ्चितानां जनानां अभ्युन्नत्यर्थञ्च प्रयासाः विधोयन्ते । अर्थात् अग्रिमवर्णीयाणां जनानां वैविध्यतमेभ्य अत्याचारेभ्योः दमन-शमन-शोषण-पीडन-लुण्ठन-वञ्चनादि दुःपरिदृश्येभ्यश्च मुक्तिः प्रदास्यते, वंश-वर्ण-वर्गादीनामाधारितानाम् उपाधिनाञ्च समापनञ्च क्रियते ।

आर्थिक-न्यायः

आर्थिक-न्यायेति शब्दस्य मौलिकार्थो भवति यत् – भारते उपलभ्यमानानां संसाधनानाम् उत्पादनस्य सम्पत्तेश्च विकेन्द्रोकरणं कृत्वा आजीविकायै प्रत्येकं भारतीयाय पर्याप्तावसराः प्रकल्प्यन्त इति । अर्थात् संसाधानानि सम्पत्तिः उत्पादनादिकं केवलं केषाञ्चन जनानामेव हस्तैव संस्थाप्य केन्द्रीकरणं नैव क्रियते, अनेन बहुमतानां जनानां जीवने विकासाय अवसराः परिस्थितयश्च परिकल्प्यन्ते, जीवानाय आनुकूल्यपरिस्थितीनां परिकल्पनमेव आर्थिकन्यायो भवति । एवमेव राष्ट्रिय आयस्य सम्पत्तेः संसाधनानाम् उत्पानस्य च समवितरणञ्च क्रियते। अर्थात् राष्ट्रिय-आयः सम्पत्तिः नाम सर्वेषां भारतीयानां भवति, न तु केवलं केषाञ्चन धनिकानां सम्पत्तिर्भवति । निर्धनतायाः निर्मूलनं कृत्वा जनानां बुभुक्षा-पिपासा-आवास-वस्त्रादि प्राथमिकावश्यकतानां प्रपूरणे योग्यवातावरणं निर्मीयते ।

राष्ट्रिय-आयस्य सम्पत्तेः संसाधानानाम् उत्पादनस्य च मूल्यं सर्वेषां भारतीयानां न्यायोचितरीत्या समवितरणं सम्पाद्यते । भारतीयसामाजिकजीवने नागरिकाणाम् आयस्य सम्पत्तेः आर्थिकस्तरस्य चाधारेण नैव भेदभावाः प्रकल्प्यन्ते, सः धनिको वा भवतु दरिद्रो वा भवतु सर्वैस्सह समप्रकारत्वेनैव व्यवह्रियते। अर्थात् सनातनकालादारभ्य विशिष्य वैदिककालादारभ्य भारतीयसमाजे प्रचलमानस्याः धनमूलमिदं जगत् इति प्रथाया अनुपालनं नैव क्रियत इति ।

राजनैतिक-न्यायः

राजनैतिक-न्यायेति शब्दस्य मौलिकार्थो भवति यत् – जनानां जन्मस्थान-लिङ्ग-वर्ण-वर्ग-वंश-जाति-धर्म-क्षेत्र-भाषादि निरपेक्षं सर्वेषां भारतीयानां राजनैतिक-प्रक्रियायां भागग्रहणाय समानाः मुक्ताः समुचिताश्च अवसराः प्रकल्प्यन्ते । अर्थात् कीदृशमपि भेदभावं विना सर्वेषां जनानां समानाः राजनैतिकाधिकाराः प्रदास्यन्त इति । तदनुसारमव सर्वेषां नागरिकाणां वयस्क-मताऽधिकाराः, निर्वाचनादिषु जनप्रतिनिधिः भवितुञ्चावसराः प्रकल्प्यन्ते । अर्थात् प्रत्येकं भारतीयः जनसेवको भवितुमवसराः मार्गञ्च निर्मीयते । स्वेच्छानुसारं नूतनतया राजनैतिकदलस्य संस्थापनाय, संस्थापितेष राजनैतिकदलेषु सदस्यत्वस्वीकरणाय चावसराः प्रकल्प्यन्ते । लोकतान्त्रिकप्रथानुसारं विविधकार्यक्रमेषु दलीय-कार्यक्रमेषु च अधिकारयुक्तया मुक्ततया च भागग्रहणाय अवसराः प्रकल्प्यन्ते । एवमेव सर्वकारीयपदमलङ्कर्तुं सर्वकारीय-कार्यक्रमाणां समालोचनाय सर्वकारं प्रति विज्ञापनाय च अवसराः प्रकल्प्यन्ते ।

स्वतन्त्रता

भारतीयसंविधानस्योद्दशिकायां प्रोक्त-सिद्धान्तेषु अन्यतमो सिद्धान्तो भवति स्वतन्त्रता । भारतीयसमाजे दास-परतन्त्रजीवनादिपरिस्थितीः निर्मूल्य जनानाम् अभिलाषा-आकांक्षा-आवश्यकता-इच्छादीनामनुसारं जीवनयापनाय द्वितीयसोपानं भवति स्वतन्त्रता । अयमपि प्रत्येकं नागरिकस्य मौलिकाऽधिकारो भवति । स्वतन्त्रतायै अवसरा अप्राप्ते सति न्यायालयस्य शरणाय प्रत्येकं भारतीयस्याधिकारो भवति। उद्देशिकायामस्याः पञ्चप्रकाराः निर्दिष्टाः सन्ति । ताश्च यथा – 1. वैचारिकस्वतन्त्रता, 2. अभिव्यक्तिस्वतन्त्रता, 3.

विश्वासस्वतन्त्रता, 4. धार्मिकस्वतन्त्रता, 5. उपासनास्वतन्त्रता चेति । क्रमशः पञ्चप्रकाराणां विश्लेषणमधोप्रस्तूयते यथा –

वैचारिकस्वतन्त्रता

सृष्टेः उत्पतेराभ्य वर्तमानकालं यावत् सम्भूतानां विविधतथ्यानां सत्यानां घटनानां कल्पनानां जोवनविधोनां शैलीनां वा सभ्यतानां संस्कृतीनां विविधप्रकारकज्ञानस्य विज्ञानस्य सूचनानां सौविध्यानाम् अवसराणाम् अधिकाराणां व्यवसायानां वृत्तीनां वा अत्याचाराणां दुरागतानां शोषणक्रियाणां विविधकलादीनामाश्रित्य चिन्तनं कर्तुं प्रत्येकं भारतीयाय अधिकाराः प्रकल्प्यन्ते । परन्तु चिन्तनमिदं लोकतन्त्रविधोः गान्धेयवादस्य चानुसारं भवेत्, न तु हिंसात्मकं विध्वंसात्मकम् अपमानजनकं भवेत् । एतादृशावसराणां प्रकल्पनेन विविधदर्शनानां प्रादुर्भावो जायते । अर्थात् एकं सत् ज्ञानिनः बहुधा वदन्तीति सत्यस्यानुपालनं क्रियते ।

अभिव्यक्तिस्वतन्त्रता

संवेदीकरणेन प्रत्यक्षीकरणेन परोक्षानुभवैः आप्तवाक्येन अन्वेषणेन च प्राप्तानुभवानां बहिः प्रकटनाय प्रत्येकं भारतीयाय अवसराः परिकल्प्यन्ते । समतायाः स्वतन्त्रतायाश्च अप्राप्ते सति, अन्याये सति, सौविध्यानाम् अवसराणाञ्च प्राप्ते सति, विविधप्रकारीत्या शोषणे सति स्वीयभावानां बाधानां समस्यानां स्थितीनाञ्च पकटनाय अवसराः प्रकल्प्यन्ते । इयमभिव्यक्तिः वैय्यक्तिकतया सामूहिकरीत्या च कर्तुं शक्यते । परन्तु अभिव्यक्तिस्तु लोकतन्त्रविधेः गान्धयवादस्य चानुसारं भवेत्, न तु हिंसात्मकी विध्वंसात्मकी अन्येषाम् असौविध्यजनकी भवेत् ।

विश्वासस्वतन्त्रता

विश्वासस्तु प्रत्येकं नागरिकस्य वैय्यक्तिकविचारो भवति । कदाचित् तेषां सामूहिकं संघठनञ्च भवितुमर्हति । जनानां संस्कृतेः सभ्यतायाः आचाराणां विचाराणाम् उत्सवानां जीवनशैलीनाम् आस्थादीनाञ्च अनुपालनं कुर्वन् अभीष्टखाद्यपादार्थानाम् उपभागं कुर्वन्, वेषभूषाणां धारणं कुर्वन् च जीवनयापनाय प्रत्येकं भारतीयाय अवसराः प्रकल्प्यन्ते, न तु प्रतिषिध्यन्ते । परन्तु एते विचाराः अन्येषां विश्वासानां अपमानजनकाः असौविध्यजनकाश्च न भवेयुः । व्यक्तिगतविश्वासोयम् अन्योषामुपरि बलादारोपणं प्रतिषिद्धं भवति ।

धार्मिकस्वतन्त्रता

प्रत्येकं भारतीयाय कमपि धार्मम् (हैन्दव-बौद्ध-जैन-सिक्ख-महम्मदीय-क्रस्तव-जोरास्ट्रियादिद) अवलम्बयितुं नावलम्बयुतञ्च, जीवने नास्तिको वैज्ञानिको हेतुवादि वा भवितुञ्च, अनभीष्टे सति धर्मपरिवर्तनाय च स्वतन्त्रता प्रदास्यते । परन्तु अन्येषां धर्मस्य पन्थस्य विचारस्य परिहासाय निन्दायै च कस्यचिदपि अधिकारो नास्ति । अर्थात् धार्मिकस्वतन्त्रता प्रत्येकं नागरिकस्य वैय्यक्तिकविचारो भवति, तथापि जनेषु धर्मनिरपेक्षभावस्य वर्धनाय अवसराः प्रकल्प्यन्त इति ।

उपासनास्वतन्त्रता

प्रत्यकं भारतीयस्य विश्वासानां पन्थानाञ्चानुसारं प्रार्थाना, अर्चना, पूजा, उत्सवानां निर्वहर्तुं तीर्थस्थलानां संदर्शनाय चावसराः प्रकल्प्यन्ते, कदाचित् सर्वकारेण अन्यप्राधिकरणेन वा नैव प्रतिषिध्यन्ते । परन्तु अन्येषामुपासनाप्रथायाः परिहासाय प्रतिबन्धाय च कस्यचिदपि अधिकाराः नैव भवन्ति ।

समता

भारतीयसंविधाानस्योद्देशिकायां प्रोक्त-सिद्धान्तेषु अन्यतमो सिद्धान्तो भवति समता । भारते समसमाजस्य निर्माणाय, केषाञ्चन जनानाम् आधिपत्यस्य निर्मूलनाय च तृतीयसोपानं भवति समता । अयमपि प्रत्येकं नागरिकस्य मौलिकाऽधिकारो भवति । समताया अवसरा अप्राप्ते सति न्यायालयस्य शरणाय प्रत्येकं भारतीयस्याधिकारो भवति । उद्देशिकायामस्याः प्रकारद्वयं निर्दिष्टमस्ति । ते च यथा – 1. प्रतिष्ठायाः समता, 2. अवसरस्य समता चेति ।

प्रतिष्ठायाः समता

प्रत्येकं नागरिकस्य सम्मानं प्रदीयते । इदं सम्मानं केवलं नागरिकत्वाधारेण भवितव्यं, न तु जनानां वंशस्य जातेः धर्मस्य क्षेत्रस्य भाषायाः लिङ्गस्य वर्णस्य वर्गस्य च पृष्टभूमेरनुसारं भवेत् । प्रत्येकं नागरिकाया समावसराः समसौविध्यानि समस्तरत्वमेव प्रदीयते, न तु कस्यचिदपि किञ्चन वैशिष्ट्यम् । प्रत्येकं भारतीयस्य स्वाभिमानस्य प्राणस्य संरक्षणाय, जीवनसौविध्यानां प्रकल्पनाय चावसराः प्रकल्प्यन्ते । प्रतिष्ठायाः विषये न वा अस्पृश्यतायाः दास्यप्रवृत्तेः सामाजिकाधिपत्यस्य चानुपालनं, न च उपाधिनां प्राधान्यं प्रदीयते ।

अवसरस्य समता

शिक्षायां नियुक्तौ विकासे सौविध्यनिर्माणे स्वतन्त्रतायाञ्च प्रत्येकं नागरिकाय पर्याप्तया समावसरा: प्रकल्प्यन्ते, अवसरप्रकल्पने जनानां वर्ण-वर्ग-लिङ्ग-जाति-धर्म-जन्मस्थान-क्षेत्र-भाषादि पृष्टभूमेराधारेण न वा भेदभावा: क्रियन्ते न च अन्यायं क्रियते। राष्ट्रियायस्य वितरणे व्यये संसाधनानाम् उपभोगे च राज्यानां प्रति समतापूर्वकं व्यवह्रियते । अवसरप्रदाने विविधप्रकारकतया शोषणं वञ्चनञ्च नैव क्रियते ।

व्यक्त: गरिमा

प्रत्येकं व्यक्तिविशेष: विलक्षण इति प्रत्यभिज्ञानं क्रियते, तस्य वैय्यक्तिकताया: प्रतिष्ठायाश्च सम्मानं क्रियते। निर्दिष्टविधोरनुसारमेव व्यवहारो भवेदिति नियमो नास्ति, परन्तु विधो: उल्लङ्घनम् अकृत्वा लोकतान्त्रिकरीत्या वैविध्यतया च जीवनयापनञ्च कर्तुमर्हत्येव । विविधकार्येषु अपराधे सति अभियोगे सति च दोषसिद्धिपर्यन्तं व्यक्त: गरिमाया: संरक्षणं क्रियते । अत्याचारेषु पीडितानां जनानां नामानि बहि: नैव प्रकटीक्रियते ।

जनानां मध्ये बन्धुता

भारतीयानां मध्ये मनो अध्यात्मकभावनानाम् ऐक्यताया: वर्धनाय प्रयासा: विधीयन्ते । धर्म: विश्वासश्च व्यक्त: वैय्यक्तिक इति भावस्य जागरणं क्रियते । जनानां पृष्टभूमौ – श्यमानानां भेदभावानां समापनं कृत्वा समताया: विकास: सम्पाद्यते । एवमेव जनानां मध्ये पारस्परिकतया जायमानेषु क्रियाकलापेषु अन्योयाश्रय: प्रकल्प्यते । अर्थात् वसुधैव-कुटुम्बकमिति भावस्य जागरणं सम्पाद्यते ।

राष्ट्रस्य एकता अखण्डता च

भारतीयनागरिकानां मध्ये बन्धुताभावस्य जागरणेन भारतराष्ट्रस्य एकताया: अखण्डतायाश्च संरक्षणं जायते । भिन्नत्वे सति एकत्वं (Unity in Diversity) भारतीयसंस्कृते: वैशिष्ट्यमिति भावनाया: वर्धनेन प्रत्येकं भारतीयस्य मानसपटले भारतीयभावनाया: जागरणं कृत्वा राष्ट्रस्य अक्षुण्णताया: संरक्षणं क्रियते । एवमेव क्षेत्रीय-

जातीय-भाषीय-धर्मीयादि भावनानां वैय्यक्तिकतया गौणीकरणाय प्रयासाः विधोयन्ते । बालकेषु नागरिकेषु देशभक्तिभावनानां विकाससम्पादनाय प्रयासाः विधोयन्त इति ।

उद्दशिकायाः समालोचनम्

वास्तविकपरिदृश्यं नकारात्मकपक्षाश्च

१. **प्रभुत्वसम्पन्नः**

भारतदेशः आभ्यन्तर-बाह्यव्यवहारेषु नीतिनिर्धारणे निर्णयस्वीकरणे च सार्वभौमः स्वतन्त्रः नास्तीति केषाञ्चन दृष्टान्तानां परिशीलनेन ज्ञायते । यथा — 1. ताष्केन्ट् सन्धौ (Tashkent Declaration 1964) भरतं हस्ताक्षरं स्वतन्त्रतया नैव कृतं, केवलं तृतीयपक्षस्य बलाधारेण कृतमिति जगद्विदितसत्यं भवति । 2. कश्मीरसमस्याः समाधानं क्रियतामिति संयुक्तराष्ट्रसंघमाश्रितं (UNO) वर्तते । 3. नागरिक-परमाणु-सन्धिष्वपि (Civilian Nuclear Agreements 2006 –*12) हस्ताक्षरेण भारतस्य प्रभुत्वसम्पन्नस्य कुठाराघातः प्रत्येकं निमेषे जायमानो वर्तते ।

२. **समाजवादः**

भारतीयसमाजस्थ विविधप्रकारकभेदभावानां वैषम्यानां दूरीकृत्य, उत्पादनस्य संसाधनस्य आयस्य र्द्वयस्य अधिकारस्य विकेन्द्रीकरणं सम्पाद्य समसमाजस्य निर्माणं क्रियत इति। केषाञ्चन दृष्टान्तानां परिशीलनेन ज्ञायते इदमपि असत्यमिति । यथा— 1. भूसीमाधिनियमस्य क्रियान्वयने समसमाजस्य संस्थापनाय प्रयासाः विहिताः परन्तु एतावता द्रव्यसीमाधिनियमः न वा निर्मितः न च क्रियान्वितो वर्तते । 2. सर्वकारः विविधक्षेत्रषु स्वीय-स्वामित्वं (सम्पूर्णतया आंशिकतया वाद्ध निजक्षेत्रेभ्यो निजव्यक्तोभ्यो वा प्रदेयमानं वर्तते, अनेन जनानां मध्ये वित्तीयवैषम्यानां वर्धने कारणं भजते । 3. भारते कस्यचन व्यक्तः गहस्य निर्माणमूल्यं सप्तराज्यानां वार्षिकायापेक्ष्या अधिकं वर्तते, देशापेक्ष्या व्यक्तिविशेषः महत्वपूर्णो जायमानो वर्तते । 4. 2014 तमे वर्षे सार्वजनिक-निर्वाचने केनचित् राजनैतिकदलेन प्रोक्तं यत् - कालाधनस्य प्रत्येकं भारतीयाय वितरणं क्रियत इति, परन्तु एतावता नैव वितरणं जातं वर्तते ।

३. धर्मनिरपेक्षः

सर्वकारः कस्यचिदिप धर्मस्य प्रोत्साहः व्यतिरेको वा भवति, न च हस्तक्षेपे करोतीति प्रोक्तम् । परन्तु केषाञ्चन दृष्टान्तानां परिशीलनेन ज्ञायते इदमपि असत्यमिति। यथा— 1. आन्धाप्रदेशराज्यसर्वाकारः तिरुमला-तिरुपतिदेवस्थानानां द्रव्यस्योपयोगे हस्तक्षेपं करोति, स्वयमुपयोगमपि कुर्वन् वर्तते, उत्पादित-मोदकानां संख्याधारेण कर-संङ्ग्रहणञ्च क्रियते । 2. जनानां आहार-विहार-वेषभूषादिषु कथं भवेत् कथं न भवेदिति सर्वकार एव निर्णयं स्वीकुर्वन् वर्तते । 3. हेतुवादिनां हननाय प्रयासाः वर्तमाने प्रचलमानाः सन्त्यपि सर्वकारः मौनं वहति ।

४. लोकतान्त्रिकः

भारतं लोकतान्त्रिकराष्ट्रं (जनैः निर्वाचितः) न भवतीति केषाञ्चन दृष्टान्तानां परिशीलनेन ज्ञायते । यथा— 1. जनैः निर्वाचितं शासनमुत्ययुक्त 51 : मतात्मकं भवेत्, परन्तु वास्तविकतया कस्यचिदपि तावत्प्रतिशतं कस्यचिदपि नैव मिलत्येव । 2. आन्ध्रप्रदेशस्थ तिरुमलायाम् एतावता (1952 तः) निर्वाचनमेव नैव सम्पन्नं वर्तते । 3. उपनिर्वाचनेषु राजनैतिकदलानां सख्यताकारणेन उपनिर्वाचने प्रतियोगितैव नैव – श्यमाना वर्तते । 4. दृष्टानां भ्रष्टाचारिणां वा नेतृणां पदभ्रष्टाय (Right To Recall) अवसरा एव नैव समुपलभ्यमानाः वर्तन्ते

५. गणतन्त्रम्

भारतं गणतन्त्रराष्ट्र न भवतीति केषाञ्चन दृष्टान्तानां परिशीलनेन ज्ञायते यथा - 1.भारते प्रथमनागरिकस्य चयनं परोक्ष-निर्वाचनेन क्रियते, न तु प्रत्यक्षतया । 2. अनेन जनप्रियः नेता प्रथमनागरिको भविष्यतीति कापि प्रत्याभूति नासत्येव । 3. अवश्यं सः कस्यचन राजनैतिकदलस्य चाटुकारो भवेत् । 4. परोक्षतया निर्वाचितस्य राष्ट्रपतेः हस्ते नैव वास्तविकाऽधिकाराः विलसन्ति ।

सामाजिक-न्यायः

जातिप्रथायाः सामाजिकवञ्चनस्य च निर्मूलनं नैव विहितम् । वर्णवादः वंशवादश्च बहुत्र अस्तित्वे वर्तते । विविधप्रकारकशोषणात् दास्यजीवनाच्च आंशिकतयैव मुक्तिः दृश्यते ।

सामाजिकोन्नतये वञ्चितानां समुचितावसराः नैव प्रकल्पिताः वर्तन्ते । जनानां सामाजिकपृष्टभूमेराधारेण भेदभावाः स्वतन्त्रभारतेपि अस्तित्वे वर्तन्ते ।

आर्थिक-न्यायः

संसाधनानाम् उत्पादनस्य च निजीकरणेन, आयस्य सम्पत्तेश्च संपूर्णतया विकेन्द्रोकरणाभावेन च केवलं केषाञ्चन जनानां हस्तैव द्रव्यम् अधिकाराश्च सुरक्षिताः सन्ति, न तु सर्वेषां नागरिकाणां हस्तेषु । अनेन सर्वेषां जनानाम् आजीविकायै पर्याप्तावसरा एव नैव समुपलभ्यते । समाजे वित्तीयवैषम्यानां कुप्रादुर्भावो जायमानो वर्तते, तदाधारेणैव सम्मानप्रदानं भेदभावाश्च स्वतन्त्रभारते दृश्यते ।

राजनैतिक-न्यायः

वयस्क-मताधिकारस्तु प्रदत्तः, परन्तु पक्षपातभावेन मतदानसूच्यां नाम कर्तनं कारयन्ति। मतदाने अवैधविधिश्च प्रयुज्यते । राजनीत्यां वंशवादश्च दृश्यते । अनेन बहुमतजनानां राजनैतिक-न्यायः मरीचिकैव भवति ।

वैचारिकस्वतन्त्रता

वर्तमानसमाजे सम्भूतानां विविधतथ्यानां सत्यानां घटनानां कल्पनानां जीवनविधोनां शैलीनां वा सभ्यतानां संस्कृतीनां विविधप्रकारकज्ञानस्य विज्ञानस्य सूचनानां सौविध्यानाम् अवसराणाम् अधिकाराणां व्यवसायानां वृत्तीनां वा अत्याचाराणां दुरागतानां शोषणक्रियाणां विविधकलादीनामाश्रित्य संवेदीकरण-प्रत्यक्षीकरण-परोक्षानुभव-आप्तवाक्य-अन्वेषणादिभिः प्राप्तानुभवानाधारेण चिन्तनाय सर्वेषाम् पर्याप्तावसराः नैव प्राप्यन्ते ।

अभिव्यक्तिस्वतन्त्रता

समतायाः स्वतन्त्रतायाश्च अप्राप्ते सति, अन्याये सति, सौविध्यानाम् अवसराणाञ्च प्राप्ते सति, विविधप्रकारीत्या शोषणे सति स्वीयभावानां बाधानां समस्यानां स्थितीनाञ्च लोकतान्त्रिकविधरनुसारं प्रकटने (मौखिकतया पुस्तकरूपेण वा) सति तेषां जनानामुपरि परिहासः अपमानम् आक्रमणं हननञ्च वर्तमानभारते दृश्यते ।

विश्वासस्वतन्त्रता

अन्येषां सभ्यतायाः संस्कृतेः जीवनशैलीनां वेषभूषाणां विचाराणाम् आचाराणां खाद्यशैलीनाञ्च परिहासः क्षेत्रधारेण भारते दृश्यते एव । एवमेव विश्वासानामन्तर्गते

दृश्यमानानाम् अन्धविश्वानाम् अमानवीयप्रथानाञ्च निर्मूलनाय हेतुवादिभिः प्रयासाः विधोयन्ते चेत् तेषां हानिः हननं वा क्रियमाणं वर्तते ।

धार्मिकस्वतन्त्रता –

धर्मक्रियाणानमनुपालनं धर्मपरिवर्तनञ्च सर्वकारीयाधिनियमानुसारमेव करणीयं भवति । विविधराजनैतिकदलानि वैय्यक्तिकसंघाश्च कोलाहालम् आन्दोलनञ्च कुर्वन्ति ।

उपासनास्वतन्त्रता

गणेश–दुर्गा–दीपावली–होलिकादि उत्सवानां सामूहिकतया योजनाय सर्वकारस्य आरक्षकाणाञ्च अनुज्ञप्तिरवश्यं भवत्येव । स्वतन्त्रतया उत्सवायोजनं, अर्चना पूजादिकं कर्तुं नैव शक्यते ।

प्रतिष्ठायाः समता

जनानां मानस्य प्राणस्य च संरक्षणं सर्वकारस्य दायित्वं भवति परन्तु 2015 तमे वर्षे केनचित् संघीयमन्त्रिवर्येण सामाजिकवञ्चितं जनमुद्दिश्य प्रोक्तं यत् – श्वानः म्रियते चेत् सर्वकारः दायित्वाकारि भवति वा इति ।

अवसरस्य समता

जीवने विकासाय उन्नत्यै वा विना भेदभावं समानतया च अवसराः नैव प्रकल्प्यमानाः वर्तन्ते । यथा – आन्ध्रप्रदेशराज्यस्थश्रीवेंकटेश्वरवेदविज्ञानपीठस्य श्रीवेंकटेश्वरवैदिक–विश्वविद्यालयस्य च छात्रणां प्रवेशप्रकटने ब्राह्मणवर्णीयबालकाः प्रवेशयोग्या निर्धारिताः वर्तन्ते। अनेन ज्ञायते प्रवेशावसरप्रदाने जाति–लिङ्गाधारेण भेदभावाः विलसन्तीति । शिक्षा तेषां पैतृकसम्पत्तिरिति इदानीमपि काम्यन्ते । भारतस्थसंस्कृतविद्यापीठेषु ब्राह्मणवर्णीयानां नियुक्तिः अधिकतया क्रियमाणा दृश्यते। एतादृशैः बहुभिः कारणैः सर्वेषां जीवने विकासाय पर्याप्तावसराः नैव समुपलभ्यन्ते ।

व्यक्तः गरिमा

प्रत्येकं व्यक्तिविशेषः विलक्षण इति प्रत्यभिज्ञानं क्रियत, तस्य वैय्यक्तिकतायाः प्रतिष्ठायाश्च सम्मानञ्च वित्तीयवैषम्यानां जाति–धर्म–क्षेत्र–भाषा–लिङ्ग–वर्णाधारेण च वर्तमानभारते दृश्यत एव ।

जनानां मध्ये बन्धुता

भारतीयानां पृष्टभूमौ दृश्यमानानां भेदभावानां समापनाय, समतायाः विकासाय च सर्वकारेण कृताः प्रयासाः जनानां बन्धुताभावस्य विकासाय पर्याप्ताश्च नैव दृश्यन्ते ।

राष्ट्रस्य एकता अखण्डता च

क्षेत्रोयराजनैतिकदलानां क्षेत्रीय–जातीय–भाषीय–धर्मीयादि भावनानामाधारेण च कारणेन सर्वेषां भारतीयानां मानसपटले भारतीयभावनापेक्षया क्षेत्रस्य धर्मस्य वर्धनं दृश्यत । अयं राष्ट्रियैक्यतायाः घातकरूपेण परिवर्तनाय अवसरो भवति भविष्यकाले ।

सन्दभग्रन्थाः

1. डा. दुर्गा दास बसुय, भारतीय संविधान – एक परिचय, लेक्षिस् नेक्षिस् प्रकाशन, नागपुर, 2008.
2. P.M. Bakshi; Indian Constitution, New Delhi
3. www.google.co.in/atrocities in emerging Indian society
4. www.youtube.com/social evils in present India
5. Indian Express (Mumbai Edition) Is Govt- Responsible, Page No- 1 & 2, dated-18/12/2015
6. RSKS/38011/2015/Admn-/RTI/6244 dated-19-10-2015
7. Sakshi (Telugu daily) (Chittor Edition) Admission Notice; Page No- 4, dated: 24/04/2010
8. Sakshi (Telugu daily) (Hyderabad Edition) Bhavitha, Page No- 15, 25/05/2012

सहायकाचार्य्यः (शिक्षाविभागः)

राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)

क. जे. सोमयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई – ७७

❖❖❖

VARIATIONS IN THE SANSKRIT & THE ENGLISH GRAMMAR SYSTEMS

✍Dr. Narayanan E. R.

(Sanskrit Grammar, the Paninian in particular, is enriched with its brevity, non-ambiguity, meaningful and logically sound to the effect, is one of the best grammatical system of the Semitic dialects are failing to compet with the completedness of the Sanskrit grammar. Here the auther is trying to distinguish between the two systems of grammar, of English and Sanskrit. The disadvantages of the English Grammar have been highlighted here in comparison with the logically sound Sanskrit Grammatical System.)

THEORY OF LANGUAGE EVOLUTION

The theory on the evolution: The origin of PIE to Vedic Sanskrit, postulating that it is very pure, and that the origin of common Proto-Indo-European is traced back to the Indus Valley Civilization of ca. 3000 BC.

ADVANTAGES OF SANSKRIT GRAMMAR

Sir William Jones said in 1786: "The Sanskrit language, whatever be its antiquity, is of a wonderful structure; more perfect than the Greek, more copious than the Latin, and more exquisitely refined than either, yet bearing to both of them a stronger affinity, both in the roots of verbs and the forms of grammar, than could possibly have been produced by accident; so strong indeed, that no philologer could examine them all three, without believing them to have sprung from some common source, which, perhaps, no longer exists: there is a similar reason, though not quite so forcible, for supposing that both the Gothic and the Celtic, though blended with a very different idiom, had the same origin with the Sanskrit; and the old Persian might be added to the same family"

LOGIC AND REASONING IN SANSKRIT GRAMMAR

Logic and reasoning are applied in the Pāṇinian grammar with a view to establishing its authenticity. Reasoning in mathematical puzzles is applied logically. Grammatical applications are rationally justified and where there should be no scope for inappropriate entries of rules. The scientific status has been established in the appropriate applications of the rules either in order, or to the contextual relevance. With a view to establishing the scientific status of

the Pāṇinian grammar, we consider a few Paribhāṣās out of 134 discussed by Nāgojibhaṭṭa/Nāgeśabhaṭṭa in his monumental work— Paribhāṣendu-śekhara and the rules applied with their nature of function where there is no scope for confusion, or any other no scope for inappropriate application which may harm the unique and established structure of grammar. The functional purposes of the Paribhāṣās are precisely like: "a lightening lamp shines itself and enlightens the objects around." There are a few of such rules based on the common popular maxims adapted to the grammar for its functional accuracy. Among the ascending order of the rules in the 7(th of the text, the latter rules in order is dominant when one is challenged with the other and fight for appropriate relevance to the context to have desirable form. It says : "Pūrva, Para, Nitya, Antaraṅga and Apavāda are increasingly powerful that each of the previous." Para (preceding) dominates the Pūrva (succeeding) with the authenticity of the rule: "The succeeding rule is dominant over the preceding"—vipratiṣēdhē paraṁ kāryam. When vṛkṣa + bhyas are applied to have the form vṛkṣēbhyaḥ: then dīrgha is dominated by etvam due to the Para rule.

LIMITATIONS OF THE ENGLISH GRAMMAR

The correlation of grammatical materials is based on the concept of grammar teaching with the concept of sentences; so that every one can devise new and correct sentences themselves. There are three ways in limited forms such as the Structure, System and function of English Grammar.

Comprehensively, the following features are the nature and the scope of the English Grammar system. They are: Interpretation, idiom, grammar, phrases, noun, verb, adverb, adjuncts, sentences and clauses. short stories, essays, poems, drama, precies etc., notes, summaries, qualifiers, modifiers, groups-adverbial, prepositional, verbal. speech-reported and direct, punctuations such as apostrostophe, capitals, full stops, commas, columns, semi-columns, inverted commas for quotations etc. regular & irregular forms etc.

ADVANTAGES OF ENGLISH GRAMMAR

Learning English grammar helps one to understand how words can create difficult meanings and how controlled literary effects are created. Those who are more analytical and receptive readers, they need the help of the grammar. To gain a greater appreciation for literature, and as a result, readers can better-appreciate any type of poetry with the insights they gain by having a knowledge of linguistic terms. Grammar skills enhance writing and text

interpretation. Knowledge of grammar also allows for better speaking skills. Those who speak well tend to sound more mature and professional. With a view to improving the quality of one's language application, different perspectives show how grammar can be beneficial in many ways – by allowing deeper personal appreciation of literature, and by presenting one's self as being more advanced. Consistency in meaning and form of any language is the basis for communication.

A FEW ENGLISH CLASSICS FOR REVIEW

1. Pride and Prejudice by Jane Austen.
2. Jane Eyre by Charlotte Brontë.
3. Wuthering Heights by Emily Brontë.
4. Sense and Sensibility by Jane Austen.
5. The Picture of Dorian Gray by Oscar Wilde.
6. Romeo and Juliet by William Shakespeare
7. Emma by Jane Austen
8. Persuasion by Jane Austen
9. Hamlet by William Shakespeare
10. Northanger Abbey by Jane Austen
11. Great Expectations by Charles Dickens
12. Frankenstein by Mary Shelley
13. Mansfield Park by Jane Austen.
14. Mass Market by George Orwell.
15. Oliver Twist by Charles Dickens.

DISADVANTAGES ENGLISH GRAMMAR

- The configuration of grammar may make the language learning experience uninspiring and boring.
- By the way, the non-awareness about the configuration and the fundamentals of grammar leads one into a state of sense of frustration through the struggle to express oneself at the most basic level.
- Such confidence level affects one's self motivation to go beyond grammar analogies, translations and other written exercises.

Lack of correlation of grammar to the various contexts of Classics in that language, leads to the thought of grammar is being uninspiring and boring.

CONCLUSION

If we compare these two systems of grammars it is quite clear that Sanskrit grammar is well enriched in itself with its logical framework applied in Vedic and Classical literature; whereas, in brief, the English literature is limited moreover to the interpretations in general.

The lacks of logical applications of rules on the basis of their strength make the English grammar inferior to that of Sanskrit. It also shows that how the literature of both systems differ in their richness in all types of sections of grammar.

BIBLIOGRAPHY

1. A Grammar Of Modern Indo-European by Carlos Quiles & Fernando López-Menchero, Indo-European Language Association, Printed in the European Union, Second Edition, Version 4.15 (10/2009), Pages 824.
2. The Aṣṭādhyāyī of Pāṇini, Roman Transliteration and English Translation by Sumitra Mangesh Katre, Motilal Banarsidass, Delhi, 1989, ISBN : 81-208-0521-6. Rs. 895/-.
3. The English for Colleges by Brendan J. Carrol, McMillan India Limited, Madras-41, First Edition 1938, Reprint Edition 1971, ISBN : 03-339-1037-0. Rs.15/-.
4. A Handbook on the Comparative Philology by Prof. R. S. Venkatarama Sastri, Golden Jubilee Publication, KSR Institute, Madras-4, 1996, ISBN : 81-851-7012-8. Rs. 100/-.
5. A Text-Book of Higher English Grammar & Composition, General Edition by P. K. De Sarkar, Book Syndicate (P) Ltd. First Published in 1926, 46th Edition, 2002. PCC-1- 2354-04. Rs. 175/-.
6. The Indian Theories of Meaning by K. Kunjunni Raja, AL& RC, Adyar, Chennai-20, First Edition 1963, Reprint 2000, ISBN : 81-85141-36-3.
7. The English Grammar and Compositions : Wren & Martin, S. C. Company Delhi-110055, ISBN : 81-219-0009. Rs. 77/-

Assistant Professor (Sr.)(Sahitya Dept.)
Rashtriya Sanskrit Sansthan (D.U.)
K. J. Somaiya Sanskrit Vidyapeeth
Vidyavihar, Mumbai - 77

❖❖❖

व्याकरणशास्त्रदृष्ट्या वाचनाभिव्यक्त्योर्भाषामनोविज्ञानम्

डॉ. गायत्री मुरलीकृष्णः

(वाचनाभिव्यक्त्योर्भाषामनोविज्ञानं व्याकरणदृष्ट्या रचयिताऽत्र विवेचयति । अभिव्यक्तिकौशलम्, वाचनकौशलम्, भाषामनोविज्ञानम्, उच्चारणगतदोषाः, व्याकरणशास्त्रस्य माहात्म्यं चेति नैके विषया अत्र चर्च्यन्ते । अक्षरविन्यासस्य समुच्चारणं हि वाचनं नाम । तद्भावाभिग्रहणं च श्रवणलक्षणम् । मनोगतं सर्वमपि विशिष्टं ज्ञायत इति मनोविज्ञानमिति कथ्यते । मनः कायाग्निमाहन्ति स प्रेरयति मारुतमिति शिक्षाशास्त्रम् । ज्ञानाधिकरणस्यात्मनो मनःसंयोगादभिव्यक्तिप्रक्रिया प्रारभते। स्फोटवादमाश्रित्य नवीना भाषामनोविज्ञानं च न्यरूपयन् ।)

अथ शिक्षां व्याख्यास्यामः वर्णः स्वरः। मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः । ॥ तै.शिक्षा.द्वि.अ ॥

इति तैत्तरीयोपनिषदि श्रुतौ ख्याङित्यादिष्टस्य चक्षिङः व्याङ्पूर्वस्य व्यक्तवाक्कायकर्मणः एतद्रूपमिति । तत्र अकारादिः वर्णः । उदात्तादिः स्वरः । ह्रस्वाद्या मात्राः। प्रयत्नविशेषो बलम् । मध्यवृत्त्या वर्णोच्चारणं साम । सन्ततिः सन्तानः संहिता इत्यर्थः । इत्थं प्रवर्तमानायाः शिक्षास्वरूपात्मिकायाः भाषायाः श्रवणभाषणपठनलेखनकौशलानि प्रधानाङ्गानि वेविद्यन्ते । अत्र अन्तर्निहितभावानां ग्रहणं श्रवणवाचनाभ्याम्, अभिव्यक्तिः भाषणलेखनाभ्यामिति विदितचरमेव । अतः अन्तर्निहितभावानां वाचा उत लिखतरूपेण वा प्रकाशनम् अभिव्यक्तिरित्युदीर्यते । तथा अक्षरविन्यासस्य समुच्चारणम् वाचनमिति कथ्यते । शब्दविन्यासस्य भवाभिग्रहणम् श्रवणमित्यभिधीयते । भाषायाः शिक्षणे प्रधानरूपेण श्रवण-वाचन-वागभिव्यक्तिः इति अङ्गानि प्रधानानि विद्यन्ते । अत एव अतिप्राचीनकालतः भाषाशास्त्रनुसन्धानचिकीर्षवः विद्यन्ते वैयाकरणाः ऋषयः मन्त्रद्रष्टारः । तेषां परिश्रमफलेन वयं संस्कृतमतिसरलयारीत्या अधीयानाः भवामः । परं तत्र न केवलं भाषाशास्त्रं तैः रचितमपि तु भाषा मनोविज्ञानमेव तैः निरूपितम् । आधुनिकैः बहुभिः प्रविधिभिः यदि निरूप्यते तदेव खलु पाणिन्यादयः वैयाकरणाः प्रतिपादयामासुः । शोधपत्रे अस्मिन् व्याकरणदृष्ट्या वाचनाभिव्यक्त्योर्भाषामनोविज्ञानमिति विषयः निरूप्यते ।

अभिव्यक्तिकौशलम् (भाषणम्)

अभिव्यक्तिः नाम वाचा अन्तर्निहितभावानामभिव्यक्तिरिति स्वीक्रियते । एतदेव वाग्रूपेण प्रवर्तते भाषेति । विवक्षया ज्ञानाधिकरणात् आत्मनः वर्णोत्पत्तिराराभते इति वर्णोच्चारणे वर्णोत्पत्तिः कथं भवतीति पाणिनीयशिक्षायाम् कथ्यते यत् –

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्ररयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
वर्णाञ्जनयते तेषां विभागाः पञ्चधा स्मृतः ॥
आकाशवायुप्रभवश्शरीरात्समुच्चरन् वक्तमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानोवर्णत्वमागच्छति यस्स शब्दः॥

इति शब्दशास्त्रशब्दप्रमाणानुगुणम् उच्चारणे उत भाषणे वा वाचने आत्मा बुद्धिः मनः कायाग्निः मारुतिः इति पञ्चकारणानि विद्यन्ते न्यरूपिषत इति ।

वाचनकौशलम् (पठनम्)

वाचनं कथं भवतीति बहुभिः बहुधा निगदितम् । पठनप्रक्रियायां इन्द्रियाक्षरसन्निकर्षेण अक्षरविन्यासम् अर्थं बोधयति । तत्पश्चात् आत्मा बुद्ध्यासमेत्यार्थान् ... इति वत् वर्णोत्पत्तिः भवति । पठने प्रथमं किं वर्णानामभिज्ञानं भवति उत शब्दानाम् अथवा वाक्यानामिति प्रसक्तौ भारतीयानां स्फोटवादः अतिमहत्त्वपूर्णं पात्रं भजते । तन्निरूपणात् प्राग् आधुनिकाः भाषामनोविज्ञानिनः किम् वदन्ति इति पश्यामः ।

Bouma shape

Bouma shape named after the Dutch psychologist Herman Bouma] refers to the overall outline or shape of a word - Herman Bouma discussed the role of 'global word shape in his word recognition experiment conducted in 1973- Theories of bouma shape became popular in word recognition suggesting people recognize words from the shape the letters make in a group relative to each other - This contrasts the idea that letters are read individually- Instead via prior exposure people become familiar with outlines and thereby recognize them the next time they are presented with the same word or bouma

Parallel recognition vs- serial recognition

Parallel letter recognition is the most widely accepted model of word recognition by psychologists today. In this model all letters within a group are perceived simultaneously for word recognition. In contrast the serial recognition model proposes that letters are recognized individually one by one before being integrated for word recognition. It predicts that single letters are identified faster and more accurately than many letters together as in a word- However this model was rejected because it cannot explain the word superiority effect which states that readers can identify letters more quickly and accurately in the context of a word rather than in isolation.

Neural networks of word recognition

A more modern approach to word recognition has been based on recent research on neuron functioning. The visual aspects of a word such as horizontal and vertical lines or curves are thought to activate word & recognizing receptors. From those receptors neural signals are sent to either excite or inhibit connections to other words in a person's memory. The words with characters that match the visual representation of the observed word receive excitatory signals. As the mind further processes the appearance of the word inhibitory signals simultaneously reduce activation to words in one's memory with a dissimilar appearance, This neural strengthening of connections to relevant letters and words as well as the simultaneous weakening of associations with irrelevant ones eventually activates the correct word as part of word recognition in the neural network.

वैयाकरणानां भाषामनोविज्ञानम्

अत्र प्राचीनभारतीयैः अत्यन्ताधुनिकैः यदुक्तं तदपेक्षयापि निर्दुष्टं चिन्तितम् । येन बहूनां वाचनदोषाणां दूरीकरणम् सम्भवति । यथा –

व्याकरणे अष्टभाषाप्रवृत्तयः प्रोक्ताः (ब्रह्मकाण्डः- 24,25,26 - अष्टपदार्थीरूपत्वाद् व्याकरणस्य) (हेलराजः) -

1.शब्दः	--	1. प्रकृतिप्रत्ययौ	2.पदवाक्ये
2.अर्थः	--	1.प्रकृतिप्रत्ययार्थौ	2. पदवाक्यार्थौ
3.शब्दार्थसम्बन्धः	--	1.कार्यकारणभावः	2.योग्यता
4.प्रयोजनम्	--	1.अर्थज्ञानम्	2.धर्मः

अत्र पठने वा श्रवणे वा भाषणे स्फोटरूपं कथं भवतीति विचिन्तयामः तर्हि मीमांसकाः वदन्ति यत् वर्णसमुदायः पदम्, पदसमुदायः वाक्यम् अतः वर्णानङ्गीकुर्वन्ति परं वाक्यं प्रधानं मन्वते । नैयायिकाः ध्वन्यात्मकवर्णान् अङ्गीकुर्वन्ति किन्तु पदविषये चिन्तयन्ति। सिद्धान्ते वैयाकरणाः अखण्डवाक्यस्फोटं स्वीकुर्वन्ति अतः वाक्यम् स्वीकुर्वन्ति वर्णविवेचनमपि कुर्वन्ति । अत्र स्फोटप्रसङ्गे राजपुरप्रवेशन्यायः खलेकपोतन्यायत्वेन वर्णानामभिज्ञानं सम्भवति । अत एव प्रोक्तं हरिणा -

न वर्णव्यतिरेकेण पदमन्यच्च विद्यते ।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन ॥
पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविभेदो न कश्चन ॥ (न = इव)

अतः वाक्यं प्रधानम् । वाक्ये पदानि इतस्ततः भवन्ति चेदपि वाक्यार्थं न गच्छति इति कारणेन वाक्यप्राधान्यमङ्गीकृत्य वाक्यस्फोटं यद्यपि वदन्ति तथापि तद् अभ्यासबलेनैवेति अङ्गीकुर्वन्ति । विना अभ्यासम् अनुभवम् प्राथमिकस्तरे सर्वेपि वर्णपदग्राहिणः एव भवन्तीति वदन्ति । यतः वयं प्रथमम् वर्णान् लिपिरूपसङ्केतान् कुर्मः चित्ररूपेणैव पश्यामः । यावत् पर्यन्तं चित्रं सम्पूर्णं न भवति तावत् पर्यन्तं तस्य अवगमनं यथा न स्यात् तथैव वाचने अपि वर्णानां वर्णसमूहात्मकपदानां पदसमूहवाक्यानामर्थः यावत्पर्यन्तं न स्मर्यते तावत्पर्यन्तं वयं अक्षराणि अन्यथा पठामः अन्यार्थं स्मरामः । अत्र वाचने बहुभिः बहवः दोषाः क्रियन्ते । ते के इति अग्रे प्रतिपाद्यन्ते ।

वाचनाभिव्यक्तिकौशलयोः समस्याः -

पदवर्णसम्बद्धवाचनदोषाः (Reading Disability Invisible Visible Word and Letters) –

छात्रः वाचनसमये कदाचित् अनवधानवशात् विद्यमानवर्णं त्यजन्ति, कदाचित् अविद्यमानवर्णं पठन्ति, कदाचित् विद्यमानं सम्पूर्णपदं त्यजन्ति, कदाचित् अविद्यमानं यत् पदं भवति तस्य वाचनं कुर्वन्ति ।

उच्चारणगतदोषाः (Pronunciation Disability) –

महाभाष्ये प्रोक्तं अथ क उपदेशः? उच्चारणम् इति उच्चारणं शुद्धं भवेदिति अन्यथा अनर्थो जायेत इति कथयन् –

दुष्टश्शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ॥ इति ।

तेऽसुरा हेलय हेलय इति कुर्वन् पराबभूवुः ... म्लच्छा मा भूम इत्यध्येयं व्याकरणम् ।

अनेन अवगम्यते वाचने उच्चारणप्राधान्यम् । एकस्य गद्यांशस्य वाचनसमये छात्रः ह्रस्वस्य दीर्घोच्चारणं, दीर्घस्य ह्रस्वोच्चारणम्, अल्पप्राणस्य महाप्राणत्वेन, महाप्राणस्य अल्पप्राणत्वेन चौते उच्चारणगतदोषाः आचरन्ति । विशिष्य संस्कृतक्षेत्रे वकार-बकारयोः (बालकः स्थाने वालकः इति) (the best performance v = the waste performance इति कथनम्), जकार-यकारयोः (यमुना स्थाने जमुना इति), सकार-शकार-षकारेषु, रकार-लकारयोः, संयुक्ताक्षराणां (यज्ञं स्थाने यजं इति), वह्निस्थाने बह्निः इति, तकार-जकारयोः एवं School स्थाने इस्कूल इत्यादयः अनेके उच्चारणगतदोषाः भवन्ति ॥

यद्यपि बहु नाधोषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनो श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥
यस्तु प्रयुङ्क्त कुशलो विशेषे शब्दान्यथावत् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगवित् दुष्यति चापशब्दैः ॥

इति अपशब्दप्रयोगे सति सर्वान् दुष्यन्ति तेन सम्यगुच्चारणं सम्भवतीति । वस्तुतः अयं मनोवैज्ञानिकसिद्धान्तः विद्यते । Negative Reinforcement इति कथ्यते । कथमुच्चारणं कर्तव्यं कथं न इत्यपि निर्दुष्टं विद्यते यथा -

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठकोत्तमाः ॥
गीतिशीघ्री शिरःकम्पी यथालिखितपाठकः ।
अनर्थज्ञो अल्पकण्ठश्च षडेते पाठकाधमाः ॥

इत्यादीन् बहून् विशेषान् धरत् व्याकरणशास्त्रम् आधुनिकभाषाशास्त्रं तृणीकरोति । यद्यपि प्राचीनकालीनाः प्रवृत्तयः अत्यन्तं नवीनाः विद्यन्ते तथापि कौपीनसंरक्षणार्थमयं पटाटोपः

इति लोकोक्तिं द्रढयन्तः बहवः नव्यप्रवृत्तयः समाविष्कृताः । अत्र एकः प्रधानः विषयः अवधेयः यत् यावत् पर्यन्तं व्याकरणं वैज्ञानिकरूपेण आधुनिकविषयैः सह न तौलयन्ति तावत् पर्यन्तं तत् संस्कृतशास्त्रमिव वेद इव च पूज्यते । अतः संस्कृतज्ञा वयं भाषाविज्ञानदृशा आधुनिकानुसन्धानैः संस्कृतशास्त्राणां स्वरूपं नवीनीकुर्म इति शम् ।

सन्दर्भग्रन्थसूची

1. व्याकरणमहाभाष्यम्
2. वाक्यपदीयम्
3. पाणिनीयशिक्षा
4. शाब्दबोधामीमांसा
5. http://www.education.com/reference/article/key&features&reading&process/
6. https://groups.google.com/forum/#!msg/bvparishat/NjT&LzRWXc0/KzPmDmZnSlEJ
7. तैत्तरीयोपनिषत्

सहायकाचार्य्यः (शिक्षाविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

वेदव्याख्या में निरुक्तकार का अवदान

✍डॉ. जयप्रकाश नारायण

(वेद के मन्त्र अर्थवाचक नहीं हैं, अर्थस्मारक हैं - ऐसी पारम्परिक मान्यता है । स्मरण ज्ञात का ही होता है । जिसे अर्थ का ज्ञान रहेगा वही अर्थ का स्मरण कर सकता है । अर्थ भी लौकिक और लोकोत्तर के भेद से दो होते हैं । वैदिक मन्त्रों के ये दोनों प्रकार के अर्थ हैं । अतः साधारणतया वे दुर्ज्ञेय हैं । पुनरपि आचार्यों ने उनके अर्थ की खोज के लिए निरन्तर प्रयास किया है और बहुत कुछ उसमें सफलता भी मिली है । निरुक्त का इस दिशा में प्रयास अनुपम है । विद्वान् निबन्ध लेखक ने उन्हीं प्रयासों का इस निबन्ध में रेखांकित किया है ।)

वेद विश्व की प्राचीनतम एवं सर्वप्रथम रचना है । जिस प्रकार व्याकरण के द्वारा वेदार्थ ज्ञान होता है, उसी प्रकार वेदमन्त्रों में निहित गूढ़ एवं आध्यात्मिक रहस्य का ज्ञान निघण्टु एवं निरुक्त के द्वारा होता है । सामान्यतः 'निघण्टु' संग्रह का पर्याय है ।

निघण्टु वैदिक शब्दों का संग्रह है और निरुक्त उसी पर भाष्य है । निरुक्त व्याकरण का पूरक है । व्याकरण जहाँ शब्दों की रचना (बहिरङ्ग) की व्याख्या करता है वहीं निरुक्त उनके अर्थ (अन्तरङ्ग) का अन्वेषण करता है । विशेषतः संज्ञा, नाम पदों, आख्यातपदों, उपसर्गों तथा निपातों के संग्रह मात्र को 'निघण्टु' कहते हैं ।

'इमानि चत्वार्यपि पदजातानि सन्त्यतस्मिञ्छास्त्रे ।
किमिति निघण्टुसञ्ज्ञानि भवन्ति ।'[१]

'निघण्टु' किसी उद्देश्य विशेष को ध्यान में रखते हुये किसी साहित्यगत अथवा शास्त्रगत निगूढ़ार्थक पदों का किसी विशेष प्रविधि के तहत संगह का नाम है जो आधुनिक कोशशास्त्र के मापदण्डों के आधार पर 'Glossary' विधा का एक प्रारूप कहा जा सकता है।

Prof. Claus Vogel के शब्दों में -

"Lexographic work started in India at a very early date with the compilation of word lists (Nighantu) giving rare, unexplained, writings.

These Glossaries, of which that handed down and commanded upon in Yask's Nirukta is the best and commended upon Yask'as Nirukta is the best known and probably the oldest specimen did not , however institute the prototype of the dictionaries (Kosa) of later times."[2]

निरुक्त षडवेदांगों में वेदरूपी पुरूष का श्रोत्र (कान) है – 'निरुक्तं श्रोत्रमुच्यते ।' – (पाणिनिशिक्षा 41) इसमें वैदिक शब्दों के अर्थ जानने की प्रक्रिया बतलाई जाती है ।

अर्थावबोधे निरपक्षतया पदजातं यत्रोक्तं निरुक्तम् ।[3]

यह भाष्य शैली के गद्य में है जिससे वेदमंत्रों के अर्थावगम में सहायता मिलती है , साथ ही भाषाविज्ञान के लक्ष्य (शब्द के मूल का ज्ञान) की प्राप्ति में सहायता मिलती है । प्रो. मैक्समूलर के अनुसार –

"Yaska maintains that ever noun is derived from a verbal root and meets the various objections raised against it (a theory on which the whole system of Panini is based and which is infact) the postulate of the modern philosophy."[4]

निघण्टु के पाँच अध्यायों की व्याख्या भास्कराचार्य ने 12 अध्यायों में की है, दो अध्याय परिशिष्ट रूप में हैं । कोशरचना के अभी तक के ज्ञात प्रयासों में निघण्टु की रचना प्रथम है । भारत में यह कोश साहित्य के आरम्भ का ही द्योतक है ।[5]

निघण्टु के प्रथम तीन अध्याय नैघण्टुक कांड कहलाता है, चतुर्थ अध्याय **ऐकपदिककांड** तथा पंचम अध्याय **दैवतकांड** कहलाता है । ऐकपदिक कांड के विषय में डॉ. वेलवलकर कहते हैं – 'निघण्टु नामक वैदिक शब्दों की सूची के चतुर्थ अध्याय को ऐकपदिक कहते हैं जिस पर यास्क ने निरुक्त नाम की व्याख्या लिखी है जिसमें अज्ञात या संदिग्ध मूल वाले 278 शब्द गिनाए गये हैं ।[6]

यास्क स्वयं कहते हैं –

'अथ यानि अनेकार्थानि एकशब्दानि तानि अतोऽनुक्रमिष्यामः ।
अवगतसंस्कारांश्च निगमान् । तत् ऐकपदिकम् इत्याचक्षते ।'[7]

इस कांड के शब्द भिन्न-भिन्न रूपों और विभक्तियों में हैं, यथा – जह ।। निध ।। शिताम । मेहना । दमूनाः । भूषः । इषिरेण । कुरुतना । जठरे । तितउ । शिप्र । मध्या । मन्दू । ईर्मान्तासाः । कायमानः । लोधम् । शीरम् । बुन्दः । वृन्दम् । किः । उत्त्वम् । ऋवीसम् । इति त्रयस्त्रिंशच्छतानि पदानि ।। पूर्णसंख्या 279 ।

एक 'वृन्द' को छोड़कर इस अध्याय के सभी शब्द वैदिक हैं । निघण्टु का अन्तिम अध्याय (दैवतकाण्ड) छ: खण्डों में विभक्त है जिसमें क्रमश: 3,13,36,32,36 तथा 31 पद हैं जो भिन्न-भिन्न देवताओं के नाम हैं इन नामों के द्वारा देवताओं की स्तुति प्रधानतया की जाती है ।

तत् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते ।

इन खण्डों के शब्दों की व्याख्या यास्क ने 'निरुक्त' के सातवें अध्याय से बारहवें अध्याय तक की है । एक-एक खण्ड की व्याख्या एक-एक अध्याय में हुई है। इस दैवतकाण्ड पर ही वैदिक धर्म और संस्कृति का इतिहास अवलंबित है क्योंकि वैदिक देवतावाद पर आलोचनात्मक दृष्टि से विचार करने वाला कोई भी ग्रन्थ निरुक्त से प्राचीन नहीं । यहीं हम किसी जाति की अपने धर्म के विषय में चिन्तन की प्रथम किरण पाते हैं।

निघण्टु अनेक थे ।[8] प्रो. स्कोल्ड के अनुसार -

" **Nirukta is probably not the prodution of a single individual but the result of the united efforts of a whole generation or perhaps of several generations."** [9]

प्रत्येक निघण्टु में वैदिक शब्दों का कोश था जो संकलन करने वाले की इच्छा के अनुसार अपनी विशेषता लिए हुए था । 'महाभारत' के अनुसार प्रजापति कश्यप इस निघण्टु के रचयिता हैं ।[10] परन्तु कई अन्य विद्वान् निरुक्त् एवं निघण्टु दोनों के रचयिता यास्क को मानते हैं । स्वामी दयानन्द और आचार्य भगवद्दत्त मानते हैं कि जितने निरुक्तकार हैं वे निघण्टु के भी प्रणेता हैं । कुल चौदह निरुक्तकार हैं -

औपमन्यव, औदुम्बरायण, वर्ष्यायणि, गार्ग्य, आग्रायण, शाकपूणि, और्णनाभ, तैटिकि, गालव, स्थौलाठीवि, कौष्टिकि, कास्थक्य, यास्क तथ कौत्सव्य (शाकपूणि का पुत्र) । इन सबों ने अपने-अपने निघण्टु बनाए और उस पर ही भाष्य लिखे । वैदिक मंत्रों के अर्थ जानने के लिए निघण्टु एवं निरुक्त की सहायता अत्यावश्यक है ।

निघण्टु और निरुक्त एक ही वेदार्थ की ज्ञापक पद्धति के दो आयामों के विकास को लक्षित करते हैं, अत: दोनों परस्पर अभिन्न हैं । निघण्टु के स्थान पर 'निरुक्त' शब्द का प्रयोग भी देखा जाता है ।

'तान्येतानि त्रीणि प्रकरणानि नैघुण्टकमैकपदिकं दैवतमिति ।

अनेन प्रकरणत्रयविभागपपञ्चनेनेदमवस्थितं निरुक्तशास्त्रमिति ।'[११]

उदाहरणार्थ – पृथ्वी । निघण्टु में 'पृथ्वी' सां पृथिवीवाचकपद समुदाय के अतिरिक्त द्यावापृथिवीवाचक पदसमुदाय में पठित है । निघण्टुकार गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षमा आदि 21 पृथिव्यर्थक संज्ञाओं का अभिधेयनिर्देश 'पृथिवी' इस अभिधान से करते हैं । 'पृथ्वी' और 'पृथिवी दोनों के प्रकृत्यंशों में अभेद है तथा प्रत्ययांशों में मात्र रूपतः भेद अर्थशः साम्य है ।

पृथ्वी विस्तीर्णेत्यर्थः । पञ्चाशत्कोटियोजनविस्तीर्णेतिपृथिवी ।[१२]

उणादिकोष तो दोनों पदों का साधुत्व एक ही सूत्र से अन्ववख्यात करता है –

प्रथेः षिवन्षवन्ष्वनः सम्प्रसारणं च ।[१३]

परन्तु रूपशः प्रत्यय में भेद होने से सत्ता में आए अनेक पद पठित हैं, यथा – गौः तथा ग्मा, क्ष्मा, क्षा, क्षमा तथा क्षितिः, भूः तथा भूमिः । इनके अतिरिक्त 'गातुः' पद तथा गौः पद कामी पाक्षिकसाम्य है ।

'गीयते स्तूयतेऽसौ, स्तुवन्ति वास्यां स्थिता इन्द्राहीन्, गच्छन्त्यस्यां भूतानीति वातस्माद् गातुः ।'[१४]

ऋग्वेद में पृथ्वी संज्ञा के व्युत्पत्ति चिन्तन से ज्ञात होता है कि पृथिवी की प्रथन क्रिया से तात्त्पर्य पृथिवी–अन्तर्भूत पदार्थों का उत्खनित होकर बहिर्भूत होना है । यही पृथिवो का फैलाव है ।

प्रथनम् – प्रथ+ल्युट् फैलाना, विस्तार करना[15] यही फैलाव अनेक खनिजपदार्थों की खानों के रूप में पृथिवी की सतह पर समतलता–विषमता के रूप में, वृक्षों की उत्त्पति के रूप में, पर्वतों के रूप में दिखाई देता है । इसी फैलाव के कारण पृथिवी पर जीवन सफल हुआ । अतः परम्परा सृष्टिकाल में ब्रह्मा द्वारा इस क्रियानिष्पत्ति को कहती है ।

ब्रह्मणा पूर्वमेव विस्तारिता ।[१६]

उणादिपाठ तो वर्तमानकाल में 'प्रथ्' धातु से प्रत्यय का विधान करते हुए यह प्रतिपादित करता है कि यह क्रिया हमेशा चलती रहती है ।

उणादयो बहुलम् ।[१७]

पृथ्वो - वत्ति- एते वर्तमाने संज्ञायां च बहुलं स्युः । भाष्यकार सायणाचार्य के अनुसार 'पृथ्वी' संज्ञा ऋग्वेद में विशेषणपरक संज्ञा है। 'पृथ्वी' संज्ञा के विभिन्न भाष्यों से प्रथन क्रिया का स्वरूप लक्षित हो ही जाता है , यथा - अगस्त्य ऋषि द्वारा दृष्ट 'द्यावापृथिवी' देवता से सम्बन्धित स्तुति में सायण 'पृथ्वी' को द्यावापृथिवी का विशेषण मानकर इसकी रूपविधिता को तद्विषयक प्रथन कहते हैं ।

उर्वी पृथ्वी बहुले दूरे अन्ते ।[१८]

सायणभाष्य -

उर्वी उर्व्यौ महत्यौ पृथ्वी पृथिव्यौ बहुले अनेकप्रकारेण प्रथमाने बहवाकारे दूरे अंते विप्रकृष्टांतदेशे ।

इस प्रकार 'प्रथन' से अभिप्राय एक पदार्थ का अनेक रूपों में विकास/विस्तार हो जाना ही है ।

वैदिक मंत्र की व्याख्या में पद का निर्वचन अभिधेय पर ही आधृत होता है । निरुक्त निर्वचन पद के व्यवहार में आने के बाद पद की योगपरीक्षा करने के लिए ही प्रवृत्तशास्त्र है । पदार्थ विशष की अभिव्यक्ति क्यों वर्णविशेषों के माध्यम से ही होती है, यह खोजना ही निर्वचनशास्त्र का लक्ष्य है अर्थात् मानव जो कुछ बोल रहा है वह उन शब्दों में क्यों बोल रहा है? -

यह जिज्ञासा ही निर्वचन की जननी है । मानव स्व अनुभूति को अभिव्यक्त करने के लिए मनचाहे संकेतों को ही आधार बनाकर चल रहा है अथवा शब्दों और वक्तृस्थ अनुभूति का मूर्त जगत् में कोई संबंध है? यह खोजना ही निर्वचन का मूल्य है ।

यास्काचार्य निर्वचन के इस मौलिक अभिप्राय को सरलातिसरल भाव से अधिगम कराने हेतु ही निरुक्त में अधिकतर ऐसे लोकप्रसिद्ध अभिधानों का निर्वचन देते हैं । वेदार्थनिरुपण के लिए वे स्वरभेद-उदात्त, अनुदात्त एवं स्वरित पर विशेष बल देते हैं -

तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम् ।

अर्थात् अधिक बल देने पर उदात्त होता है, कम बल देने पर अनुदात्त । वास्तव में इन दोनों स्वरों का यही रहस्य है । भाषा के प्रवाह में बहुत से शब्दों में स्वरपरिवर्तन (Accent Shifting) होता रहता है ।

वेद में वाक्यादि को क्रिया में उदात्त पड़ता है, मध्य में नहीं । वाक्य के आदि में क्रिया रखने का अर्थ है उसे महत्त्वपूर्ण सिद्ध करना ।

वैदिक मंत्रों की व्याख्या में यास्क की कुछ विशेषताएं ध्यातव्य हैं - (1). वैदिक मंत्रों की व्याख्या में शब्दों के क्रम में सामान्य तथा परिवर्तन नहीं करते । ऋचाओं में जिस क्रम से शब्द हैं उसी क्रम से उनका अर्थ देते हैं वाक्य-विन्यास (Syntax) की चिंता किए बिना, यथा -

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।

यदेदयुक्तहरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।।[१९]

तत्सूर्यस्य देवत्वं, तत् महित्वं, मध्ये यत् कर्मणा (कर्तोः) क्रियमाणानां विततं संङ्ग्रियते । यदासौ अयुक्त हरणान् आदित्वरश्मीन्, हरितः - अश्वान् अति वा, अथरात्रीववासः तनुते इति ।।

यास्क विशेष्य और विशेषण के बीच में क्रिया जोड़ देते हैं, परन्तु जहाँ उन्हें स्वतंत्र रूप से लिखने का अवकाश मिलता है, वे संस्कृतविन्यास की ही रीति अपनाते हैं किन्तु क्रियाएँ प्रायः अन्त में नहीं होती, जैसे - तमूचुः ब्रह्मणाः, स शन्तनुः देवापि शिशिक्ष राज्येन।[20]

वैदिक मंत्रों में उपसर्ग और क्रिया की पृथकता सर्वविदित है किन्तु यास्क के काल में इनका साहचर्य आवश्यक प्रतीत होता है । यास्क मन्त्रस्थ उपसर्ग और क्रिया को एक साथ कर देते हैं, जैसे - प्रति..दुहीसत्, (नि.1/17) को 'प्रतिदुग्धाम' में बदल देते हैं ।

वैदिक भाषा में जहाँ निरर्थक , निपात पद-पूरण और वाक्यपूरण के रूप में हुआ करते हैं, वहाँ यास्क ऐसे निपातों को छोड़कर केवल सार्थक और बलप्रदान करने वाले निपातों, (जैसे - एव, अपि) का ही प्रयोग करते हैं ।

'इति' का प्रयोग 'आचार्य' यास्क संस्कृत के अनुसार उद्धरण के बाद करते हैं ।

इनके वाक्य अत्यंत सरल होते हैं । संयुक्त वाक्यों का प्रयोग ये बहुत ही कम करते हैं ।

वेद व्याख्या में निघण्टु एवं निरुक्त का महत्त्वपूर्ण स्थान है । यास्क (700-800 ई. पू.) ने वेदमंत्रों की व्याख्या तब आरम्भ की जब लोग इसे भूलने लगे थे। यद्यपि इन्होंने संपूर्ण वैदिक संहिता की व्याख्या नहीं की है परन्तु जितनी भी की है वह परीक्षण की

कसौटी पर खरी उतरी है । इसी दृष्टि से यास्क वेदार्थ के प्रथम प्रकाशक हैं । वेदव्याख्या की शैली भी उन्होंने ही दी है । निर्वचनशास्त्र 'निरुक्त' में शब्दों का इतिहास इस ढंग से प्रस्तुत किया गया है कि उनमें सन्निहित धातु का पता कर उस धातु के अर्थ के आधार पर ही शब्द का अर्थ निर्धारित किया जाए । धातु से शब्द का अर्थ वाच्यार्थ अथवा अलंकारों की सहायता से ज्ञात होता है । निरुक्त के मनीषी स्कोल्ड कहते हैं –

"We ought rather to be astonished because the Nirukta contains so many good and etymologies as it does" [21]

डॉ. लक्ष्मणसरूप का कथन है कि – 'वास्तव में निर्वचनशास्त्र का वैज्ञानिक शिलान्यास का दावा करने तथा इसके सामान्य सिद्धान्तों की स्थापना करने में यास्क ही प्रथम हैं ।

"Yaska is the best to claim the scientific foundation and also the first to formulate the general principles of etymology."[22]

डॉ. लक्ष्मणसरूप के अनुसार जिस समय भाषाविज्ञान का बीजवपन भी नहीं हुआ था उस समय निरुक्तकारों ने भाषाविज्ञान के अनेक मौलिक सिद्धान्तों को उद्घोषित एवं प्रचारित किया। प्राचीन आर्यभाषा (विशेषत: वेद) को समझने के लिए निरुक्त अपने विचारों का अद्भुत प्रतिनिधि ग्रन्थ है जो पाणिनी का भी पथ प्रदर्शक रहा है ।

सन्दर्भाः

1. Prof Claus vagel : A History Of Indian Literature, chapter : Indian Lexicography : Introduction
2. निरुक्तम्
3. A History Of Ancient Sanskrit Literature : Prof Maxmuller page-66
4. The Nighantu and the Nirukta, p. 14
5. निरुक्त भाग – 1 पृ.–47 पर उद्धृत अंग्रेजी सन्दर्भ का हिन्दी अनुवाद गुरुमण्डल ग्रन्थमाला में प्रकाशित ।
6. निरुक्तम् 4/1
7. Yask's Nirukta ; Prof. Rajware, p-v-VII. वैदिक वाङ्मय का इतिहास भाग–2, खण्ड–2
8. Skold - The Nirukta Nighantu and Nirukta (14/32-35)

9. महाभारत, मोक्षधर्म पर्व, ओयाय-342, श्लोक 86-87

10. निघण्टु (पञ्चाध्यायी, दुर्गविरचितऋस्वर्थवृत्ति)

11. निघण्टु निर्वचनम् 1/1/11

12. उणादिसूत्र 1/150

13. निघण्टु निर्वचनम् 1/1/20

14. वैदिकपदानुक्रमकोश, पृ.2104

15. वामन शिवरामआप्टे काश, पृ. - 662

16. अष्टाध्यायी 3/3/1

17. ऋ. 1/185/7

18. नि. 4/11

19. नि. 2/10

20. The Nirukta & Scold], p.181

21. Introduction to Nirukta : 310 डॉ. लक्ष्मणसरूप, Oxford, 1920, p-64

सहायकाचार्य

राष्ट्रिय संस्कृत संस्थान (मा. वि),

नई दिल्ली ।

❖❖❖

प्रश्नकरणप्ररकवैविध्यकौशलयोः वैशिष्ट्यम्

✍डा. सच्चिदानन्दमूर्तिः

(अवगतानवगतानां विषयाणां प्रश्नकरणद्वारा दृढीकरणं छात्राणां कर्त्तव्यम् । शिक्षकाणामवगतविषयसङ्क्रान्तिर्गुणाय कल्पत इत्यत्र कालिदासादिवाक्यप्रामाण्यम् । रचयिताऽत्र तादृशविषयानालोड्यानुवाचकेभ्यः प्रदर्शयति । शिक्षाशिक्षितं हि छात्राणां सर्वाङ्गीणविकासाय जायते । व्याकरणशुद्धिः, प्रेरकवैविध्यकौशलम्, कण्ठस्वरः, चेष्टा, मौनम्, प्रयोगकौशलमित्यादीनि शिक्षकगुणत्वेन ग्राह्याणि, यैश्च छात्राणामवगमनं सुकरं स्यादिति निष्कर्षोऽत्र रचनायामाचरितः ।)

उपोद्घातः

शिक्षया शिक्षणेन वा छात्रस्य सर्वविधविकासो जायते । यच्च शिक्षणं विद्यालये दीयते। विद्यालयीयशिक्षणं शिक्षकः एव प्रयच्छति । सः भाविनागरिकान् निर्माति । यदि शिक्षकः कौशलवान् न भवति तर्हि छात्राणां विकासोऽपि न सम्भवति । छात्राय मानसिक-शारीरिक-सांस्कृतिकादि-विकासः शिक्षकमवलम्ब्य तिष्ठति । कुशलशिक्षकः छात्राणां स्थितिं, रुचिं, स्तरम्, आवश्यकताञ्च अवलोक्य स्वकौशलं प्रयुङ्क्ते । एतादृशकौशलेन छात्रेषु स्फूर्तिः वर्धते । एवञ्च ते पाठोन्मुखिनः भवन्ति ।

लोके प्रभाव्यध्यापकः सः एव भवति यः विषयज्ञानेन साकं सम्प्रषणकौशलज्ञोऽपि स्यात् । यथा -

शिष्टा क्रिया कस्यचिदात्मसंस्था
सङ्क्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥

(मालविकाग्निमित्रम् -१/१६)

प्रश्नकरणकौशलम्

प्रश्नकरणकौशलस्य समग्रस्वरूपम्

परिभाषा, अर्थश्च

'प्रच्छ'धातोः भावे नङ् प्रत्यये प्रश्नः इति रूपं सिध्यति । 'अविज्ञातप्रवचनं प्रश्नः' इत्यभिधोयते । 'कथनाय प्रेरणे' इत्यमरः । 'मस्तिष्कं प्रबोधयितुं, चिन्तनशक्तिं जागरयितुम्, अवधानं रक्षितुञ्च उपयुक्तं शाब्दिकमाध्यममेव प्रश्नः' इति जङ्धीः प्रश्नं पर्यभाषत ।

It keeps Sir, honest serving man
They taught me all I know
There names are What and Why and When
And How and Where and Who
(Rudyard Kipling)

अर्थात् - शिक्षणे वयं षड्भृत्यान् प्राप्तवन्तः । एभिरेव शिक्षणसदृशान्तःक्रिया साधुरूपेण प्रचलति । तेषां नामानि सन्ति - किम्, कथम्, कदा, किमर्थम्, कुत्र, कः/का इति।

वस्तुतः एतैः शब्दैः एव कथं न केवलं शिक्षणे एव, अपि तु सर्वत्र जीवने व्यवहारे च सर्वं ज्ञातुं प्रभवाम ।

प्रश्नकरणार्थमपेक्षितयोग्यताः

1. पाठ्यविषये सम्पूर्णाधिकारः
2. प्रश्नरचनापाटवम्
3. आत्मविश्वासः

प्रश्नप्रयोजनानि

1. छात्रपूर्वज्ञानोपलब्धिपरीक्षणम् - अधिकाध्ययनाय प्रेरणा च ।
2. अध्यापनसाफल्यस्य मूल्याङ्कनम्, छात्रेषु मूल्याङ्कनाभ्यासानां निर्माणञ्च ।
3. अभिरुचिनिर्माणम्, विचारोद्बोधनञ्च ।
4. पाठ्यांशस्य पुनरालोचनम् ।
5. बौद्धिकशक्तीनां विकासः ।

प्रश्नकरणकौशलप्रक्रिया –

प्रश्नकरणकौशले संरचना, प्रयोगश्चेति प्रक्रियाद्वयमास्ते । प्रश्नसंरचनाप्रयोगावत्र प्रस्तूयेते ।

१. संरचना –

प्रक्रियेयं प्रश्ननिर्माणसम्बद्धा । अस्यां चत्वारो घटकास्सन्ति । घटकाश्च एवं सन्ति – 1. व्याकरणदृष्ट्या शुद्धता, 2. सम्बद्धता, 3. स्वरूपसंक्षिप्तता 4. विशिष्टता चेति।

i. व्याकरणदृष्ट्या शुद्धता –

प्रश्नः व्याकरणदृष्ट्या शुद्धो भवेत् । अशुद्धप्रश्नः छात्रेषु सन्देहमुत्पादयति । फलतः प्रश्नार्थमनवगच्छन्तस्ते तदर्थावबोधार्थमेव अधिकसमयं स्वीकुर्युः ।

ii. सम्बद्धता –

प्रश्नाः पाठ्यविषयेण शिक्षणोद्देश्यैश्च सम्बद्धाः भवेयुः । यस्मिन् प्रश्ने अज्ञातपदानि अपरिचितपरिभाषाश्च न भवन्ति सोऽपि प्रश्नः सम्बद्धः इत्युच्यते । यद्यध्यापकः विषयसङ्गतान् प्रश्नान् पृच्छेत्तर्हि बालाः सद्यः तं प्रश्नं समादध्युः । असम्बद्धप्रश्नेन कालस्य अपव्ययो भवति, छात्रवधानभङ्गोऽपि जायते ।

iii. स्वरूपसंक्षिप्तता –

बालकानामवधानविस्तारो न्यूनो भवति । अतः प्रश्ने अत्यन्तावश्यानि पदान्येव स्युः येन बालः शीघ्रं तमवगन्तुं शक्नुयात्, तदुत्तरचिन्तनावसरे सम्पूर्णप्रश्नं स्मर्तुं च प्रभवेत् । केचन शिक्षकाः प्रश्नस्य आद्यन्तयोः अनावश्यकशब्दान् अनपेक्षितवाक्यानि वा योजयन्ति । यथा –

अ. अस्यां कक्ष्यायां कः वक्तुं शक्नोति यत् रघुवंशं केन रचितमिति ?

आ. ये एतत्पश्नस्य उत्तरं दातुं शक्नुवन्ति ते स्वहस्तानुत्थापयन्तु

इ. अस्तु इदानीं वदन्तु..........

iv. विशिष्टता -

एकेनैव समाधानेन युक्तः प्रश्नः विशिष्टः इति वक्तुं शक्यते । यस्योत्तरं विपुलमनिश्चेतञ्च सः प्रश्नः एतद्भिन्नः । यथा - महाभारतविषये भवान् किं जानाति ? एतत्प्रश्नस्य महाभारतकथा, तद्वर्णनशैली, तत्पात्रचित्रणामित्यादिभिस्सम्बद्धानि बहून्युत्तराणि भवितुमर्हन्ति । एतादृशप्रश्नस्य केनोत्तरेण भाव्यमित्यजानन् छात्रः तदुत्तरनिश्वयये एवावसमर्थो जायेत । अतस्सः उत्तरनिश्चयार्थं तच्चिन्तनार्थञ्च बहुकालमपेक्षेत । एवमेतादृशप्रसङ्गेषु काल अपव्ययो जायते । एवम्भूतः प्रश्नैः प्रश्नकरणे प्रवाहपूर्णताऽपि नश्यति ।

२. प्रयोगः -

प्रश्नकरणकौशलप्रसङ्गेऽस्मिन् प्रयुक्तं प्रयोगपदं प्रश्नकरणपद्धतिं परिचाययति । प्रयोगस्य 1. वेगः, 2. कण्ठस्वरः, 3. विरामः, 4. वितरणम् इति चत्वारो घटकास्सन्ति ।

i. वेगः -

प्रश्नकरणे वेगः तत्रेपयुक्तसमयं सूचयति । शिक्षकः नातिवेगं नातिशनैश्च प्रश्नान् पृच्छेत् । शनैश्शनैः पृष्टाः प्रश्नाः प्रश्नकरणे प्रवाहपूर्णतां नाशयन्ति । तेन कालापव्ययोऽपि भवति । अत्यन्तवेगेन समुचितविरममदत्वा पृष्टप्रश्नाः उत्तरदाने क्लेशकराः । अतिवेगेन पृष्टप्रश्नं प्रायश्छात्रः कठिनमिति चिन्तयन्ति । ईदृशप्रश्नावबोधोऽपि तैः बहुकालोऽपेक्ष्यते । फलतः प्रश्नकरणे प्रवाहपूर्णता नश्यति । अतः प्रश्नकरणवेगः सर्वदा छात्रवबोधक्षमातानुरूपः उत्तरदानाय अपेक्षितचिन्तनस्तरस्य अनुकूलश्च भवेत् । सरलः अधिकचिन्तनमन्तरा केवलं स्मृत्वा उत्तरयोग्यः प्रश्नः वेगेन प्रष्टव्यः । विभिन्नविचारसंश्लिष्टं चिन्तनापेक्षमुत्तरं यस्य प्रश्नस्य सः प्रश्नः सामान्यवेगेन प्रष्टव्यः । छात्रयोग्यतास्तरं विषयक्लिष्टतां चावगम्य शिक्षकैः प्रश्नकरणवेगो निश्चेयः ।

ii. कण्ठस्वरः -

प्रश्नकरणे कण्ठस्वरः प्रश्नश्रवणयोग्यतां प्रश्नकरणपद्धतिञ्च ध्वनयति । कक्ष्यायां स्थिताः सर्वेऽपि छात्रः प्रश्नः कः ? किं तस्य समाधानं, किंस्तरीयं चिन्तनं तत्समाधानाय अपेक्षितमिति यथा अनुमानं कुयुंः तथा तादृशकण्ठस्वरेण प्रश्नाः

प्रष्टव्याः । प्रश्नकरणे कण्ठस्वरपरिवर्तनमत्यावश्यकम् । प्रश्ने केषाञ्चित् पदानां गम्भीरस्वरेणोच्चारणं प्रश्नस्य विशिष्टोद्देश्यं तदुत्तराय अपेक्षितं चिन्तनस्तरञ्च सूचयति । विशिष्य प्रश्नसूचकशब्दोच्चारणे कृतेन स्वराघातेन प्रश्नार्थं सुलभतया ग्रहीतुं शक्यः । अनावश्यकतया असमुचितरीत्या च स्वरं परिवर्त्य पृष्टप्रश्नाः छात्रेषु अध्ययनस्तरचिन्तनशक्तयोः विकासे अनुपयक्ताः भवन्ति ।

iii. **विरामः** –

प्रश्नकरणानन्तरं तदुत्तरचिन्तनाय शिक्षकेण धतस्य मौनस्य कानिचित् क्षणानि विरामः इति वक्तुं शक्यते । विरामोऽयं प्रश्नस्य उचितोत्तरदानाय अपेक्षितसमयं कल्पयति । एषः छात्रणां चिन्तनस्तरं तत्प्रकारं च निर्णेतुं चिन्तनशक्तिं प्रेरयितुञ्चावश्यकः । सम्यक् विमृश्य देयं दीर्घञ्च समाधानं निष्कासयितुं दीर्घविरामः, लघूत्तरं निष्कासयितुं लघुविरामश्च देयः ।

शिक्षकाः प्रायः छात्रचिन्तनशक्तेः प्रेरणायै अत्यावश्यकविरामस्य तत्प्रकाराणाञ्च प्रयोगविषये न श्रद्दधति । एतदत्रावधेयं यत् विरामस्य लाघवदैर्घ्यं प्रश्नसंरचनां तत्स्तरं चाधारीकृत्य भवेताम् । सामान्यान् निम्नस्तरीयान् च प्रश्नानुत्तरयितुं लघुविरामः, क्लिष्टप्रश्नानुत्तरयितुं दीर्घविरामश्च देयः ।

iv. **वितरणम्** –

प्रश्नः सम्पूर्णकक्ष्यामुद्दिश्य प्रष्टव्यः न तु छात्रविशेषमुद्दश्य । छात्रविशेषमुद्देश्य प्रश्नकरणेन पृष्टश्छात्रः एव उत्तरयेदिति विचिन्त्य अन्यछात्रः प्रश्नोत्तरं न चिन्तयेयुः । सम्पूर्णकक्ष्यामुद्दश्य पश्नकरणेन नैके लाभास्सन्ति । सर्वाऽपि कक्ष्या सावधाना जायते । प्रत्येकोऽपि बालकः, शिक्षकः आत्मानमुत्तरदानाय उत्थापयेदिति विचिन्त्य उत्तरचिन्तने मग्नो जायते । एवं छात्रास्सर्वेऽपि प्रत्येकपश्नस्य उत्तरं चिन्तयन्तः तत्कथनजन्यसाफल्यानुभूतिं प्रानुवन्तः शिक्षणे अभिरुचिं धारयेयुः । छात्रविशेषेण उत्तरे दीयमाने सति अन्यछात्रः तदुत्तरं विमर्शनात्मकदृष्ट्या विश्लेषयन्ति। तदुत्तरं यदि चिन्तितोत्तरादिभन्नं तर्हि बालकमस्तिष्केषु विचारसङ्घर्षो जायते येन ते बहु शिक्षन्ते । यथासम्भवं प्रत्येकं बालकाय उत्तरदानाय अवसरो देयः ।

प्रेरकवैविधयकौशलम्

कक्ष्याध्यापने छात्राणां ध्यानतैकता प्रमुखसमस्या । छात्रानवधानतायामनेककारणानि भवन्ति ।

शिक्षणे वैविध्यकल्पनं छात्राध्यानाकर्षण तन्द्रक्षणे च बहूपकरोति । वैविध्यञ्च प्रेरकपरिवर्तनेन सम्भवति । प्रेरकपरिवर्तनं ध्यानाकर्षकमिति विदितचरमेव । गतिशीलं वस्तु स्थिरापेक्षया शीघ्रं ध्यानमाकर्षति । गति: स्वयमेव परिवर्तनकारणम् । विक्रतार: स्ववस्तु-विज्ञापकं पट्टं गतिशीलतया विद्युता प्रकाशयन्ति । अत्र निदानं जनावधानाकर्षणमेव । इत्थं प्रेरकपरिवर्तनं ध्यानाकर्षकमिति फलितम् ।

शिक्षणकौशलार्थ:

पूर्वोक्तरीत्या कक्ष्याशिक्षणे छात्रावधानप्राप्त्यै तत् स्थिरीकरणाय च प्रयोज्यानां शिक्षणव्यवहाराणां समूहस्य नाम प्रेरकवैविध्यप्रस्तुतिकौशलमिति ।

कौशलघटका:

कौशलघटका: एवं सन्ति -

1. कण्ठस्वरपरिवर्तनम्
2. केन्द्रीकरणम्
3. चेष्टा:
4. पारम्परिकक्रियाशैलीपरिवर्तनम्
5. मौनम्
6. श्रव्यदृश्यमाध्यमपरिवर्तनम्
7. छात्राणां शारीरिकभागग्रहणम् इति ।

इमे घटका: क्रमशोऽत्र विव्रियन्ते ।

१. कण्ठस्वरपरिवर्तनम् -

कक्ष्यायां शिक्षकस्य शिक्षणव्यवहार: अधिकतया शाब्दिको भवति । अत: शिक्षकस्य कण्ठस्वर: कक्ष्याशिक्षणे प्रमुखस्थानमावहति । बहुकालं यावत् समानवेगस्वराभ्यां कृतं पाठनं नीरसं भवति ।

अतः अध्ययनाभिमुखं छात्राध्यानाकर्षणाय तत्स्थिरीकरणाय च शिक्षकः सदैव प्रयतेत । कुशलाध्यापकः स्वीयकण्ठस्वरस्य औचित्यपूर्णैः विभिन्नपरिवर्तनैः छात्रध्यानमाकर्षति ।

सरलांशानां पाठने स्वरे वेगः उपयुक्तो भवति । अत्र मन्दता पाठने नीरसतामानयति । दुरवबोधांशाः शनैः पाठनीयाः । महत्त्वपूर्णांशव्याख्याने स्वरे अल्पवेगस्स्यात् । हठात् वेगं न्यूनीकृत्य शनैः पाठनेन छात्रः पाठ्यांशानां प्रामुख्यमवगच्छन्ति । उत्साहजनकाः उत्तेजकराः सुखावहाः अंशाः उच्चैः स्वरेण यदि पाठ्येरन् तर्हि ते प्रभावकराः भवन्ति ।

२. केन्द्रीकरणम् –

अ. शाब्दिककेन्द्रीकरणम् –

मौखिकरूपेण क्रियमाणं केन्द्रीकरणं शाब्दिककेन्द्रीकरणमित्युच्यते । इदं नीचैर्दत्तकथनैः क्रियते ।

i. अत्र पश्यन्तु ।

ii. विषयोऽयमतिमहत्त्वपूर्णः, अतः सावधानं श्रोतव्यः ।

iii. एषु सर्वेऽप्यंशेष्वयं प्रमुखः ।

iv. अत्र विशेषध्यानं कुर्वन्तु ।

आ. चेष्टात्मककेन्द्रीकरणम् –

पाठ्यमानांशानाम् अभिमुखं छात्रवधानाकर्षणार्थं शिक्षकेण यदा चेष्टाहावभावादयः उपयुज्यन्ते तदैतत् चेष्टात्मककेन्द्रीकरणमित्युच्यते । उदाहरणम् –

a. शिक्षकः किमपि शिक्षणोपकरणं प्रदर्श्य तत्र विशिष्टं स्थानं पूरयति ।

b. श्यामपट्टे रेखाङ्कितचित्रं लिखितविषयं वा सावधानं द्रष्टुं सूचीदण्डेन सूचयति, तत्स्थाने ताडयति वा ।

c. शाब्दिकचेष्टात्मक (मिश्रित) केन्द्रीकरणम् –

आकारपरिमाणादीनां ज्ञापनाय, भावप्रकटनाय शिक्षकेण यदा शाब्दिककथन-चेष्टाहावभावाः समकालमेव प्रयुज्यन्ते तदैतत् शाब्दिकचेष्टात्मककेन्द्रीकरणमिति कथ्यते

। उदा – शिक्षकः मानचित्रादिषु प्रान्तांशादीन् प्रदर्शयन् 'अत्र सावधानं पश्यन्तु' इति निर्दिशति ।

३. चेष्टाः –

शिक्षणे वैविध्यमानेतुं तद्द्वारा छात्रवधानमवाप्तुं चेष्टाः अत्यन्तोपयुक्ताः भवन्ति। मुखभावभङ्ग्यः, भृभङ्गशिरो, नेत्रहस्तचालनानि उपयुक्तचष्टासु प्रधानाः ।

४. अन्तःक्रियाशैलीपरिवर्तनम् –

शिक्षणमेका पारस्परिकी क्रिया । कक्ष्यायां छात्राध्यापकयोर्मध्ये संज्ञापनं प्रश्नोत्तरमाध्यमेन नैरन्तर्येण भवति । इदमेव संज्ञापनं पारस्परिकक्रियेत्युच्यते । क्रियेयं शाब्दिकाशाब्दिकभेदेन द्विधा । शिक्षकेण छात्रैर्वा चेष्टाभिः क्रियमाणं संज्ञापनमशाब्दिकमिति सम्भाषणादिमौखिकरूपेण क्रियमाणं शाब्दिकमिति च अभिधोयते ।

इत्थं कक्ष्यायां पारस्परिकक्रियायां तिस्रः शैल्यो भवितुमर्हन्ति ।

ii. छात्रशिक्षकयोर्मध्ये पारस्परिकक्रिया

iii. शिक्षकछात्रविशेषयोर्मध्ये

iv. छात्राणां मध्ये

एतासु शैलीषु एकस्याः एव शैल्याः दीर्घाकालानुवर्तनं शिक्षणे नीरसतामुत्पादयति । तद्द्वारा छात्रेषु शिक्षणवैमुख्यम् अनवधानता च जायते । छात्रावधानताप्राप्त्य तन्द्रक्षणाय च शिक्षकः पारस्परिकक्रियाशैलीषु वैविध्यमानयेत् ।

५. मौनम् –

मौनमप्येतत्कौशलघटकेष्वन्यतमो घटकः । भाषण, व्याख्यानादिमध्ये विरामः निश्शब्दता वा अत्र मौनत्वेनात्र गृह्यते । मुख्यांशकथनात्पूर्वं धृतं मौनं तदंशं प्रति छात्रध्यानमाकर्षति, तन्महत्वञ्च ज्ञापयति । प्रायः क्षणत्रयं यावत् धृतं मौनं प्रभावकारि भवति ।

६. श्रव्यदृश्यमाध्यमानां परिवर्तनम् –

कक्ष्याशिक्षणे शिक्षकः पाठ्यविषयज्ञानं छात्रेषु सङ्क्रमयितुं श्रव्यदृश्यमाध्यमे उपयुङ्क्ते । चित्रमानचित्रश्यामपट्टलेखनादिशिक्षणोपकरणोपयोगरूपपक्षः दृश्यमाध्यमेन

चात्र गृह्यते । ज्ञानसङ्क्रमणार्थम् एकस्यैव माध्यमस्य दीर्घकालप्रयोगः छात्राध्यानमपकर्षति। अतः छात्रवधानमाकर्षणाय तत्स्थापनाय च शिक्षकः आत्मनोपयुज्यमानमाध्यमयाः वैविध्यमानयेत् । श्रव्य-दृश्यमाध्यमयोः द्वयोः युक्तियुक्तेन परिवर्तनेन छात्रावधानसम्पादनं तन्द्रक्षणञ्च सुकरं भवति ।

७. छात्राणां शारीरिकभागग्रहणम् -

छात्रः तेषु पाठेषु अधिकाभिरुचिं प्रदर्शयन्ति येषु तेषां शारीरिकभागग्रहणाय अवसराः लभ्यन्ते । शारीरिकभागग्रहणेन न केवलं पाठ्यविषयकाभिरुचिजागर्ति प्रत्युत शारीरिकी विश्रान्तिरपि जायते । शारीरिकरूपेण भागग्रहणञ्च श्यामपट्टलेखनअभिनयादिभिः भवितुमर्हति ।

सहायकाचार्य्यः (शिक्षाविभागः)
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः ।

❖❖❖

सुमुहूर्त्तनामकरणवैशिष्ट्यम्

✍डा. जयकृष्णन् नम्पूतिरि एन्. डि.

(एकादशेऽहनि पुत्रस्य नाम कुर्यादिति महाभाष्यपस्पशाह्निकवाक्यस्मरणेन नामकरणस्य अनुशासनं ज्ञायते । नामकरणस्य मुहूर्त्तकरणे वैशिष्ट्यमत्र रचयिता सप्रमाणं प्रदर्शयति। मुहूर्त्तस्य हि क्रियायोग्यकालत्वे श्रौतकर्मणां कर्तारं मुहुर्मुहुस्तारणादिति मुहूर्त्तपदव्यां विचारितम् । नामकरणस्य षोडशसंस्कारेष्वन्तर्भूतत्वाच्च तेषामपि सविस्तरं प्रतिपादनमत्र रचयित्रा विहितमिति महदिदं रचनारत्नम् । अनुवाचकानुसन्धानार्थमेषा रचना सामोदं पुरस्क्रियते ।)

वेदस्य चक्षूरूपमन्यतमं स्थानं, ज्योतिषं कालविधानं शास्त्रम् इत्यनेन सम्प्राप्तम् । वैदिककर्मणां यागादीनाञ्च अभीष्टफलप्राप्तये सुमुहूर्ते एव एतानि करणीयानि भवन्ति । अत्र ज्योतिषस्य स्कन्धत्रयषु होरास्कन्धो विद्यमानं मुहूर्ताङ्गम् अन्यतमं स्थानमावहति । अङ्गेऽस्मिन् मुहूर्तानां ज्ञानाय अनेकैः आचार्यैः अनेके ग्रन्थाः विरचिताः वर्तन्ते । यथा - मुहूर्तचिन्तामणिः, मुहूर्तमार्ताण्डः, मुहूर्तपदवी, कालविधानम् इत्यादि । एषु ग्रन्थेषु प्रत्येकस्यापि कर्मणः शुभफलप्राप्तये करणीयः कालः दर्श्यते ।

मुहूर्त्तम्

क्रियायोग्यः कालः मुहूर्तः इत्यभिधोयते । येषु केष्वपि शुभाशुभकर्मसु अभीष्टफलानयनाय निर्दिष्टः कालः भवति मुहूर्तः । शब्दोः यं कालविशेषवाचकः ।

मुहुर्मुहुस्तारयते कर्तारं श्रौतकर्मणाम् ।
तस्मान्मुहूर्त इत्याहुर्मुनयस्तत्त्वदर्शिनः ॥
मुहूर्तमह्नो रात्रेश्च प्रोचुः पञ्चदशं लवम् ।
केचिच्छुभक्रियायोग्यकालं केचिद्घटीद्वयम् ॥[१]

इत्यादिमुहूर्तशब्दार्थाः बहुधा लक्ष्यन्ते । वेदकाले एव मुहूर्तः कालपरिमाणपर्यायपदत्वेन व्यवहृतः दृश्यते। अह्नः पञ्चदशो भागः मुहूर्तशब्देन स्वीक्रियते, रात्रेः च । एवमेकस्मिन् दिने आहत्य त्रंशन्मूहूर्ताः भवन्ति । तैत्तिरीयाद्युपनिषद्सु मुहूर्तविषयोक्तवाक्यान्यनेकानि लक्ष्यन्ते ।

गच्छति काले मुहूतशब्दस्यार्थव्याप्तिः बहु विस्तृता सञ्जाता । विवाहादिसंस्कार-विशेषास्तथा चान्ये व्यावहारिककर्मविशेषाश्च निर्दिष्टसमयानुरोधन विहिता एव अभीप्सितफलदाः भवन्तीति लोके अनुमन्यन्ते । तत्तत्कर्मानुरोधेन वारतिथिनक्षत्रादीनां परस्परसंयोगेन अत्यन्तगुणाधिक्यं दोषन्यूनत्वं च यस्मिन् काले सिद्ध्यति सः कालः मुहूर्तः इति व्यवहारः क्रमेण अभवत् । आदौ संहिताग्रन्थेषु विविधकर्मोपयुक्तमुहूर्तानां वर्णनम् उपलभ्यते । कालान्तरे संहितास्कन्धस्य विशालत्वात्, गहनत्वात्, मुहूर्तानां बहूपयोगित्वात् च मुहूर्ताः प्रत्येकभागत्वेन कल्पितः । सर्वे मानवाः सदा स्वस्वकर्मसु विजयमभिलषन्ति । विजयस्तु यथाकालं प्रयत्नेन प्राप्यते । कर्मसु अभीष्टफलानयनाय मुहूर्ताङ्गं प्रवर्तते । ऐहिकामुष्मिककर्मसु सर्वेष्वपि कालज्ञानमपेक्षतेत्यतः एव अङ्गमिदमत्यन्तं प्राधान्यं भजते ।



वेदोक्तकर्मसु कालनिर्धारणमस्य शास्त्रस्य मुख्यं कर्म । अतः एव शास्त्रमिदं वेदस्य चक्षूरूपं प्रधानं स्थानमावहति । अस्य शास्त्रस्य साहाय्येनैव उत्तमानुत्तमकालमवगम्य कर्म कर्तुं शक्यते । तथैवाधुना स्कन्धाङ्गादिशाखाभिः अतिविस्तृतमिदं ज्योतिश्शास्त्रं कालत्रय-दर्शकमित्यतः शास्त्रज्ञानिनाम् अज्ञानिनामपि बहूपकारकं भवति । कालेऽस्मिन् ज्योतिश्शास्त्रं लोककल्याणाय, सामूहिकानां जनानां शारीरिकमानसिकस्वास्थ्याय च प्रवृत्तमानम् एकमुत्तमं शास्त्रं भवति ।

षोडशसंस्काराणां वैशिष्ट्यम्

संस्कारैः संस्कृतपूर्वैरुत्तरैरनुसंस्कृतः

नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्मलौकिकः ।
ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः ॥

सम्यक् कुरुते इति संस्कारः, संस्क्रियन्तेऽनेनेति संस्कारः, आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कार इत्याद्यैरनेकैर्निर्वचनैः संस्कारशब्दः स्वप्रौढतां प्रदर्शयति। प्रत्येकस्यापि वस्तुनः दोषान् निवार्य गुणाधानं येन कर्मणा क्रियते, सः संस्कार इत्यभिधीयते । संस्काराश्च मनुष्यं अन्येभ्यः जीविभ्यः पृथक् करोति । यतः गुणाधानकरणं भवति संस्कारः । यथा द्रव्यान्तरेषु सुवर्णादयः मृण्मलिनयुक्ताः संस्कारेण शुद्धतामाप्नोति । यथा वा घटादयः संस्कृताः कार्योपयोगिनो भवन्ति । मनुष्योऽपि संस्कारेण संस्कृतः धर्माचरणयोग्यस्सन् इतरजन्तुभ्यः विशेषतां प्राप्नोति ।

आचार्येषु, संस्काराः कति तथा के च ते इत्यस्मिन् विषये अनेके मतभेदाः दृश्यन्ते । तदेवं – खादिरगृह्यसूत्रे षोडश, वैखानसगृह्यसूत्रे अष्टादश, गोभिलगृह्यसूत्रे एकविंशतिः, वराहगृह्यसूत्रे त्रयोदश, आश्वलायनगृह्यसूत्रे पञ्चदश, बौधायनगृह्यसूत्रे त्रयोदश, पारस्करगृह्यसूत्रे त्रयोदश च संस्काराः वर्णिताः । तथैव धर्मसूत्रेषु संस्काराणामाचारभागं स्पष्टीकरोति । संस्काराणां विधिविधानं तत्सम्बद्धनियमाश्चात्र वर्णयन्ते । केचन धर्मसूत्रकाराः आचार्याः संस्काराः कतीतीत्थमभिप्रयन्ति –

गौतमधर्मसूत्रे चत्वारिंशत्, बौधायनधर्मसूत्रं चतुरः, आपस्तम्बधर्मसूत्रे सप्त, सुमन्तुः दश, हारीतः षोडश, अङ्गिरः पञ्चविंशतिः, मनुः त्रयोदश, याज्ञवल्क्यः द्वादश, व्यासः षोडश, विष्णुस्मृतौ पञ्चदश च संस्कारानुपस्थापयन्ति । केषुचिद्ग्रन्थेषु –

संस्कारप्रकाशे एकचत्वारिंशत्, संस्कारदीपके एकविंशतिः, निर्णयसिन्धौ चतुर्विंशतिः, स्मृतिचन्द्रिकायां षोडश, संस्कारमयूखे ऊनविंशतिः च संस्कारान् स्पष्टीकरोति । एवं संस्कारेष्वनेके मतभेदाः वर्तन्ते चेदपि लोके षोडशसंस्काराः प्रशस्ताः सन्ति । ते च गर्भाधानादिब्राह्मसंस्काराः मुहूर्तपदव्यां एवं दृश्यन्ते –

आधानं तनयस्य पुंसवविधिस्सीमन्तजाताह्वयाः
निष्क्रामोऽन्नविधिः क्षुरोपनयने त्रीणी व्रतानि क्रमात् ।

गोदानञ्च समापनं व्रतविधेः पाणिग्रहोऽग्न्याहति-
विप्रादौ विहिताः श्रुतौ निगदिताः कार्याः क्रियाः षोडश ॥[2]

1. गर्भाधानम्	2. पुंसवनम्	3. सीमन्तः
4. जातकर्म	5. नामकरणम्	6. निष्क्रमणम्
7. अन्नप्राशनम्	8. चौलम्	9. उपनयनम्
10. होतारम्	11. औपनिषदम्	12. शुक्रियम्
13. गोदानम्	14. समावर्तनम्	15. विवाहः
16. अन्त्येष्टिः		

नामकरणसंस्कारः

संस्कारेण संस्कृताः मानवाः एव सत्कर्मनिरताः अर्हाश्च भवन्ति । तदर्थं क्रियमाणेषु संस्कारेषु प्राग्जन्मसंस्कारान् गर्भाधानपुंसवनसीमन्तान् समाप्य जननात्परं क्रियमाणसंस्कारेषु द्वितीयः संस्कारोऽयम् । प्रथमः जातकर्मसंस्कारः शिशोः जननात्परं विनाविलम्बं करणीयः भवति । द्वितीयोऽयं नामकरणसंस्कारः संस्कारेष्वन्यतमं स्थानमावहति ।

नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः।
नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म ॥[3]

अस्मिन् कर्मणि शिशोः नाम कथं भवेदिति जिज्ञासायां मनुः एवं निर्दिशति ।

मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शून्द्रस्य तु जुगुप्सितम् ॥[4]

मङ्गलद्योतकानि नामानि ब्राह्मणस्य, क्षत्रियस्य बलसूचकं, वैश्यस्य धनसंयुक्तं, शून्द्रस्य दासीसूचकं च नाम स्थापयेत् । तथैव स्त्रोणां नामानि एवं भवेदिति सूचयति । यथा सरलतया उच्चारणयोग्यम्, अक्रूरं, स्पष्टम्, अर्थयुक्तं, मनोहरं, मङ्गलशब्दसहितं च नाम स्त्रीणां भवेत् । तन्नाम अनुग्रहद्योतकं, तथैव तस्य नाम्नः अन्तिमवर्णस्य दीर्घत्वं च भवेत् ।

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥[5]

एवमेव मनुस्मृतौ विवाहचिन्तनावसरे स्त्रोणां नाम कथं भवेदित्यपि स्पष्टतया कश्चन विचारः दृश्यते । तदेवम् –

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रष्यनाम्नीं न च भीषणनामिकाम् ॥[६]

नाम कथं भवेदिति विचारे सति इत्थमपि कश्चनविचारः दृश्यते, कुलदेवतानक्षत्रदिमाससम्बद्धं नाम पिता वा कुर्यादन्योऽपि वा कुलवृद्धः इति । नक्षत्रस्य यद्वर्णमुच्यते, तत्प्रथमाक्षरं यथा भवति तथा कुलदेवतासम्बद्धं कञ्चन नाम शिशोः स्थापयेत् । तं संस्कारं तस्य शिशोः पिता वा कुलवृद्धः कश्चन वा कुर्यात् ।

स्वकुलानुगमेन केषुचित् स्थलेषु नाम स्वीक्रियते । तदेवमपि द्रक्ष्यते –

द्विद्व्यक्षरं द्व्यक्षरं वा नामकर्मणि शस्यते ।
नाम पैतामहं शस्यं यादृशं वा द्विजन्मसु ॥[७]

इत्येवमपि विचारः दृश्यते । नैकेषु प्रदेशेषु नामकरणसंस्कारे स्थाप्यमानं नाम अधिकतया पितामहस्यैव भवति । संस्कारेऽस्मिन् स्थाप्यमानं नामेदं सामान्यतया गोप्यमेव भवति । जन्मनाम तु गोपयेत् इत्युक्त्या यत् नाम संस्कारे शिशोः स्थाप्यते, तन्नाम गोप्यं भवेत्। शिशोः व्यवहारनाम अन्यत् भवेदित्याशयः ।

नामकरणम्

नामकर्म दशमेऽथवाऽहनि
द्वादशे शुभतिथौ विधोयत ।
स्वोच्चमित्रभवनस्थसद्ग्रह–
स्तादृशैर्यदि विलोकिताश्शुभाः ॥[८]

नामकरणसंस्कारः शिशाः जननानन्तरं दशमे वा द्वादशे दिने, शुभतिथौ कार्यम् । कालेऽस्मिन् स्वराशौ उच्चे वा मित्रक्षेत्रे शुभाः, तथैव तेषां दृष्टिः मुहूर्तलग्ने च भवति तर्हि शुभं वाच्यम् ।

मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्चुत–
प्राजेशाश्विशशाङ्कपौष्णादिनकृत्पुष्येषु राशौ स्थिरे।
छिन्द्रां पञ्चदशीं विहाय नवमीं शुद्धऽष्टमे भार्गवो

ज्ञाचार्यामृतपादसूर्यजदिने नामानि कुर्याच्छिशोः ॥[९]

अनुराधा, पुनर्वसुः, मघा, उत्तराफाल्गुनी, उत्तराषाढः, उत्तराभान्द्रपदा, शतभिषक्, स्वाती, धनिष्ठा, श्रवणः, रोहिणी, अश्विनी, मृगशिराः, रेवती, हस्तः, पुष्यः इत्येतेषु नक्षत्रेषु, अष्टमशुद्धिसहितस्थिरराशिलग्नेषु, छिन्द्रां (6,8,12) पञ्चदशीं (पूर्णिमा, अमा.) नवमीं च त्यक्त्वा अन्येषु तिथिषु, कुजरविवासरौ त्यक्त्वा अन्येषु वासरेषु च शिशोः नामकरणं कुर्यात् ।

समीक्षा

मुहूर्तकल्पन्द्रुमः - ग्रन्थेऽस्मिन् मुहूर्तकल्पन्द्रुमे कालविधानोक्तदशमदिनं नामकरणाय विहितमिति न दृश्यते । तथैव इतोऽपि केचन विचाराः दृश्यन्ते च । एकादशम् अष्टादशं मासान्तं च दिनं शुभमिति । कालः अतीतः चेत् विंशतितमे मासे वा सुमुहूर्ते नामकरणसंस्कारं कुर्यात् । निर्दिष्टकाले कर्तुं न शक्तः तर्हि पितापुत्र्योः शुभाशुभकालं विचार्य, गोचरवशात् ग्रहाणां शुभस्थितौ शुभदिने संस्कारोऽयं कार्यः ।[10]

तिथिषु चतुर्थी चतुर्दशी च त्यक्तः, षष्ठी अष्टमी द्वादशी पञ्चदशी च योजितः । वासरेषु शनिवासरः त्यक्तः, रविः योजितः । राशिषु चरराशयः वर्ज्याः इत्येवोक्तमित्यतः उभयराशयोऽपि योग्याः इति ग्रन्थकारमतम् । करणेषु किंस्तुघ्नं त्याज्यम् शुद्धभावचिन्तने दशमः त्यक्तः । मध्याह्नानन्तरकालः त्याज्यः, त्र्यक्षरनामानि च वर्ज्यानीति कथयति ।[11]

मुहूर्तमार्ताण्डः - ब्राह्मणक्षत्रियवैश्यशूद्राणां नामकरणसंस्कारं यथाक्रमं द्वादशे षोडश विंशे द्वाविंशे च दिवसे कुर्यात् । जातकर्मसंस्कारोक्तनक्षत्रण्यत्रापि स्वीकार्याणि । अर्थात् हस्ताश्विपुष्याभिजित्सु क्षिप्रनक्षत्रेषु, उत्तरात्रयरोहिणीषु स्थिरनक्षत्रेषु, स्वातीपुनर्वसु-श्रवणधनिष्ठाशतभिषक्सु चरनक्षत्रेषु, मृगशिरश्चित्ररेवत्यनुराधासु मृदुनक्षत्रेषु अन्यतमऽस्मिन् नक्षत्रे नामकर्मसंस्कारं कुर्यात् । चरराशिलग्नम् मेषकर्कतुलामकराः, रिक्तातिथयः (4,9,14), अष्टमी, कुजशनिवासरौ, लग्नाद्द्वादशे भावे ग्रहस्थितिः, रात्रिकालः, अपराह्नकालश्च वर्जनीयाः भवन्त्यस्मिन् कर्मणि।[12]

बृहज्जौतिषसारः - जननाशौचान्ते स्वकुलोचितं शुभतिथिनक्षत्रमुहूर्तेषु गुणान्विते काले नामकरणसंस्कारं कुर्यात् ।[13]

पूर्वकालामृतम् –जननात्समनन्तरमेव नामकरणं कुर्यात् । तन्नाम रहस्यं भवेत् । एकादशे द्वादशे षोडशे विंशे वा द्वाविंशे दिने व्यवहारनाम स्थापयेत् । पुत्रस्य समसंख्या पुर्त्याः विषमसंख्या च नाम्नि भवेत् । जातकर्मणि उक्तशुद्ध्यादिमुहूर्तविचारः अत्रापि स्वीकरणीयः ।[14]

मुहूर्ततत्त्वम् – शिशोः जननानन्तरं द्वादशाद्येषु दिनेषु, विष्ट्यादिदोषरहिते दिने, शुभग्रहाणां वासरे, अश्विनी, रोहिणी, मृगशिराः, पुनर्वसुः, पुष्यः, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वाती, अनुराधा, उत्तराषाढः, श्रवणः, धनिष्ठा, शतभिषक्, उत्तराभाद्रपदा, रेवतीत्येतेषु नक्षत्रेषु नामकर्मसंस्कारं कुर्यात् । कालेऽस्मिन् बुधागुरुशुक्राः केन्द्रस्थाः भवेयुः ।[15]

नारदसंहिता – आशाचान्ते स्वकुलोचितं नामकर्म कुर्यात् । नाम शुभाक्षरैः मङ्गलपदैः च युक्तं प्रशस्तं च स्यात् । कालातिक्रमणं भवति चेत् गुरुशुक्रयोः मौढ्यरहिते काले, उत्तरायणे, चरस्थिरमृदुक्षिप्रनक्षत्रेषु, शुभवासरेषु, अष्टमशुद्धियुक्तशुभलग्नांशकेषु, लग्नाष्टमद्वादशेषु शुभदृष्टौ वा युतौ नामकर्म कुर्यात् ।[16]

मुहूर्तपदवी – जननादेकादश द्वादशे वा दिने नामकरणं कुर्यात् । कौषीतकानां दशमरात्रेः तृतीयभागोऽपि शुभः । संस्कारेऽस्मिन् अपराह्नः, अश्विनी, भरणी, कृत्तिका, आश्लेषा, पूर्वाफाल्गुनी, चित्रा, विशाखा, ज्येष्ठा, पूर्वाषाढः, पूर्वाभाद्रपदा इत्येतानि नक्षत्राणि, मेषमकरतुलाराशयः, रात्रेः त्यंशभागेषु प्रथमभागद्वयं, कुजशनिवासरौ, लग्नाद्वादशे ग्रहः, अष्टमे कुजः, जन्मनक्षत्रमित्येतानि वर्ज्यानि ।[17]

माधवीयम् – निषेकमुहूर्तः एव स्वीकर्तव्यः । उच्चे वा बन्धुक्षेत्रे स्थितस्य ग्रहस्य योगः वा दृष्टिः लग्ने भवति चेत् शुभम् । मुहूर्तराशौ नीचग्रहस्य योगः व दृष्टिः न भवेदित्यपि सूचयति ।[18]

मुहूर्तचिन्तापणिः – रिक्तापर्वतिथीन् त्यक्त्वाऽन्येषु तिथिषु, मृदुक्षिप्रध्रुवचरनक्षत्रेषु, एकादशे वा द्वादशे दिने नामकरणसंस्कारं कुर्यात् ।[19]

निष्कर्षः

अत्र कालविधानोक्तषोडशसंस्कारमुहूर्ताः, अनन्तरं समीक्षाख्यायामन्यग्रन्थोक्ताः षोडशसंस्कारमुहूर्ताश्च चर्चिताः । तषु मुहूर्तविचारेष्वाचार्याणां मध्ये नैके मतभेदाः दृष्टाः । तथैव केचनविशेषविचाराश्च केषचित् ग्रन्थेषु प्राप्ताः । संस्कारमुहूर्तकालस्याधारेण फलान्यपि

कुत्रचिन्निहितानि । एतेषां सर्वेषामपि विचाराणां कश्चन सङ्ग्रहः भागेऽस्मिन् निष्कर्षे प्रस्तौतुमिष्यते । तस्मिन् सर्वैः आचार्यैः स्वीकृतांशाः उत्तमरूपेण, केचन ग्रन्थेष्वेव विद्यमानाः मधयमरूपेण च प्रस्तूयन्ते । इत्येतेषामंशानां कश्चन लघुपस्तावः निष्कर्षनाम्ना कश्चन विभागऽपेण भागेऽस्मिन्नुपस्थाप्यते ।

नामकरणसंस्कारे रोहिणी, मृगशिराः, पुनर्वसुः, पुष्यः, उत्तराफाल्गुनी, हस्तः, स्वाती, अनुराधा, उत्तराषाढः, श्रवणः, धनिष्ठा, शतभिषक्, उत्तराभाद्रपदा, रेवती च नक्षत्राणि, प्रतिपदद्वितीयातृतीयापञ्चमीसप्तमीदशमीएकादशीत्रयोदशीतिथयः, चन्द्रबुधगुरुशुक्रवासराः, वृषभ-सिंहवृश्चिक कुम्भराशयः, मध्याह्नात् पूर्वकालः, लग्नाद्वादशभावशुद्धिः, जननाद्द्वादशदिनञ्च उत्तमानि भवन्ति । अश्विनीमघाचित्रनक्षत्राणि, चतुर्थी, षष्ठी, अष्टमी, द्वादशी, चतुर्दशी, पूर्णिमा च तिथयः, मिथुनकन्याधनुमीनराशयः, रविशनिवासरौ, जननात् दशमैकादशाष्टा-दशमासान्ताश्च मध्यमानि । किंस्तुघ्नं करणमशुभम् । केचनाष्टमदशमभावशुद्धिरपि कथयति । संस्कारेऽस्मिन् जन्मानुजन्मनक्षत्राणि शुभानि । जननादेकमासः अतीतश्चेत् विंशतितमे मासे नामकर्म शुभम् । तस्मिन्नपि न क्रियते चेत् गोचरवशात् पितापुत्र्योः शुभकाले सुदिने संस्कारः कार्यः । नामकरणमुहूर्ताश्रितानि केचन फलानि -

उच्चस्थितेन विहगेन युतोऽथ दृष्टे, लग्ने कृतं भवति नाम भुवि प्रसिद्धम् ।
नीचस्थितेन विकलं सुहृदृक्षगेण, लोकप्रियं परमपीत्यवदद्वसिष्ठः ।।[२०]

मुहूर्तलग्ने उच्चस्थस्य ग्रहस्य योगः वा दृष्टिः अस्ति चेत् सः बालः प्रसिद्धः भविष्यति । नीचगतस्य योगः वा दृष्टिः चेत् यशसः नाशः, बन्धक्षेत्रगतस्य योगः वा दृष्टिः वर्तते चेत् लोकप्रियत्वञ्च शिशोः भविष्यति ।

नामकर्ममुहूर्तस्य शुभाशुभत्वमाश्रित्य नैकानि फलान्याचार्यैः कथितानि दृश्यन्ते । तत्स्पष्टयति यत् नामकर्मसंस्कारमुहूर्तमाश्रित्य नाम्नः लोकप्रियत्वं यशः इत्यादयः तिष्ठन्तीति । अर्थात् नाम्नः यशसः कारणभूता व्यक्तेः प्रवृत्तिरपि मुहूर्ताश्रिता इति स्पष्टम् ।

सन्दर्भाः

1. आचारसङ्ग्रहः - उपोद्घातः 2,3
2. मुहूर्तपदवी - श्लो - 5 व्याख्या

3. संस्काराणां पर्यालोचनम् - पृ-65
4. मनुस्मृतिः - 3-31
5. मनुस्मृतिः - 2-33
6. मनुस्मृतिः - 3-9
7. संस्काराणां पर्यालोचनम् - पृ-66
8. कालविधानम्
9. कालविधानम्
10. मुहूर्तकल्पन्द्रुमः - 12-20
11. मुहूर्तकल्पन्द्रुमः - 12-22
12. मुहूर्तमार्ताण्डः - 3-5
13. बृहज्ज्यौतिषसारः - 8-11
14. पूर्वकालामृतम् - 1-17
15. मुहूर्ततत्त्वम् - 6-4
16. नारदसंहिता - 20-1 तः 4
17. मुहूर्तपदवी 11
18. माधवीयम् - 6 - 8,9
19. मुहूर्तचिन्तामणिः - 5-11
20. पूर्वकालामृतम् - 1-19

सन्दर्भग्रन्थसूची

1. आचारसङ्ग्रहः - वटशेरि परमेश्वरन् नम्पूतिरि, व्याख्या-चेरुवल्लि नारायणन् नम्पूतिरि, दैवज्ञपरिषद्, कोषिक्कोट्, 2012.
2. कालविधानम् - व्याख्याता टि. एन्. नाणुपिल्ल आशान्, एस्. टि. रेट्टिया आन्ट् सण्स्, विद्याभिवर्धिनि पब्लिक्केषन्स्, कोल्लम्, केरला, 1998.
3. नारदसंहिता - नारदमहामुनिः, व्याख्याता-आचार्य रामजन्म मिश्र, चौखम्भा संस्कृत संस्थान, वाराणसी, 2001.

4. बृहज्ज्यौतिषसारः - सम्पादकः -ज्यौ. आ. श्रीः पं. नारायणशर्मा, ठाकूरप्रसाद एण्ड सन्स बुक्सेलर, राजादरवाजा, वाराणसी
5. मनुस्मृतिः - सिद्धिनाथानन्दस्वामि, श्रीरामकृष्ण मठम्, तृश्शू, 1999.
6. माधवीयम् - व्याख्याता-पि. एस्. पुरुषोत्तमन् नम्पूतिरि, एस्. टि. रेट्टिया आन्ट् सण्स्, विद्याभिवर्धिनि पब्लिक्केषन्स्, कोल्लम्, केरला, 1987.
7. मुहूर्तकल्पन्द्रुमः - श्रीमद् विठ्ठलदीक्षितः, व्याख्याता - श्रीकृष्ण जुगनू, चौखम्बा सुरभारती
8. मुहूर्तचिन्तामणिः - रामदैवज्ञः, व्याख्याता-डा.रामचन्द्र पाठक, चौखम्बा संस्कृत भवन, वाराणसी, 2001.
9. मुहूर्ततत्त्वम् - श्री केशवदैवज्ञः, सम्पादकः-डा.श्रीकृष्ण जुगनू, चौखम्बा संस्कृत सीरीस, वाराणसी, 2007.
10. मुहूर्तपदवी (सर्वाधबोधिनी व्याख्या) - पुलियू पि. एस्. पुरुषोत्तमन् पोट्टि, 1911.
11. मुहूर्तमार्ताण्डः - श्री नारायणदैवज्ञः, व्याख्याता - केदारदत्त जोशी, मोत्तीलाल बनारसीदास, दिल्ली, 2004.
12. संस्काराणां पर्यालोचनम् - डा. जयकृष्ण मिश्रः, धर्मशास्त्रविभागः, जगन्नाथ विश्वविद्यालयः, ओरीसा, 2005.

सहायकाचार्य्यः (संस्कृतविभागः)

एस्. एस्. वी. महाविद्यालयः,

केरला ।

❖❖❖

वास्तुशास्त्रे मुहूर्त्तविचारः

✍डा. विष्णुकुमार निर्मल

(मानवस्य सुखित्वम्, दीर्घजीवित्वम्, नीरोगित्वम्, धर्मार्थकामसाधकत्वं च वास्तुशास्त्रफलसिद्धमित्यत्र नास्ति संशयः । वास्तुशास्त्रे मुहूर्त्तप्रयाजनमत्र विचारयति रचयिता । गृहारम्भस्य फले प्रतिमासं भिन्नतया शुभाशुभानि फलान्यश्नुवते गृहपाः । गृहारम्भे नक्षत्रवासरयोर्वैशिष्ट्यम्, अशुभयोगः, नक्षत्रशुद्धिरिति नैके विषयाः प्रतिपादिताः। वसिष्ठमतानुसारं गृहप्रवेशमुहूर्त्तविचारं कृत्वा गृहप्रवेशोपयोगिनश्चान्द्रमासानत्र रचयिता प्रतिपादयति । मुहूर्त्तचिन्तामणेर्बृहद्वास्तुमालायाश्च प्रमाणताबलेन रचनेयं परिपोषितेति बोधनीयो विषयः ।)

वसतीति वास्तु । यत्र मानवः स्वीयवासव्यवस्थायै धर्मार्थकामसाधनतायै च भवनं, मन्दिरं, जलाशयादि निर्माति, तत्सर्वं वास्तु इति अभिधोयते । अतः प्राचीनकालाद् आधुनिककालपर्यन्तं तथा भविष्यकालेऽपि वास्तुशास्त्रस्य बहुलव्यवहारः प्रचलनासीत्, प्रचलति, प्रचलिष्यति एव । वास्तुशास्त्रस्य सफलोपयोगाय पप्रथमं वास्तुसम्बन्धो शुभाशुभमुहूर्तविचारः करणीय इति शास्त्रसद्भावः वर्तते । शुभाशुभकालविचारपूर्वकवास्तुनिर्माणद्वारा मानवः सुखी, दीर्घजीवी, निरोगी, धर्मार्थकामसाधकश्च भवितुमर्हति ।

वृद्धनारदमते कालशुद्धिविचारः यथा बृहद्वास्तुमालायाम् –

आरम्भं च समाप्तिं च प्रासादपुरसद्मनाम् ।
उत्थिते केशवे कुर्यान्न प्रसुप्ते कदाचन ॥
चौत्रे शोककरं गृहादिविरचितं स्यान्माधवेऽर्थप्रदं
ज्येष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे ।
शून्यं भाद्रपदे त्विषे कलिकरं भृत्यक्षयं कार्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियं फाल्गुने ॥ बृ.वा. पृ.६७ ॥

पुर-प्रासाद-गहाद्यारम्भः, समाप्तिश्च भगवतः उत्थिते काले अर्थात् हरिबोधिनी-एकादशीतिथेरनन्तरं तथा हरिशयन-एकादशीतिथेः पूर्वे करणीयमिति शास्त्रसद्भावः। तथैव चौत्रमासे गृहारम्भः क्रियते चेत् शोकः, वैशाखे धनलाभः, ज्येष्ठमासे

मृत्युः, आषाढमासे पशुहानिः, श्रावणे पशुवृद्धिः, भाद्रपदे फलं शून्यम्, आश्विनमासे कलहः, कार्तिके भृत्यनाशः, मार्गशीर्षपौषयोः अन्नलाभः, माघमासे अग्निभयः, फाल्गुने श्रीलाभश्च जायते । तदपि रामदैवज्ञमते बृहद्वास्तुमालायाम् –

भौमार्करिक्तामाद्यूने चरो नाङ्गे विपञ्चके।
व्यष्टान्त्यस्थैः शुभैर्गेहारम्भस्त्र्यायारिगैः खलैः ॥ बृ.वा. पृ.७५ ॥

रविमङ्गलवासरयोः, रिक्तातिथिषु, सप्तमी-अमातिथ्योः, चरलग्ने, विपञ्चके धनिष्ठादिषु पञ्चनक्षत्रेषु' इति एतान् कालान् त्यक्त्वा तथा अष्टम-द्वादशभावयोः शुभग्रहविवर्जिते काले, तृतीय-षष्ठ-एकादशभावेषु पापग्रहाः संस्थिते काले गृहारम्भः शुभकरः भवति ।

गृहनिर्माणाय वृषवास्तुविचारः

बृहद्वास्तुमालायां यथा –

त्रिवेदवेदाग्नियुगाग्निवेदत्रिकेषु भानोः शशिभं गृहेषु ।
दाहो विनाशः स्थिरता धनं श्रीः शून्यञ्च दारिद्र्य मृतिक्रमेण ॥
बृ.वा. पृ.८६ ॥

सूर्यस्थितनक्षत्रात् चन्द्रस्थितनक्षत्रपर्यन्तं नक्षत्रगणनं क्रियते । तर्हि प्रथमत्रिषु नक्षत्रषु गृहारम्भः क्रियते चेत् गृहस्य दाहः वाच्यः । ततः चतुर्षु नक्षत्रेषु विनाशः । ततः चतुर्षु नक्षत्रेषु स्थिरता । ततः त्रिषु नक्षत्रेषु धनलाभः । ततः चतुर्षु नक्षत्रेषु श्रीलाभः । ततः त्रिषु नक्षत्रष गृहारम्भः क्रियते चेत् फलं शून्यम् । ततः चतुर्षु नक्षत्रेषु फलं दारिद्र्यम् । अन्तिमेषु त्रिषु नक्षत्रेषु गृहारम्भः क्रियत चेत् गृहकर्तुः मृत्युर्वाच्यः।

राहोर्मुखविचारः

देवालयारम्भे यदा सूर्यः मीन-मेषर्वृषराशिष्ववतिष्ठति तदा राहोर्मुखं ऐशान्यदिक् वर्तते। तथैव मिथुन-कर्क-सिंहराशिषु स्थिते सूर्ये सैंहिकेयस्य मुखं वायव्यदिकम्, कन्या-तुला-वृश्चिकराशिषु राहोर्मुखं नैर्ऋत्याम्, धनुर्मकर-कुम्भराश्यवस्थिते सूर्ये आग्नेय्यां राहोर्मुखं निश्चीयते । एवमेव गृहारम्भे सिंहकन्यादिषु त्रिषु त्रिषु राशिषु यदा सूर्यः समायाति तदा राहोर्मुखं यथाक्रमं ऐशान्याम्, वायव्याम्, नैर्ऋत्यां, आग्नेय्यां च वर्तते । तथैव जलाशयारम्भेऽपि

मकर-कुम्भादिषु त्रिषु त्रिषु राशिषु स्थिते सूर्ये राहोर्मुखं यथाक्रमं विलोमतः ऐशान्यां, वायव्यां, नैऋत्यां, आग्नेय्यां च ज्ञेयम् । अतः राहोर्मुखं ज्ञात्वा तस्य राहोः पृष्ठभागात् नाम विलोमक्रमे खातखनने शुभं भवेदिति अत्र रामदैवज्ञः स्वीयमुहूर्तचिन्तामणौ वदति यथा -

देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः ।
मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक्छुभा भवेत् ॥

मु.चि./वा.प्र./श्लो.सं. १९

गृहारम्भे नक्षत्र-वासरयोः वैशिष्ट्यम् -

बृहस्पतिवासरे यदा पुष्या, त्र्युत्तरा, रोहिणी, मृगशीरा, श्रवणा, आश्लेषा, पूर्वाषाढादिनक्षत्राणि वर्तन्ते तदानीं गृहारम्भः क्रियते चेत् गृहकर्तुः पुत्र-राज्यादिलाभो जायते ।

तथैव शुक्रवासरयक्तः विशाखा-चित्र-धनिष्ठा-शतभिषाऽऽर्द्रानक्षत्रषु गृहारम्भः क्रियते चेत् यदा धनधान्यवृद्धिर्जायते ।

मङ्गलवासरयुक्त-हस्ता-पुष्या-रेवती-मघा-पूर्वाषाढा-मूलानक्षत्रेषु गृहारम्भः क्रियते चेत्तद् भवनं ग्निदाहवशात् नष्टं जायते तदपि गृकर्तुः पुत्रनाशो जायते एव ।

तथैव बुधवासरयुक्त-रोहिण्यश्विनी-पूर्वाफाल्गुनी-चित्र-हस्तानक्षत्रेषु निर्मितं भवनं सुखशान्तिप्रदं भवति । यथा मुहूर्तचिन्तामणौ -

पुष्यध्रुवेन्दुहरिसर्पजलैः सजीवेस्तद्वासरेण च कृतं सुतराज्यदं स्यात् ।
द्वीशाश्वितक्षिवसुपाशिशिवैः सशुक्रैर्वारे सितस्य च गृहं धनधान्यदं स्यात् ।
सारैः करेज्यान्त्यमघाम्बुमूलैर्कौजेऽह्निवेश्माग्निसुतार्तिदं स्यात् ।
सज्ञैः कदास्त्रर्यमतक्षहस्तैर्यस्यैव वारे सुखपुत्रदं स्यात् ॥

मु.चि./वा.प्र./श्लो.सं. २६-२७

गृहारम्भेऽशुभयोगः

शनिवासरे पूर्वाभाद्रपद-उत्तराभाद्रपद-ज्येष्ठा-अनुराधा-स्वाती-भरणीनक्षत्रेषु गृहारम्भः क्रियते चेत्तस्मिन् गृहे राक्षसाः, पैशाचाश्च निवसन्ति । यथा रामदैवज्ञमतानुसारम् -

अजैकपादहिर्बुध्न्यशक्रमित्रनिलान्तकैः ।
समन्दैमन्दवारे स्याद् रक्षोभूतयुतं गृहम् ॥

मु.चि./वा.प्र./श्लो.सं. २८

गहनिर्माणार्थ बृक्षच्छेदनमुहूर्तः -

कृष्णपक्षचतुर्दश्यां तिथौ रोहिणी अथवा रेवतीनक्षत्रंगतगुरुः यदा लग्नस्थानं प्राप्नोति तदानीं गहनिर्माणार्थं वृक्षच्छेदनं कर्तव्यम् । एवञ्च यदा लग्ने शुक्रः, स्थिरराशियुक्ते केन्द्रस्थाने गुरुः इति एतादृश्यामवस्थायां काष्ठतृणाद्युपकरणैः गृहं निर्मीयते चेत् तस्य गृहस्याग्निभयं न भवति । यथा बृहद्वास्तुमालायाम् -

कृष्णपक्षे चतुर्दश्यां रेवतीरोहिणीयुते ।
यदा तदा गुरौ लग्ने गृहार्थं तु हरेद्दरुमान् ॥
शुक्रलग्ने गुरौ केन्द्रष्वगेराशौ गृहोपरि ।
तृणादिभिः समाच्छाद्ये न चौवाग्निभयं भवेत् ॥

बृ.वा./पृ.सं.२८

गृहारम्भे निषिद्धतिथयः -

प्रतिपदायां गृहारम्भः क्रियते चेत् दारिद्र्यम्, चतुर्थ्यां धनहानिः, अष्टम्यामुच्चाटनम्, नवम्यां शस्त्रभयः, चतुर्दश्यां स्त्रोहानिः, अमावास्यां राजभयश्च जायते । महर्षिभृगुमतानुसारं चतुर्थी, अष्टमी, अमावास्यादितिथिषु रवि-चन्द्र-मङ्गलवासरयुक्तेषु च गृहारम्भः नकरणीयः । यथा बृहद्वास्तुमालायाम् -

दारिद्र्यं प्रतिपत् कुर्याच्चर्थी धनहारिणी ।
अष्टम्युच्चाटनी ज्ञेया नवमी शस्त्रघातिनी ॥ इत्यादि ।

बृ.वा./पृ.सं.७२

गृहारम्भे नक्षत्रशुद्धिः –

चित्रा, अनुराधा, मृगशिराः, रेवती, पुष्या, उत्तराषाढा, उत्तराफाल्गुनी, उत्तराभाद्रपदः, रोहिणी, धनिष्ठा, शतभिषादिषु नक्षत्रेषु गृहारम्भः शुभप्रदः । महर्षिपराशरानुसारं चित्रा, शतभिषा, स्वाती, हस्त, पुष्य, पुनर्वसु, रोहिणी, रेवती, मूला, श्रवणा, उत्तराफाल्गुनी, धनिष्ठा,

उत्तराषाढा, उत्तराभाद्रपदः, अश्विनी, मृगशीराः, अनुराधादिषु नक्षत्रेषु वास्तुपूजा क्रियते चेत् लक्ष्मीप्राप्तिर्जायते । यथा बृहद्वास्तुमालायाम् –

चित्रशतभाषक्स्वाती हस्तः पुष्यः पुनर्वसुः ।
रोहिणी रेवती मूल श्रवणोत्तरफाल्गुनी ॥ इत्यादयः।

बृ.वा./पृ.सं.७३

गृहप्रवेशमुहूर्त्तविचारः

वसिष्ठमतानुसारं गृहप्रवेशोपयोगी चान्द्रमासाः यथा –

माघेऽर्थलाभः प्रथमप्रवेशे पुत्रर्थलाभः खलु फाल्गुने च ।
चौत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभः ॥
ज्येष्ठे च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च ।
शुक्ले च पक्षे सुतरां विवृद्धयै कृष्णे च यावद्दशमी च तावत् ॥
अत्रार्थः सुस्पष्टः।   मु.चि./गृ.प्र./पृ.सं.५६७

एवमेव वास्तुशास्त्रे वास्तूपयोगी बहवः मुहूर्त्तः निर्णीयन्ते । इत्युक्त्वा विषयविस्तरभयात् मदीयां वाणीम् उपसंहरोमि ।

सन्दर्भग्रन्थसूची

1. रामदैवज्ञविरचिता मुहूर्त्तचिन्तामणिः, चौखम्बाप्रकाशनम् 2001 ।
2. रामनिहोरद्विवेदेन संगृहीता बृहद्वास्तुमाला, चौखम्बाप्रकाशनम् 2003 ।

विभागाध्यक्षः (ज्योतिषविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
श्रीसदाशिवपरिसरः
पुरी, ओड़िसा

❖❖❖

राधाचरितमहाकाव्यसमीक्षा

✍डा. स्वर्गकुमारमिश्रः

(महाकविप्रवरस्य हरिनारायणदीक्षिताचार्यस्य राधाचरितमहाकाव्यमत्र समीक्ष्यते । सकलविद्यास्थानमेकायतनं पञ्चदशं काव्यं विद्यास्थानमिति यायावरीयवाक्यमनु-स्मारयन्निदं रचयिताऽनुवाचकानां पुरस्तात्प्रस्तौति । आधुनिकभारतस्य समाजव्यवस्थामिदं महाकाव्यं प्रतिनिदधातीति रचयिताऽनुवाचयति । सामग्रीपरिपोषेण परमा रसरूपता काव्यस्य काव्यतां निदर्शयति । भक्तिप्रस्थानस्य मार्गावलम्बि महाकाव्यमेतत् देवभक्तिपरं भक्तिरसायनसिद्धान्तपरमलौकिकानन्ददायकं समाधिचित्तवृत्तिपरमाह्लाद-प्रदायकमिति स्वाभाविकमुत्तमोत्तमत्वं राधाचरितमहाकाव्यस्य सुलभमिव प्रतिभातितमाम्। केलिमर उपसंख्यानमिति निष्कृष्टपदानि ग्रहेलिमः, भजेलिमः, सेवेलिमाः, त्यजेलिमम् इत्यादीनि हृदयावर्जकानि ।)

'काव्यं तु जायते जातु कस्यचित्प्रतिभावतः' । काव्यं लोकोत्तरवर्णनानिपुणस्य कवेः प्रतिभास्फुरितं सहृदयाहृदयावर्जकं किमप्यपूर्वं कर्म । कविः कल्पनानेत्रेण अतीतं भविष्यच्च द्रष्टुं पारयति । तदेव कवनकर्मणि अवश्यकवनीयत्वेन प्रकटितं काव्यपदेनाभिहितं भवति । संस्कृतसाहित्यजगति कविर्ब्रह्मणो मूर्त्तस्वरूपमिति कथ्यते । 'यथास्मै रोचते विश्वं तथेदं परिवर्तते' । अतः कविसृष्टिर्ब्रह्मणो सृष्ट्यापेक्षया गरीयसीति विविच्यते । किञ्च 'कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधत्शाश्वतीभ्यः समाभ्यः' इत्यादिना कवेः स्वातन्त्र्यं वेदेषु गीयते । कविः क्रान्तदर्शी स्रष्टा च । लोकोऽयं सामान्येन यत्पश्यति तदेव विशिष्टरूपेण कविः पश्यति । सः कल्पनायां भिन्नं राज्यं निर्माति तदाधारेण काव्यं च विदधाति । तस्य भावोद्वेलनं काव्यरूपं गृह्णाति । लोकस्थितभावानां व्यवहाराणाञ्च लोकोत्तरपरिप्रकाशनेनान्तःकरणं समुद्वेलयत्काव्यं जनमानसं कामं रञ्जयति स्वीकार्यम् । काव्यमेतच्चतुर्दशविद्यानामेकायतनं लोकोपदेशकरमिति शास्त्रकारैः स्वीक्रियते । उक्तञ्च राजशेखरेण – 'सकलविद्यास्थानमेकायतनं पञ्चदशं काव्यं विद्यास्थानम् इति यायावरीयः । गद्यपद्यमयत्वात् कविधर्मत्वात् हितोपदेशकत्वाच्च । तद्धि शास्त्रण्यनुधावति ।' इति[1]

नाट्यप्रयोजनप्रतिपादयता भरतेनापि काव्यस्य लोकोपदेशजनकत्वं सकलविद्यास्थानै-कायतनत्वं च प्रख्यापितम् । यदुक्तं तेन–

'धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद्भविष्यति ॥
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥
सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च ।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम् ॥' इति [२]

एवमेव सकलविद्यावैभवमण्डितं काव्यं लोकस्य स्वभावं कवनकमनीयतया प्रतिपाद्य अतिप्राचीनकालात् रामादिवद्वर्त्तितव्यमित्युपदेशप्रदानद्वारा विश्वं पावयति विद्याविनोदाय च यतते। भारतवर्षे काव्यलेखनस्य महीयसी परम्परा वैदिकोत्तरकालात् प्रचलन्ती दृश्यते । सा चार्षपरम्परा अद्यापि गौरवमयमस्माकमतीतं प्रख्यापयन्ती दिव्यते ।

वाल्मीकिव्यासभासकालिदासबाणादिकवीनां गौरवं को न जानाति ? कलापक्षभावपक्षदृष्ट्या रामायणमहाभारतादीनां भारतीयार्षकाव्यानां प्रसिद्धिः विश्वस्मिन् विश्वे राजतेतराम् । अद्यापि विविधैर्नवनवैः प्रकारैः एतानि काव्यानि नित्यं नूतनतां प्रकटयन्ति । संस्कृतसाहित्ये एवमेव नैकानि महाकाव्यानि रचितानि दृश्यन्ते । इदानीन्तनैरपि कविभिर्नैकानि काव्यरत्नानि सुरचितानि सन्ति । संस्कृतकविपरम्परा अद्यापि सुदृढा सुसम्बद्धा च वर्त्तते । राधाचरितमत्र निदर्शनम् ।

महानयं प्रस्तुतो द्वाविंशतिसर्गात्मको राधाचरितप्रबन्धरत्नाकरः । पारमस्य गन्तुं महान् प्रयासोऽपेक्षते । अतः समीक्षणात्मके सन्दर्भेऽस्मिन् संक्षिप्तपरिचयोऽत्र मया प्रस्तूयते । संस्कृतवाङ्मये कृतभूरिपरिश्रमाः विद्वन्मणयः डा. हरिनारायणदीक्षितमहोदयाः संस्कृतजनन्याः साहित्यभण्डारसंवर्धने कृतसंकल्पाः अद्यापि काव्यनिर्माणे प्रयत्नशीलाः नित्यं किमपि लिखन्तो नैनिताले वसन्ति । तेषां जीवनं संस्कृताय उत्सर्गीकृतं सार्थकं गच्छति । बाल्ये संस्कृताध्ययनं यौवने संस्कृताध्यापनं प्रौढे संस्कृतसाहित्यसंवर्धनं तेषां संस्कृतं प्रति महदवदानम् । साहित्यक्षेत्रे तेषां नैकाः मौलिकाः कृतयः राराजन्ते । चतुर्भिः महाकाव्यैः सह चतुर्दशसंख्यकानि काव्यानि आहत्य अष्टादशकाव्यानि तस्य अम्लानविरचनानि सन्ति । तेषां काव्येषु संस्कृतवाङ्मयस्य तथा च महतोऽस्य भारतवर्षस्य धर्मसंस्कृतिपरम्परारीतिनीत्यादर्शादीनां विश्लेषणं प्रतिपदं दृश्यते। एतदर्थं आभारतमेतेषां सम्मानं वरीवर्त्ती । एकादशसंख्यकानि महान्ति सम्मानानि एभिर्लब्धानि ।

एते अस्मज्जातीयकवयः इति मन्ये । तद्विरचितं निखिलसमाजसंस्कारकं राधाचरितमहाकाव्यमेकमान्दोलनम् । काव्यमिदं महद्भारतीयसंस्कृतेः प्रचारकं रामादिद्वय-व्यवहारस्य प्ररकं प्रकृतेः पालकं निर्मलप्रम्णः सञ्चारकं मनुष्यतायाः परिचायकं किमप्यनवद्यं विरचनम् ।

अस्मिन् महाकाव्ये द्वाविंशतिसंख्यकाः सर्गाः सन्ति । सर्गाणामपि नाम चिन्तनसर्ग-उद्बोधानसर्ग-सम्बोधनसर्ग-महाप्रस्थानसर्गप्रभृतिभिर्नामभिः यथास्वरूपं कल्पितमस्ति । दीनताग्रस्तमानवसमाजं संस्कर्त्तुः परमार्थतश्च प्रम्ण स्वरूपं प्रकाशयितुं रचितोऽयं महान् प्रबन्धाः जनमानसं परिमार्जितं करिष्यतीत्यत्र नास्ति सन्देहस्यावकाशः । सरलया सरसया वैदर्भ्या रीत्या प्रोतिपूर्णवचनरचनं कस्य वा प्रोतये न स्यात्? अतः साम्प्रतिके युगे काव्यस्यास्योपादेयता अनन्या ।

काव्यारम्भे चिन्तने सर्गे दैन्यग्रस्तव्रजवासिजनान् समुद्धर्त्तं राधादेव्याः प्रयासः सुमहद्गीतोपनिषत् 'क्लैब्यं मा स्म गम पार्थ' इति ध्येय[3] स्मारयति । सम्बोधने महाजनानां मार्गान्वेषणम्, क्रियायां तपः, अभिनन्दने जीवनमूल्यम्, प्रकृतिपोषणे कर्तव्यबोधः, देशनायाञ्च विधिनिर्द्देशः, महाप्रस्थाने स्वर्गमनम् आर्यनिष्ठायाः प्रशस्तं यत्किमपि चित्रमत्र मया दृष्टम्, यदस्य भारतवर्षे चिरात्प्रचलितायाः महत्परम्परायाः निदर्शनम्, यच्च मानवजीवनस्य चरमोपलब्धयः, यद्वा राधाकृष्णयोः अतीन्द्रियप्रमपराकाष्ठानिदर्शनं तदेव विश्ववास्तव्यानां परमार्थतः साधनमित्यहं मन्ये । अतो मया सोत्साहमस्य महाकाव्यस्य समीक्षणं विहितम् ।

राधाचरितं महाकाव्यं भारतीयनैतिकस्वतन्त्रतायाः प्रमाणभूतं नव्यमनवद्यञ्च प्रकल्पनम् । दीर्घपराधीनजर्जरितभारतीयजातीयचरित्रं यदा भूलुण्ठितं जातं तदा कर्मभूमावस्मिन् भारते युगप्रवर्त्तकरूपेण नैकानां महात्मनामाविर्भावोऽभूत् । स्वशिक्षया ते महानुभावाः एनां विश्रुतां सनातनपरम्परां पुनरुज्जीवितां कर्त्तुं यतमानाः सफलाश्च अभूवन् यथाऽद्य परिदृश्यते । कालगतौ याः काश्चन कुरीतयः परप्रभावादन्धानुकृतास्सन्ति तासां समूलोत्पाटनं निर्मलया सनातनपद्धत्या यथा भवेत्तदर्थं महाकविना तत्प्रतीकात्मकतया राधाचरितं व्यरचि । कोणानुकोणेऽद्यापि भारतभुवि दृश्यन्ते विद्यमानाः विविधाः विसंस्काराः । अनर्थिषु दैन्यमुत्पीडनादिकम्, अर्थिषु सदाऽहंकारिषु वर्वरता, अधिकारिषु प्रवञ्चना, पण्डितेषु पाखण्डता, वत्सेषु अविश्वासः, जनेषु असहनशीलता इत्यादिकमस्य राष्ट्रस्य उन्नतौ प्रतिबन्धका अद्यापि स्ववैजयन्तीं समुत्तोल्य

नृत्यन्ते सबहुमानिनः । अत एव शक्तः समुल्लासाय कृष्णप्रियराधाचरित्रस्य भव्यावतरणं महाकाव्येऽस्मिन् विहितम् । प्रमभक्तिरसः अत्र मुख्यः । कृष्णविषयिणी मधुरा रतिरत्र प्रमभक्तिरसो भवति । यदुक्तम् -

'सामग्रीपरिपोषेण परमा रसरूपता ।
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ॥
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।
एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत् ॥' इति [४]

किञ्च राधाकृष्णयोः विमलप्रमसुधारससञ्चरणमस्य महाकाव्यस्य चरमं लक्ष्यमिति मन्ये । कृष्णरतिः सर्वाद्भुताद्भुता । तत्स्वरूपनिरुपणं न सर्वात्मना सुकरमस्ति । कृष्णाय यत्किमपि सुखदुःखं सर्वमेव समर्पणीयत्वेन शान्त-दास्य-सख्य-प्रम-वात्सल्य-हास्य-भय-क्रोध-विस्मयादि जगज्जातं सकलजनगतं चित्स्वरूपं कृष्णभक्तित्वेनाङ्गीकृतमित्यहो भक्तिरसविवर्त्तनम् ! कंसोऽप्यत्र कृष्णभक्तरूपेण विचर्च्यते । तद्यथा-

अनन्यभावा जगदीश्वरं तं प्रम्णाथवा शत्रुयाथवा ये ।
ध्यायन्ति भक्त्या हि मृता लभन्ते ते तत्पदं ध्यानमहत्त्वमेतद्॥ इति [५]

राधादेव्याः कृष्णप्रोतिर्महीयते । लोकसिद्धतुच्छदेहभावनावशंवदत्वेन प्रमा नात्र प्रवर्तितः। आत्मसमीक्षणपरायणातीन्द्रियकामनाजगदत्र विनिर्मितं दृश्यते । नात्र प्राप्तव्यदातव्यचिन्ता कुत्रपि विद्यते । मानवीयसुस्थचेतनास्वरूपस्य नैसर्गिकस्य प्रम्णः परमावतारमूर्त्तिः राधा कृष्णहृदयवल्लभा रासेश्वरी कृष्णानुरागिणी चाह्लादिनी शक्तिमयी नित्यगोलकवासिनी विश्वमाता आधारशिलारूपेणावतीर्णा सती रतिं पुष्णातीति मोदन्तां विश्वजनाः । सैव काव्यनायिका अन्यापि कृष्णप्रिया, विरहिण्यपि कर्मयोगिनी, एकाकिन्यपि बहुसङ्गता अप्राप्तपदापि राजराजेश्वरी महाकाव्येऽत्र बहुशोभते । कृष्णोऽत्र काव्ये भावनायकत्वेन सर्वात्मा इव आप्रबन्धं परिव्याप्तः चिद्रूपेण विराजते । सर्वे अमी राधादीनि पात्राणि तत्प्ररणया तदर्थमेव परिचालितानि दृश्यन्ते । सर्वान् स्वाभिमुखीकुर्वन् सः फलमदृष्टरूपेण चिन्तयति । एवमपि अन्यानि पात्राणि अवान्तरकथाश्चा सर्वमिदं राधाचरितस्य महाकाव्यत्वं द्योतयति ।

राधाकृष्णयोर्मिलनात्मकेङ्गरसरूपेणात्र काव्ये विप्रलम्भेन सह वीररसः वरीवर्त्ती । विप्रलम्भस्यात्र प्रधानाङ्गत्वं तदाश्रयेणोत्साहस्याप्यङ्गत्वं सिद्धयति । प्रथमं तावत्

कृष्णवियोगेन गोपवासिभिस्सह राधायाः दैन्यं विप्रलम्भत्वं विशिनष्टि । तद्दैन्यमपाकर्तुं सुदूरविदग्धमेलनस्य च संघटनमिच्छता कविना मध्ये उत्साहपुष्टस्य वीरस्य निवेशनं विहितमित्यनयो रसयोरङ्गरसत्वमिति ।

काव्यमिदं त्रिगुणमयमपि विशेषरूपेण माधुर्यस्याभिव्यञ्जनेन चकासते । मधुरभक्तिरसव्यञ्जनपरेऽस्मिन् महाकाव्ये तदेव माधुर्यं प्रमुखतया दृश्यते । पदसंघटना चात्र तथैव विराजते । पदसंघटनादृष्ट्या महाकाव्यमिदं कालिदासप्रियवैदर्भीरीत्या गुम्फितं वर्त्तते । कविर्वरेण्यः डा. हरिनारायणः वैदर्भ्याः सञ्चारनिमित्तं कामं प्रयत्नः कृतो वर्त्तते । ललितपदगुम्फनम्, असमासाल्पसमासेन माधुर्यवदर्थसम्भारग्रहणम्, यथारसं शब्दार्थालङ्कार-योजनम्, चौतत्सर्वं वैदर्भीपरकमिति मन्ये । किं बहुना, सम्बाधनसर्गे नन्दमुखेन राधायाः वैदर्भीरीतियुक्तवचनरचनप्रकारं प्रशंसन् यदुक्तं तत्तस्य वैदर्भीप्रियतायाः अनन्यं प्रमाणम् । यदुक्तं तेन- **वैदर्भी ललिता शैली शोभतेऽस्याः सदा मुखे ।**

वाक्यश्रवणमात्रेण श्रोता श्रव्यं विबध्यते ॥ इति [६]

तथा च काव्ये प्रतिपद्यं वैदर्भ्याः प्रकाशनं दृश्यते अत्रेदाहृतानि सर्वाण्येव पद्यानि वैदर्भीरीत्या एव रचितानि, नात्र संशीतिः । तथापि पुनरुदाहियते । तद्यथा-

कलिन्दकन्या कमनीयकूले वृन्दावने कृष्णवियोगलीना ।

राधाभिधाना वृषभानुकन्या विचिन्तयन्त्यास्त कदम्बमूले ॥ इति [७]

महाकविना डा. हरिनारायणदीक्षितवर्येण शब्दालङ्काराणां प्रयोगे बाहुल्यं कुत्रापि न प्रदर्शितम् । किन्तु कवनकमनीयतया केषाञ्चिच्छब्दालङ्काराणां दर्शनमत्र लभ्यते । 'अर्थालङ्काररहिता विधवैव सरस्वती' इत्युक्तदिशा 'न कान्तमपि निर्भूषं विभाति वनिताननम्' चेति भामहोक्तदिशा अर्थालङ्काराणां रसानुकूलसमुचितप्रयोगो महाकाव्यत्वस्य वैशिष्ट्यम् ।

अत उच्यते-

काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कारः । इति

राधाचरितेऽस्मिन् महाकाव्ये महाकवेरलङ्कारप्रियतायाः निदर्शनं मे भाति । प्रायः सर्वेषां प्रमुखानामर्थालङ्काराणां प्रयोगोऽत्र दृश्यते । तत्र उपमा यथा-

गोप्योऽपि गोपाल तवागमाशां प्रक्षीयमाणामधुनानुभूय ।

भवन्ति शीर्णा विरहानलेन निदाघतप्ता लतिका इवात्र ॥ इति [८]

राधाचरिते प्रायशः सर्वेषां अनुष्टुब्-उपजाति-वसन्ततिलका-मालिनि-शार्दूलविक्रीडित-द्रतविलम्बित-मन्दाक्रान्ता-आर्यादीनां प्रयोगः कृतो दृश्यते । तथा हि सम्बोधने (तृतीये) संवादे (सप्तमे) गुरुजनदर्शने (अष्टादशे) मन्त्रणासर्गे (विंशे सर्गे) च अनुष्टुब्छन्दसः प्रयोगः विचाराणामुपस्थापनाय कृतो वर्त्तते । इन्द्रवज्रा-उपेन्द्रवज्रयोः सम्मिलनेन उपजातेः प्रकारमाश्रित्य अत्र चत्वारः सर्गाः कविना प्रपञ्चिताः । तथैव वंशस्थ-इन्द्रवंशायाः मेलन उपजातेश्छन्दसः सप्तसंख्यकेषु सर्गेषु विस्तृतभावेन कविना पद्यानि काव्येऽस्मिन् रचितानि । विरहद्योतके प्रतीक्षासर्गे मन्दाक्रान्ताप्रयोगः रसनिष्पत्तिदृष्ट्या चमत्कारकर इति कालिदासीये प्रसिद्धः । तच्छन्दसा रचिते सर्गे विरहशोभा बहुगुणिता दृश्यते । उदाहरणं यथा-

'त्वं जानीषे मम सहचरीं वल्लभां प्राणभूतां राधादेवीं व्रजवसुमतीं भूषयन्तीमिदानीम् । तस्याः पार्श्वे सततगमनो याहि हे मातरिश्वन् सन्देशं मे कथय च सखे वक्षमाणं परस्तात् ॥' इति[9]

एवञ्च सर्गान्ते प्रयुक्तच्छन्दःसु वसन्ततिलक-मालिनी-शार्दूलविक्रीडित-औपच्छन्दसिकादीनां प्रयोगः कविना कृतो दृश्यते ।

राधाचरितमहाकाव्यं यद्यपि नामतः पौराणिकं प्रतीयते तथापि आधुनिकभारतस्य सामाजिकप्रभावेण ऋद्धिमन्तं सुरचनमिदं प्रतिपदं भारतीयसमाजव्यवस्थायाश्चित्रं याथार्थ्येन प्रस्तौति । अत्र विरहपीडितापि राधा दैन्यदुर्द्दशाग्रस्तसमाजस्य संस्कारकर्मणि स्वात्मानं विनियोज्य यशो लभतेति वार्त्ता प्रसारिता दृश्यते । नारीशिक्षाया प्रसारार्थञ्च सा यतते । जनानां धर्मधनवर्धनाय पूजापाठनिमित्तं च प्रचोदयति । एवमेव संस्कारकर्मसु नारीणामपि भूमिका यथा स्यात्तदर्थमत्र चेष्टा विहिता ।

राधया उपदिष्टा व्रजवासिनः शिक्षया कौशलमवाप्य व्रजस्योन्नतिं कुर्वन्तीति लक्ष्यते । यदुक्तं महाकविना-

शनैः शनैर्ज्ञादिवाकरो व्रजे प्रसारयामास समुज्ज्वलान् करान् ।
यत्सेवनेनापगतं पुरातनं सङ्कोचशैत्यं क्रमशो व्रजौकसाम् ॥

किञ्च-

समुन्नतिं तत्र विलोक्य शैक्षिकीं सामाजिकीं सांस्कृतिकीं तथार्थिकीम् ।
नारीनराणाञ्च समानमान्यतां निरीक्ष्य राधा मुमुदे स्वमानसे ॥ इति[10]

एवमेव उन्नतसमाजनिर्माणव्यवस्थात्र काव्ये प्रदर्शिता समाजतत्त्वं समृद्धं विदधाति ।

किञ्च प्रकृतिपोषणसर्गे वनवृक्षगिरिभूमिनदीवायुरूपायाः प्रकृतेः सुविनियोगद्वारा महल्लाभं दुरुपयोगेण च हानिं प्रदर्श्य समाजकृते तदावश्यकता कविना प्रकटीकृता । तत्र प्रकृतेः लाभं प्रदर्शयन् यदुक्तम् –

भूरापोऽग्निर्वायुर्गगनं चेत्यस्ति पञ्चधा प्रकृतिः ।
स्वार्थं विना जगत्यां हितं विधत्ते सदा नृणाम् ॥ इति [११]

प्रकृतिः प्राणिसामान्यहिताय भवति । तन्नाशं सर्वथा निन्दनीयमिति प्रकटयन्ती कविवाक् यथा–

दुरुपयुञ्जते लोके ये पुरुषाः प्राणिपालनीं प्रकृतिम् ।
ते बत मदिरापाने व्ययितं विदधति पितुः कोषम् ॥ इति[१२]

व्रजजनान् प्रकृतिपोषणाय सदुपदेशदानच्छलेनात्र समाजस्य महते उपकाराय चेष्टा कृता वर्त्तते ।

एतेन सह भविष्यत्काले समाजे सम्भावितावक्षयस्य सूचनाप्यत्र प्रदत्तास्ति । कलिप्रवेशात् असभ्यता यदा बहुमान्या भविष्यति समाजे च वर्वरता प्रसरिष्यति तदा सभ्यानां जीवनोपायाः कीदृशो भवेदित्युपदेशः आधुनिकभारतीयसमाजस्य महते उपकाराय भवेदितीदमपि समाजतत्त्वमत्र लभ्यते । सामाजिकावक्षयं सूचयन् कविर्वदति –

आत्मानभिज्ञास्तनुकान्तिलोभिनः कर्मानभिज्ञा धनवृद्धिकाङ्क्षिणः ।
सदा च कामोन्मुखचित्तधारिणः प्रायो भविष्यन्ति जनाः कलौ युगे ॥ इति[१३]

कलौ परिवारव्यवस्था भूलुण्ठिता भवेत् । पितृत्वं कामं नश्येत् । पुत्रत्वं वा कदाचित्कलङ्कितं स्यादित्याशङ्क्य तेनोक्तं यद् –

उपेक्ष्य मातापितरौ निजौ सुतः श्वश्रूं सदैव श्वशुरं श्रयिष्यते ।
वचः प्रमाणं भविता तयोर्यथा तथा न मातुर्न पितुश्च तत्कृते ॥ इति [१४]

महाकाव्यस्यास्यानुशीलनेन स्वाधीनोत्तरभारतवर्षस्य राजनैतिकपरिप्रक्षं सर्वत्र दृष्टिगोचरं भवति । यथास्माकं दशजननी बहुकालात् शकहूणाफगान्तुर्काङ्ग्लादिभिः वैदेशिकैः दीर्घपराधीना कियद्वर्षपूर्वमेव स्वातन्त्र्यमगात्तथैवात्र क्रूरकंसस्य वधानन्तरं कृष्णः मथुरां व्रजभूमिं

च परित्यज्य देशरक्षणाय द्वारकायां वसतीति वार्त्तामाध्यमेन कंससद्भावपराधीनहीनतायाः सूचना प्रस्तूयते । उक्तञ्च–

पूतनां शैशवे हत्वा बाल्ये वत्सासुरं तथा ।
अघासुरं तृणावर्त्तं क्रूरचेष्टं वकासुरम् ॥
गजं कुवलयापीडं विक्रामन्तं यमोपमम् ।
चाणूरं च महामल्लं क्रूरं कंसं च मातुलम् ॥ इति[१५]

कंसोऽत्र व्रजो वा प्रतीकात्मकः । कंसरूपायाः पराधीनतायाः कष्टात् भारतवर्षं मुक्तमासीदिति कृत्वा जनाः सुखिनो भवितुं प्रयासं करिष्यन्तीति राधाप्रदत्तसूचनानुसारं यद्यप्यत्र देशे स्वाधीनता आगताऽऽसीत्तथापि राजनैतिकभूमिः सुदृढा नासीत्, यतो हि जनानामुन्नतये राजनैतिकव्यवस्थया तथा प्रयासो नाभवत् । दीनता देशे व्याप्ता चासीत् । जनाः पराधीनतायाः ग्लानिमनुभवन्त एव कर्मविमुखाः लक्ष्यन्ते । शिक्षास्वास्थ्यकर्म-नियोजनसदाचारपरम्परादीनि सामाजिकानि तत्त्वानि देशे राजनीत्या एव सुनियन्त्रितानि भवन्ति । अशिक्षान्धश्रद्धासदाचारहीनतादिषु सत्सु अपि संस्कारव्यवस्था कयाचिद् राजनैतिकसंस्थया प्रसृता नैवात्र दृश्यते । स्त्रीणां सामाजिकी स्थितिः तथा प्रशंसनीया नासीत् । अतः स्वाधीनोत्तरकालोऽपि पराधीनताजर्जरित–भारतवर्षजनानामत्र चित्र प्रस्तुतम् । देशस्य शासनव्यवस्थायां नातिदृढायां जनाः अन्धकूपे भ्रमन्तः स्वप्रतिष्ठाविषयं विस्मरन्तोऽत्र दृश्यन्ते । अतस्तेषामस्मितां भारतवर्षस्य च प्रतिष्ठां सम्बर्धनाय नैके महात्मानः चेष्टितवन्तः तेषु राधाभिधानः कश्चिदत्र प्रतीकात्मतया कविनोपन्यस्तम् । न केवलं राधामात्रमपि तु सर्वे जनाः अत्र काव्ये प्रतीकात्मकत्वं भजन्ते ।

सामाजिकतादृष्ट्यापि काव्यमिदं साधुकृतं महाकविना । अत्र भारतीयसांस्कृतिकचित्रं सुप्रस्तुतम् । भारतीयपर्वपालनप्रकारः, पारिवारिकव्यवस्था, राष्ट्रनिर्माणपरिप्रक्षं यथावसरं विन्यस्यादर्शस्थानीयमिदं महाकाव्यं तेन निरमायि । किञ्च भव्यभारतनिर्माणाय महाकवेः बौद्धिकं प्रयत्नोऽत्र श्लाघनीयोऽस्ति । व्रजभूमेः समुन्नतिविधानप्रदर्शनच्छलेन भारतवर्षस्योन्नतिं साधितुकामः महाकविः जन्मभूमिं प्रति श्रद्धां समुत्पादयन् कथयति –

विपन्निमग्नां निजमातृभूमिं न सेवते यस्स जनो जघन्यः ।
पापाग्निनानेन जनस्य तस्य सञ्जायते सञ्चितपुण्यदाहः ॥

सेव्या यथा स्वा जननी जनेन तथैव सेव्या निजजन्मभूमिः ।

इमे उभे सेव्यतमे मते स्तः कार्य्यः प्रमादो न कदापि चाभ्याम् ॥ इति [१६]

कर्त्तव्यबोधाः देशात्मबोधेन सह जायमानः नितरां शोभते । अन्यथा स्वार्थान्धेन चेतसा अपकर्माणि क्रियन्ते येनान्येषां हानिर्जायते । अतस्तदेव सत्कर्म यन्न परस्य बाधकम् । अतः कविनाऽत्र सम्वदितम्-

कर्त्तव्यहानिर्यदि जायते तदा योगो न काम्यो मतमेतदस्ति मे ।

हत्वा परार्थं तु निजार्थसाधना महीयसी क्वापि मता न भारते ॥ इति [१७]

आप्रबन्धामत्र रामादिवद्भवितुमुपदेशाः प्रदत्ताः सन्ति । सत्कर्ममयजीवनं यापयितुं कदाचिद्राधामुखेन कदाचिच्च कृष्णमुखेन महाकविना उपदेशाः श्राविताः । एतदर्थं एकविंशतिसर्गस्य पूर्णसमर्पणमुल्लेखनीयमस्ति । देशनासर्गनाम्ना प्रकल्पितेऽस्मिन् सर्गे कलौ मानवेन कथं भवितव्यमिति सूचिताः व्रजजनाः । उक्तञ्च -

धर्मस्य पन्था अपि न त्यजेलिमं कदापि नाधर्म्मपथो ग्रहेलिमः ।

जनैस्स्वपुण्यस्य कृते यतेलिमं पापान्धकूपे च न वै पतेलिमम् ॥

सदा सदाचारपथे चलेलिमं परस्परं प्रोतियुतैर्वसेलिमम् ।

त्यजेलिमा नैव मनुष्यतागुणाः सदा च कृष्णो भगवान् भजेलिमः ॥

त्यजेलिमा नैव कदापि सद्गुणाः सेवेलिमा नैव कदापि दुर्गुणाः ।

रक्षेलिमं मानवजातिगौरवं देहात्मशुद्ध्यै च सदा यतेलिमम् ॥

सेव्या सदा बृद्धजनाः स्वजीवने न चापमान्या महिलाजनाः क्वचित् ।

इदं द्वयं शास्त्र्धानैमनीषिभिर्मूलं मतं सभ्यसमाजसद्मनः ॥ इति [१८]

एवमेव कलापक्षभावपक्षदृष्ट्या चेदं राधाचरितमहाकाव्यमपूर्वमनवद्यं मे आभाति । मन्ये समवेदिनरू यहृदयाः मे श्रमं सफलं करिष्यन्ति । यतो हि सहृदयाः गुणग्राहिणो भवन्ति । तदुक्तं व्यक्तिविवेके-

परिपवनवदथवा ते जात्यैव न शिक्षितास्तुषग्रहणम् ॥ इति

सन्दर्भाः

1. द्वितीयोऽध्यायः, काव्यमीमांसा, पृ. 55
2. 116-118/1 नाट्यशास्त्रम्
3. 3, द्वितीयाध्यायः, श्रीमद्भगवद्गीता
4. 4, 5 दक्षिणविभागे प्रथमलहरी, श्रीहरिभक्तिरसामृतसिन्धुः
5. 39, एकोनविंशतिसर्गः, राधाचरितम्
6. 25, सम्बोधनसर्गः, राधाचरितम्
7. 1, सम्बोधनसर्गः, राधाचरितम्
8. 34, चिन्तनसर्गः, राधाचरितम्
9. 24, प्रतिक्षासर्गः, राधाचरितम्
10. 24, 47, क्रियासर्गः, राधाचरितम्
11. 13, प्रकृतिपोषणसर्गः, राधाचरितम्
12. 12, प्रकृतिपोषणसर्गः, राधाचरितम्
13. 27, देशनासर्गः, राधाचरितम्
14. 36, देशनासर्गः, राधाचरितम्?
15. 77, 79, सम्बोधनसर्गः, राधाचरितम्
16. 63, 64, प्रथमसर्गः, राधाचरितम्
17. 29, द्वितीयसर्गः, राधाचरितम्
18. 151, 152, 153, 155, एकविंशतिसर्गः, राधाचरितम्

सन्दर्भग्रन्थाः

1. श्रीमद्भगवद्गीता
2. नाट्यशास्त्रम्
3. श्रीहरिभक्तिरसामृतसिन्धुः
4. काव्यमीमांसा
5. काव्यालङ्कारः, भामहः
6. काव्यालङ्कारसूत्राणि

7. व्यक्तिविवेकः
8. राधाचरितमहाकाव्यम्

संविदाध्यापकः (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

हिन्दी वाङ्मय में संस्कृत वाङ्मय का प्रभाव

✍डा. संजय कुमार मिश्र

(संस्कृत भारत की शास्त्रीय भाषा है उसे देववाणी या सुरभारती कहा जाता है । यह दुनिया की सबसे पुरानी भाषाओं में से एक है । संस्कृत हमारी संस्कृति है, संस्कार है, संस्कृत में विश्व का कल्याण है, शांति है एवं वसुधैव कुटुम्बकम् की भावना है। संस्कृत कई भारतीय भाषाओं की जननी है जिसमें हिन्दी को प्रमुख स्थान प्राप्त है । संस्कृत-हिन्दी में मां-बेटी का सम्बन्ध माना जाता है । अतः संस्कृत (मां) का हिन्दी (बेटी) पर प्रभाव अवश्य ही पड़ेगा । हिन्दी का सम्पूर्ण वाङ्मय संस्कृत वाङ्मय से प्रभावित है चाहे वह कोई भी विधा हो । डॉ. संजय कुमार मिश्र जी ने श्रीमद्भागवत, वाल्मीकि रामायण, अध्यात्म रामायण, मेघदूत आदि संस्कृत वाङ्मय का प्रभाव हिन्दी वाङ्मय रामचरित मानस, सूरसागर (भ्रमरगीत), साकेत, उद्धव शतक, भारतेन्दु हरिश्चन्द्र रत्नावली आदि पर बड़ी सजगता से प्रस्तुत किया है । उनका यह पयास गहन अध्ययन को दिखाता है ।)

हिन्दी ही नहीं अपितु सम्पूर्ण जगत में बोली जाने वाली भाषाएँ तथा उनके साहित्य या तो पूर्ण रूपेण संस्कृत पर आधृत हैं अथवा आंशिक रूप से तो अवश्य ही हैं । सभी भारतीय भाषाओं के साहित्य की भाँति हिन्दी वाङ्मय भी संस्कृत वाङ्मय से अनेक अंशों में प्रेरित, प्रभावित एवं अनुप्रमाणित रहा है । पूर्ववर्त्ती प्राकृत, पालि और अपभ्रंश भाषा में भी प्रचुर मात्रा में संस्कृत वाङ्मय का अनुकरण हुआ है । प्रेरणा, प्रभाव और अनुकरण में तात्त्विक भेद हैं । प्रेरणा कवि और कृति की सृजन-चेतना के संस्कार को प्रबुद्ध करती है; प्रभाव इस सृजन-चेतना को अपनी छाया से अभिभूत करते हुये उसका मार्गदर्शन और दिशा-निर्धारण करता है तथा अनुकरण में किसी पूर्ववर्त्ती सरणि का यथावत अनुसरण की प्रवृत्ति प्रबल होती है जो कभी-कभी मात्र भाषान्तर अथवा अनुवाद का रूप धारण करती है । प्रेरणा प्रतिभा का स्फुरण करती हुई उसकी मौलिकता का संरक्षण करती है, प्रभाव प्रतिभा को अभिभूत करता हुआ उसकी स्वतंत्र संरक्षणशीलता का नियमन करता चलता है और अनुकरण स्वच्छन्द गति को अवरुद्ध करता है । हिन्दी साहित्य के विश्व-विश्रुत

विद्वान कविकुलगुरु गोस्वामी तुलसीदास जी न संस्कृत वाङ्मय से प्रेरणा ली तथा अनुकरण भी किया । भागवत में जिस नवधा भक्ति की चर्चा भगवान व्यास जी करते हैं-

श्रवणं कीर्तनं विष्णोः स्मरणं पाद सेवनम् । अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥[१]

उसी को विस्तार देकर गोस्वामी तुलसीदास जी ने रामचरितमानस में वर्णित किया-

प्रथम भगति संतन्ह कर संगा । दूसरि रति मम कथा प्रसंगा ।
गुरु पद पंकज सेवा तीसरि भगति अमान ।[२]
चौथि भगति मम गुन गन करइ कपट तजि गान ॥
मंत्र जाप मम दृढ़ बिस्वासा । पंचम भजन सो बेद प्रकासा ॥
छठ दम सील विरति बहु करमा । निरत निरंतर सज्जन धरमा ॥
सातवँ सम मोहि मय जग देखा । मोतें संत अधिक करि लेखा ।
आठवँ जथालाभ संतोषा । सपनेहुँ नहिं देखइ पर दोषा ॥
नवम सरल सब सन छलहीना मम भरोस हियँ हरष न दीना ॥

आदिकवि वाल्मीकि द्वारा प्रणीत महाग्रन्थ रामायण में भरत जी को ससैन्य आते देखकर लक्ष्मण जी उनके प्रति शंकालु हो उठते हैं, उनका पुरुषत्व एवम् क्रोध जाग्रत हो उठता है, वह उत्तेजित होकर श्रीरामजी से कहने लगते हैं-

सम्पन्नं राज्यमिच्छस्तु व्यक्तं प्राप्यभिषेचनम् ।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥
कैकेयीं च बधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाश्च महता मेदिनी परिमुच्यताम् ॥
अद्येमं संयतं क्रोधमसत्कारं च मानद ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥[३]

वाल्मीकि जी के इन्हीं भावों से प्रेरित गोस्वामी तुलसीदास जी के लक्ष्मण जी भी भरत जी के ससैन्य आगमन व श्रीरामजी के अन्तर्द्वन्द्व का देखकर अत्यन्त क्षुब्ध हो उठते हैं तथा सानुज भरत एवं उनकी सम्पूर्ण सेना को मारने के लिए उद्यत हो जाते हैं-

एतना कहत नीति रस भूला । रन रस बिरपु पुलक मिस फूला ।
प्रभु पद बंदि सीस रज राखी । बोले सत्य सहज बलु भाषी ॥

अनुचित नाथ न मानब मोरा । भरत हमहि उपचार न थोरा ।
कहँ लगि सहिअ रहिअ मनु मारें । नाथ साथ घनु हाथ हमारे ॥
छत्रि जाति रघुकुल जनम राम अनुग जगु जान ।
लातहुँ मारें चढ़ति सिर नीच को धूरि समान ॥
उठि कर जोरि रजायसु मागा । मनहुँ बीस रस सोवत जागा ।
बाँधि जटा सिर कसि कटि भाथा । साजि सरासनु सायकु हाथा ॥
आजु राम सेवक जसु लेऊँ । भरतहि समर सिखावन देऊँ ।
राम निरादर कर फलु पाई । सोवहुँ समर सेज दोउ भाई ॥[४]

इसी प्रकरण को साकेतकार राष्ट्रकवि मैथिलीशरण गुप्त जी लक्ष्मण जी के श्रीमुख से इस प्रकार कहलवाते हैं-

आये होंग यदि भरत कुमति वश वन में
तो मैंने भी संकल्प किया है मन में ।
उनको इस शर का लक्ष्य चुनूँगा क्षण में ।
प्रतिषेध आपका भी न सुनूँगा रण में ॥[५]

इसी प्रकार आध्यात्म रामायण में सीताजी को अपने प्रियतम श्रीरामजी का रुख परखने वाली पत्नी के रुप में वर्णन है । सीताजी ने अपने प्रेम, आज्ञापालन, नम्रता, इन्द्रियसंयम, लज्जा और भीरुता आदि गुणों से पति का मन हर लिया था-

सीता प्रेम्णानुवृत्या च प्रश्रयेण दमेन च ।
भर्तुमनोहरा साध्वी भावज्ञा च ह्रियाभियाम् ॥[६]

गोस्वामी तुलसीदास जी ने भी इस प्रसंग से अभिप्रेरित होते हुये सीताजी के गार्हस्थ जीवन का अपेक्षाकृत अधिक सौम्य और आदर्शपूर्ण चित्र प्रस्तुत किया है-

पति अनुकूल सदा रह सीता । सोभा खानि सुसील बिनीता ।
जानति कृपा सिंधु प्रभुताई । सेवति चरन कमल मन लाई ॥
जद्यपि गृह सेवक सेवकिनी । विपुल सदा सेवा बिधि गुनी ॥
निज कर गृह परिचरजा करई । रामचन्द्र आयसु अनुसरई ॥
जेहिं बिधि कृपासिंधु सुख मानइ । सोइ कर श्री सेवा विधि जानइ ।

कौसल्यादि सासु गृह माहीं । सेवत सबन्हि मान मद नाहीं ॥[७]

महर्षि वेदव्यास प्रणीत भागवत जी में वर्णित गोपीगीत परम्परा का हिन्दी के समस्त कृष्णाश्रयी कवियों ने अनुकरण किया है । श्रीभागवत के दशम स्कन्ध में गोपियाँ विरहाकुलावस्था में जड़ तथा चेतन में भी भेद नहीं कर पाती । वे वनस्पतियों तथा पेड़-पौधों से श्रीकृष्ण जी का पता पूछती हैं-

गायन्त्य उच्चैरमुमेव संहता, विचिक्युरुन्मत्तकवद वनाद् वनम् ।
प्रपच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ।[८]
कच्चित् कुरबकाशोकनागपुन्नागचम्पकाः ।
रामानुजो मानिनीनामितो दर्पहरस्मितः ॥[९]

हिन्दी वाङ्मय के कवियों में महात्मा सूरदास जी का गोपीगीत अथवा भ्रमरगीत अपेक्षाकृत अधिक परिपुष्ट, व्यापक, उदात्त तथा मर्मस्पर्शी है । विरह के क्षणों में विरही के काम, स्वार्थ एवं दर्प का विगलन हो जाता है । उसमें उदारता, तन्मयता, त्याग और आत्म समर्पण की भावना जाग्रत हो जाती है । सूरदास जी की गोपियाँ श्रीकृष्णजी की अनुपस्थिति में भी मधुबन के हरे-भरे रहने पर आश्चर्य व्यक्त करती हुई कहती हैं-

मधुबन तुम कत रहत हरे । बिरह बियोग स्याम सुंदर के ठाढ़ें क्यों न जरें ।
तुम हौ निलज लाज नहिं तुमको फिर-फिर पुहुप धरे ।[१०]

सूरदास जी के विरहगीत में भारतीय आचार्यो द्वारा प्रतिपादित विरह भेदों एवं विरह दशाओं का सफलतापूर्वक चित्रण है । उनके विरह के पदों में पुर्वानुराग, मान, प्रवास एवम् करुण का प्रचुर वर्णन मिलता है-

अति मलीन बृषभानु कुमारी ।
हरि स्रम जल भीज्यों उर अंतर ता लालच न धुवावति सारी ।
अध मुह रहति उरध नहिं चितवति ज्यों गथ हारे चकित जुआरी ।
छूटे चिकुर बदन कुम्हलानो ज्यों नलिनी हिमकर की मारी ।
ळरि संदेस सुनि सहज मृतक भई इक बिरहिन दूजे अलि जारी ।[११]

काव्य जगत में अतुलनीय कृति मेघदूतम् का छाया रूप में हिन्दी के अधिकांशतः कवियों ने अनुकरण किया है चाहे वह सूदास जी की गोपियों का उद्धव के प्रति संदेश

का हो अथवा अयोध्या सिंह उपाध्याय 'हरिऔध' जी की नायिका का अपने नायक के प्रति अतुलनीय बादल संदेश का सर्वत्र संस्कृत वाङ्मय का छटा परिलक्षित होती रहती है । कविकुल शिरोमणि कालिदास जी ने अपनी अन्यतम कृति मेघदूतम् में सर्वप्रथम बादलों को सन्देशक के रुप में प्रयुक्त किया है-

त्वामारुढं पवनपदवीमुद्गृहीतालकान्ताः ।
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययाश्र्वसन्त्यः ।
कः संनद्धे विरहविधुरां व्यरयुपेक्षेत जायां ।
न स्यादन्योप्यहमिव जनो यः पराधीनवृत्तिः ॥[१२]

हिन्दी साहित्य के ब्रजभाषी कवि जगन्नाथ दास रत्नाकर जी ने भी गोपियों के श्रीमुख से उद्धव द्वारा श्रीकृष्ण जी को सन्देश कहलवाया है-

ऊधौ यहै सूधौ सौ संदेश कहि दीजौ एक
जानति अनेक ना बिबेक ब्रजनारी हैं ।
कहै 'रत्नाकर' असीम रावरी तौ छमा
छमता कहाँ लौं अपराध की हमारी हैं ।
दीजै और ताजन सबै जो मन भावै पर
कीजै न दरस-रस बंचित बिचारी हैं ।
भली हैं बुरी हैं औ सलज्ज निरलज्ज हू हैं
जे कहै सो हैं पै परिचारिका तिहारी हैं ॥[१३]

रत्नाकर जी की ही भाँति आधुनिक हिन्दी साहित्य के जनक भारतेन्दु हरिश्चन्द्र जी ने भी अपनी गोपियों के श्रीमुख से उद्धव के माध्यम से श्रीकृष्ण जी को सन्देश कहलवाया है- **तुम ऊधौ यही कहियो उनसों हम और नहीं कुछ जानती हैं ।**
पिय प्यारे तिहारे निहारे बिना अखियाँ दुखियाँ नहीं मानती हैं ॥[१४]

संस्कृत वाङ्मय के प्रमुख भक्तिपरक ग्रन्थों वाल्मीकि रामायण, आध्यात्म रामायण, अष्टादश पुराण, हनुमन्नाटक, प्रसन्नराघव का किसी न किसी रुप में हिन्दी वाङ्मय के कवियों, लेखकों ने अनुकरण किया है । हिन्दी की कुछ कहानियों, उपन्यासों नाटकों आदि में भी संस्कृत वाङ्मय का आश्रय लिया गया है । नेन्द्र कोहली जी का उपन्यास-महासमर

महाभारत के युद्ध से अभिप्रेरित है, वाल्मीकि रामायण से श्रीरामचरितमानस, भागवत से सूरसागर । यह परम्परा आगे भी चलती रहेगी । हिन्दी वाङ्मय सदा संस्कृत वाङ्मय का ऋणी रहेगा ।

सन्दर्भ

1. श्रीमद्भागवत-7/5/23
2. रामचरितमानस-3
3. वाल्मीकि रामायण-2/96
4. रामचरितमानस 2/229-230
5. साकेत-अष्टम् सर्ग
6. आध्यात्म रामायण-7/4/31
7. रामचरितमानस 7/24
8. श्रीमद्भागवत - दशम स्कन्ध - 30/4
9. श्रीमद्भागवत - दशम स्कन्ध - 30/6
10. सूरसागर - भ्रमरगीत ।
11. सूरसागर - भ्रमरगीत ।
12. मेघदूतम् ।
13. उद्धव शतक - 96
14. भारतेन्दु हरिश्चन्द्र रचनावली

संविदाध्यापक (हिन्दी विभाग)
राष्ट्रिय संस्कृत संस्थान (मा.वि.)
रणवीर परिसर, जम्मू

❖❖❖

वृत्तिस्वरूपविमर्शः

✍डा. मनमोहनतिवारी

(रसमयत्वमेव काव्यत्वमित्यालङ्कारिकनिष्कर्षे रसानुगुणाश्च वृत्तयः कैशिक्याद्या वैदर्भ्याद्या रीतयः सुकुमारादयो मार्गाः समासस्वरूपप्रातिपदिकाश्रिताः सङ्घटनाश्चेति तद्विषयव्यापाराः काव्याङ्गतया चमत्कारपराः । वृत्तिस्वरूपविमर्शेऽस्मिन् निरूपणे रचयित्रा न केवलं वृत्तिवैशिष्ट्यं प्रतिपादितमपि तु शब्दव्यापारविषयाश्च सप्रमाणं प्रदर्शिताः । नाट्यशास्त्रम्, काव्यप्रकाशः, वाक्यपदीयम्, साहित्यदर्पणः इत्यादयः प्रामाणिकाश्च ग्रन्था निरूपणार्थमुपयुक्ताः प्रबन्धरचयित्रेति विशेषः । रचनेयं सहृदयानामोदयिष्यतीत्यत्र नास्ति संशयलवोऽपि ।)

साहित्यशास्त्रेषु वृत्तिशब्दस्योल्लेखः बहुधा विहितोऽस्ति । यथा नाट्यशास्त्रे - वृत्तयः नाट्यमातरः तथा सर्वेषामेव काव्यानां वृत्तयः मातृकाः स्मृताः । व्यवहारो हि वृत्तिरुच्यते । तत्र रसानुगुणः औचित्यवान् वाच्याश्रयो यो व्यवहारस्ता एताः कैशिक्याद्या वृत्तयः । यथा –

भारती सात्त्वती चव कैशिक्यारभटी तथा ।

चतस्रो वृत्तयश्चता यासु नाट्यं प्रतिष्ठितम् ॥ (नाट्यशास्त्रे)

वाचकाश्रयाश्चोपनागरिकाद्याः वृत्तयः सन्ति । रसादितात्पर्येण सन्निवेशिताः कामपि कमनीयतां नाट्यस्य काव्यस्य वा वर्धयन्ति ।

भट्टोद्भटेन काव्यालङ्कारसारसंग्रहे परुषा, कोमलोपनागरिकाश्चेति वृत्तित्रयं प्रतिपादितम् । आचार्यवामनेन वैदर्भी, गौडी, पाञ्चाली इति तिस्रः रीतयः स्वीकृताः । आचार्यदण्डी कुन्तकाचार्योऽपि तदेव सुकुमारमार्गं विचित्रमार्गं मध्यममार्गञ्चेति मार्गत्रयरूपेण स्वीचकार । आचार्यानन्दवर्धनोऽपि स्वप्रणीते ध्वन्यालोके अमुं वर्णविन्यासं सङ्घटनात्वेन निरूपयामास ।

वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः । (काव्यप्रकाशे)

तात्पर्यं यत् वृत्तिः, रीतिः, मार्गः, सङ्घटना, शैली वा एते सर्वे शब्दाः रसविषयकवर्णविन्यासस्य कृते अभिहिताः सन्ति साहित्यशास्त्रेषु आचार्यैः । यथा स्वयमेव आचार्यानन्दवर्धनः ध्वनेः भूमिकां विरचयन् बोधयाञ्चक्र यत् –

तत्र केचिदाचक्षीरन् शब्दार्थशरीरं तावत् काव्यम् । इति ।

तत्र शब्दार्थयोः सौन्दर्यमुत्कर्षयन्तः अनुप्रासादयः शब्दालङ्काराः उपमादयश्चार्थालङ्काराः, वर्णसङ्घटनाधर्माः माधुर्यादयः गुणाः तदनतिरिक्तवृत्तयो वृत्तयोऽपि या उपनागरिकाद्याः, वैदर्भीप्रभृतयः रीतयः, प्रकाशिताः ताः गताः श्रवणगोचरमिति ।

लोके यावन्तोऽपि पदार्थाः अस्मद्बुद्धिविषयीकृताः सन्तः भासन्ते तावतां समेषां पदार्थानां ज्ञानं, बोधाः प्रकाशः शब्देनैव भवति, अर्थात् शब्द एव बोधकः प्रकाशकः ज्ञापकः कारणञ्चार्थप्रतीतौ स्यात् । यथोक्तं भर्तृहरिणा वाक्यपदीये –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥
इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ (काव्यादर्शे)

परं वृत्तिं विनाऽर्थबोधनऽतिप्रसक्तिः स्यात् तथा शाब्दबोधप्रक्रियायां शब्दो हि येन व्यापारेण स्वीयमर्थं बोधयति स वृत्तिः । सा च वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यञ्जना चेति । अत्र धा प्रत्ययः प्रकारार्थं सूचयति, स च सामान्यव्यावर्तको विशेषधर्मः शक्तिलक्षणाव्यञ्जनान्यतमत्त्वं हि वृत्तिवैशिष्ट्यमिति विधिनिषेधवत् शक्यसम्बन्धवच्चेति ध्वन्यालोके आचार्यानन्दवर्धनः विस्तरेण प्रतिपादयाञ्चकार । धर्मत्रयविशिष्टा वृत्तिः भवतीत्याशयः । यथा निरूप्यते – अभिधाशब्दस्य शक्यार्थविषयकः व्यापारोऽस्ति । लक्षणाऽपि शब्दस्य शक्यव्यवहितलक्ष्यार्थविषयको व्यापारो भवति । तथा शैत्यपावनत्वादिप्रयोजनांशप्रतिपादनविषये शब्दस्य अथवा लाक्षणिके शब्दे व्यङ्ग्यवदर्थप्रकाशानुकूलो व्यापारो व्यञ्जनात्मकः इति आचार्यमम्मटस्य मतम्।

आचार्यनागेशभट्टोऽपि स्वविरचितायां परमलघुमञ्जूषायां वृत्तिवैशिष्ट्यं प्रतिपाद्य तत्स्वरूपं बोधयन् आह यत् सा पदपदार्थसम्बन्धारूपा वृत्तिः त्रिधा । यद्यपि कृतेऽपि नामनिर्देशने आसां वृत्तीनां सन्दर्भे आचार्याणां नैकमत्यं विद्यते । प्रमाणशास्त्राऽभ्यासनिपुणाः नैय्यायिकाः केवलं शक्तिं लक्षणाञ्च वृत्तिद्वयमेव प्रतिपाद्य व्यञ्जनायाः किमपि स्वरूपं न निर्दिशन्ति । एवमेव शब्दब्रह्मोपासकाः स्फोटवादिनः तत्र भवन्तः वैय्याकरणाः लक्षणायाः आवश्यकत्त्वमपि न स्वीकुर्वन्ति ते शब्दस्य अप्रसिद्धया शक्त्यैव तटादिलक्ष्योपस्थितिं निरूपयन्ति । एवमेव त्वचा ज्ञातम् इत्यादौ निरुढलक्षणाऽपि प्रसिद्धा शक्तिरेव यथा हि

त्वक्शब्दः चर्मणि अर्थे प्रसिद्धः तथैव त्वगिन्द्रियोऽपि अनादितात्पर्यवशादेव । तैनैषा लक्षणा शक्तेः पर्याय एव ।

एवमेव वाक्यार्थविचारे निपुणाः मीमांसकाः जातौ सङ्केतग्रहणं व्यक्तेस्तु आक्षेपेणैव अर्थात् लक्षणया सिद्धिं प्रतिपादयन्ति । तत्र आचार्यमुकुलभट्टः स्वविरचितायाम-भिधावृत्तिमातृकायामभिधायाः दश भेदान् विलिख्य तत्र जातिगुणक्रियायदृच्छारूप-सङ्केतितार्थचतुष्टयं बोधयित्री अभिधा चतुर्धेति निरूप्य लक्षणायाः षड्भेदान् अभिधान्तर्गतेनैव प्रतिपादयति । अनेन व्यञ्जनायाः अन्तर्भावो लक्षणायाः षड्भेदेषु निरूपितः । इत्येतदभिधावृत्तिः दशधाः विवेचिता ।

लक्षणानिरूपणे आलङ्कारिकाणां मीमांसकानाञ्च मतभेदः स्पष्टतया लक्ष्यते । यथा हि – मुकुलभट्टः शुद्धागौण्योः भेदकधर्मं लक्ष्यार्थलक्षकार्थभेदरूपताटस्थ्यं स्वीचकार । तत्रैव आचार्यमम्मटः उभयोः अभेदरूपमुपचारं शुद्धागौण्योः भेदकधर्मं प्रतिपादयति ।

उभयथा चेयं शुद्धा उपचारेणामिश्रितत्वात् ।

उपचारयुक्ता लक्षणा गौणी, शुद्धा चोपचाररहिता ॥ इति । (काव्यप्रकाश)

उपचारो हि नाम अत्यन्तं विषयकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम् । एवमेव गौरनुबद्धयः, पीनो देवदत्तः दिवा न भुङ्क्ते इत्यादिषूदाहरणेषु प्रयोजनाभावात् लक्षणायाः विषयकत्वमपि न स्यात् । मीमांसकैकदेशानुसारिणः भाट्टप्रभृतयस्तु आचार्याः पदार्थसंसर्गरूपवाक्याथोपस्थितिं वाक्यस्य तात्पर्याख्यया वृत्त्या प्रतिपादयन्तः वाच्यलक्ष्यव्यङ्ग्यातिरिक्तं तात्पर्यार्थं तेभ्यः पृथक् स्वीकुर्वन्ति ।

तात्पर्यार्थाऽपि केषुचित् । (काव्यप्रकाशे)

इत्थं वृत्तीनां चर्चाक्रमे आचार्याणां भवतु परस्परं विप्रतिपत्तिमूलकः अथवा साम्यमूलकः विचारः नात्र सन्देहः तथाऽपि वृत्तिविवेचनं पदपदार्थयोः सम्बन्धख्यापनमेव प्रतिभाति । अतोऽवसरं प्राप्य साहित्यशास्त्रोयपरम्परया सोदाहरणं वृत्तिलक्षणं प्रस्तूयते –

तत्र भवान् वाग्देवतावतारः मम्मटः शब्दार्थयोः काव्यत्वं निरूप्य प्रथमं शब्दविभागमाह–

स्याद् वाचको लाक्षणिकः शब्दोऽत्रव्यञ्जकस्त्रिधा । वाच्यलक्ष्यव्यङ्ग्यार्थाः क्रमशः अर्थाः स्युः, अतः वाचकः शब्दोऽभिधयैव वाच्यार्थं बोधयति पुनश्च मुख्यार्थस्य

प्रवाहादिरूपशक्यार्थस्य अन्वयरूपे अथवा तात्पर्यानुपपत्तिरूपे बाधे सति यया वृत्त्या शब्दः मुख्यभिन्नं तटादिं लक्षयति सा वृत्तिरेव लक्षणा स्यात् ।

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥
मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥ (काव्यप्रकाशे)
विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः ।
वृत्तिर्सा व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥ (साहित्यदर्पणे)

अभिधायाः त्रयोऽवयवाः रुढि-योग-योगरूढिशब्दैः व्यपदिश्यन्ते । लक्षणा तेन षड्विधा अर्थात् शुद्धोपादानशुद्धा-लक्षणलक्षणा-शुद्धा सारोपा-शुद्धासाधयवसानाभेदै चतुर्धा । पुनश्च गौणी सारोपा-गौणीसाध्यवसानभेदाभ्याम् अस्याः षड् भेदाः सम्भवन्ति इति ।

अभिधा अत एव शक्त्यपरपर्यायसङ्केतितार्थबोधजनको व्यापारोऽभिधा । सङ्केतश्च शक्तिग्राहकः समयः । स च अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकः इत्युक्तः । लक्षणा मुख्यार्थबाधामुख्यार्थसम्बन्धारूढिप्रयोजनान्यतरहेतुकान्यार्थप्रतिपत्तिहेतुभूतः शब्दव्यापारो लक्षणा एवं मुख्यलक्ष्यभिन्नान्यार्थप्रतीतिजनकः व्यापारः व्यञ्जना । सा च द्विधा शाब्दी आर्थी चेति ।

सहायकाचार्य्यः
मुम्बादेवी आदर्श संस्कृत महाविद्यालय,
मुम्बई ।

❖❖❖

एकविंशशताब्द्यां दूरशिक्षा

✍डा. सीतारामशर्मा

(दूरशिक्षया पारम्परिकशिक्षासु छात्राणां प्रवेशो भवतीत्यत्र नास्ति सन्देहः । इयं रचना प्रमाणपुरःसरं स्वशिक्षाभिवृद्धिर्दूरशिक्षया सम्भवेति बोधयत्यनुवाचकान् । तस्याश्च क्षेत्रं साम्प्रदायिकशिक्षामपेक्ष्यात्यन्तं विस्तृतमिव प्रतिभाति । पाठ्यचर्या, सम्प्रेषणकुशलता, दूरशिक्षाविकासः, दूरशिक्षोद्देश्यानीति बहवोऽत्र विषया रचयित्रा चर्चिताः । अध्ययनसामग्रीविषये शिक्षातन्त्रानुसारिणी विवृतिरत्र प्रदर्शिता नितरामनुवाचकेभ्यो रोचते इत्यत्र नास्ति संशयलवोऽपीति रचयितारमानन्देनानुमोदामहे ।)

शिक्षा औपचारिक-अनौपचारिक-निरौपचारिकरूपेण त्रिधा उपवर्णितं विद्वद्भि: आचार्यप्रवरै: प्राच्य-पाश्चात्यै: । त्रिप्रकारकशिक्षापि अधिगन्त्रा प्रत्येकं मानवेनापि स्वे जीवने प्रत्यक्षाप्रत्यक्षरूपेण प्राप्यते, अनुभूयते च । यद्यपि साम्प्रतिकी शिक्षाप्रणाली औपचारिकशिक्षाकेन्द्रिता दरीदृश्यते, तथापि प्राविधिके यगेऽस्मिन् समय-शक्त्यादिबाधकानां कारणेन, सङ्गणक-अन्तर्जालादीनां सौविध्यानां विकासेन च सर्वे अधुना अनौपचारिकशिक्षाप्रणालीं महता प्रमाणेन इच्छन्ति, आत्मसात्कुर्वन्ति च ।

अनौपचारिकाभिकरणानां क्षेत्रं व्यापकं, विशिष्टं च भवति । यतो हि यान्त्रिकेऽस्मिन् युगे पारम्परिक-विद्यालयीय-महाविद्यालयीयशिक्षां समाप्तुं बहूनां समय: न भवति । अतस्तावदारब्धा 'दूरशिक्षा (Distance Education) संस्कृतशिक्षां विकासयितुमपि इयं प्रमुखं साधनं भवति । इनयात् खान् महोदयानाम् अनुसन्धानेन दूरशिक्षा - पारम्परिकशिक्षासु छात्रणां प्रवेश: किमर्थं भवतीति अधोदत्तरूपेण फलितम् । तद्यथा -

पारम्परिकशिक्षायां / साम्प्रदायिकशिक्षायां प्रविविक्षन्ति -

1. स्वशिक्षावृत्त्यै - 34.89%
2. विज्ञानसमुपार्जनाय - 24.95%
3. पदोन्नत्यै - 19.39%
4. समययापनाय - 5.33%

दूरशिक्षायां प्रविविक्षन्ति -

1. पारम्परिकविद्यालयेषु अध्ययनार्थं समयाभावात् - 46.91%

2. विद्यालयेषु स्थानाभावात् -36.19%
3. विद्यास्थानानि सुदूरे वर्तन्ते अतः -7.14%
4. पारम्परिकमहाविद्यालयेषु प्रवेष्टुं वयसः नियमकारणात् - 4.34%
5. पत्राचारपाठ्यक्रमः श्रेष्ठाः इति - 3.85%
6. मित्रणां सूचनानुसारम् -1.17%

यद्यपि साम्प्रदायकशिक्षायाः, दूरशिक्षायाश्च उद्देश्यानि समानानि तथापि पारम्परिक-शिक्षायां याः न्यूनताः दरीदृश्यन्ते ताः प्रणाय दूरशिक्षा नितरामुपकरोति । यथा विद्यालयेषु स्थानानां न्यूनता, अनिवार्यरूपेण उपस्थितिः इत्याद्याः ।

अर्थः

औपचारिकशिक्षाव्यवस्था तावत् समकालीनावश्यकताः पूरयितुमपर्याप्ता वर्तते । अतः उत्पन्ना वर्तते दूरशिक्षाव्यवस्था समकालीनानां भविष्यकालीनानाम् अपेक्षाणां पूरणाय । **भरतभूषणशर्ममहोदयः**[१] (1995)- औपचारिकशिक्षाव्यवस्था तु 17.24 वयस्कान् वृत्तिव्यापारसाङ्कतिकशिक्षाः प्रदातुं मुख्यतया संरचिता वर्तत इति वदति । तत्र तेन इमाः न्यूनताः प्रत्यपादिषत -

1. संशयग्रस्तलक्ष्यप्राप्त्यै पूर्णकालीन-अधिककालीनान्तराणि ।
2. औपचारिकशिक्षाकेन्द्रेषु स्थानानामपर्याप्तता ।
3. सर्वेषु कोणेषु औपचारिकशिक्षाकेन्द्राणामभावः ।
4. पाठ्यक्रमप्रवेशाय पूर्वयोग्यतापरीक्षायाम् उत्तीर्णता, तत्र प्रतिशतताप्राप्तिः ।
5. सामाजिकापेक्षाणां पूरणे असम्बद्धाः पाठ्यक्रमाः शैक्षिककार्यक्रमाश्च ।
6. अत्र अत्यधिकवेतनयुताः प्राध्यापकाः कतिचन चितान् छात्रान् पाठयन्ति ।
7. सर्वोत्तमोच्चशिक्षायाः प्रयोजनम् अनुभूयते कैश्चित विशिष्टैः छात्रः एव ।
8. अत्यधिकः धनव्ययः ।
9. लोपभूयिष्ठा परीक्षाव्यवस्था इत्यादयः ।

दूरशिक्षापरिषदः (Distance Education Council, 1992) मार्गदर्शिन्याम् उक्तमस्ति यत् - दूरशिक्षाव्यवस्था शिक्षायाः अवकाशान् वर्धयति, उच्चशिक्षायाः मार्गं सुगमं करोति, व्ययं प्रभावयति, समाजस्य अधिगन्तुः च अपेक्षितरूपेण अपेक्षितां शिक्षां प्रददाति इति ।

दूरशिक्षायाः प्रधानविशेषणानि तु तस्याः अत्यधिकनिष्पत्तिः (Productivity), विशिष्टा अनुनेयता (Flexibility), तथैव समाजस्य विविधाभियोगानाम् अभियाचनानां (Demands)समाधानक्षता । दूरशिक्षाव्यवस्थायाः व्ययस्य विश्लेषणेनेदं स्पष्टं यत् औपचारिकशिक्षायाः व्यये 1/4 अथवा 1/3 अंशेनैव दूरशिक्षया शिक्षा प्रदातुं शक्यते । अतः भारतसदृशे राष्ट्रे दूरशिक्षाव्यवस्थाप्रकल्पनं, तद्विकासश्च महत्त्वपूर्णस्थानमावहति ।

1983 विश्वविद्यालयानुदानायोगसमित्याः (UGC) दूरशिक्षापरियोजनया दूरशिक्षायाः इमे विचाराः समुपस्थापिताः ।

1. छात्रकेन्द्रितवैयक्तिकाधिगमव्यवस्थायाः समायोजनम् ।
2. शिक्षायाः बहुप्रकारत्वम्, अनुनेयता, सार्वत्रिकता सम्पादनम् ।
3. सुदूरवर्तिभ्यः, विभिन्नवयस्केभ्यः, विशिष्य कर्मरतेभ्यः आर्थिकेन वा अन्येन कारणेन वा च्युतेभ्यः व्यापक-अपेक्षापूरिकायाः उच्चशिक्षायाः प्रकल्पनम् ।
4. सततशिक्षारूपेण (Continues Education) आजीवनशिक्षारूपेण (Lifelong Education) च शिक्षायाः प्रवर्धनम्, येन अधिगन्तारः स्वकीयवैयक्तिकज्ञानस्य नवीनीकरणं सदा कर्तुं प्रयतन्ते, तथैव नूतनक्षेत्रेषु च स्वज्ञानं प्रवर्धयन्ति ।

दूरशिक्षायाः क्षेत्रम् (Scope of Distance Education)

दूरशिक्षायाः क्षेत्रं साम्प्रदायिकशिक्षायाः अपेक्षया सुदूरं विस्तृतं च दरीदृश्यते । पारम्परिकशिक्षा तावत् कक्ष्यागतशिक्षणपर्यन्तं सीमिता वर्तते । दूरशिक्षा न तथा । अन्ताराष्ट्रिय-शिक्षाविकासपरिषदः (International Council for Educational Development) मते औपचारिकशिक्षा तु प्राथमिकपाठशालातः विश्वविद्यालयपर्यन्तं विविधशैक्षिककार्यक्रमैः, विशिष्ट-कार्यक्रमैश्च वृत्तिसाङ्कतिकविद्यां नियमितरूपेण प्रदातुं संरचिता । अस्याः क्षेत्रं सङ्कुचितं वर्तते ।

Erling Ljosa[2] वदति यत् - दूरशिक्षा विभिन्नक्षेत्रेषु विशेषज्ञानं, योग्यतां च विदधाति यथा - पाठ्यचर्यानिर्माणं, शैक्षिकसामग्रीणाम् उत्पत्तिः विकासश्च, प्रसारमाध्यमैः सम्प्रेषण-कुशलता, संसूचनाः, छात्राणां परामर्शः उपदेशो वा, अध्ययनसहायता, पाठ्यसामग्रीणां वितरणं प्रतिदानं च, तथैव अपेक्षानुगुणं स्थानीयसंस्थाभिः सह शिक्षणक्रियाणां समायोजनम् इत्यादिषु ।

दूरशिक्षायाः प्रधानकार्याणि उत्तमसामग्रीभिः, प्रदत्तकार्यैः, वैद्युतोपागमेन च छात्रणां शिक्षणं, छात्रापदेशः (Guiding), सर्वेषु क्षेत्रेषु पुरोभिवृद्ध्यर्थं छात्रणां प्रोत्साहनं च ।

दूरशिक्षायाः विकासः (Development of Distance Education)

दूरशिक्षायाः अपेक्षां परिगण्यैव सम्प्रति विकसित-विकसद्राष्ट्राणि सर्वाणि अपि सुव्यवस्थितदूरशिक्षाव्यवस्थां विकासयन्ति । 1969 तमे वर्षे युनैटेड्किङ्डम् (UK) मध्ये प्रथममुक्तविश्वविद्यालयो समजनि । ततः आसिया - आसियेतरराष्ट्रेष्वपि सर्वत्र मुक्तविश्व-विद्यालयाः, दूरशिक्षाकेन्द्राणि च समवर्धिषत । Japan University of Air (1981) तमे वर्षे 14 वर्षाणां योजनया प्रादुर्भूत । तथैव 1979 तमे वर्षे The Central China Television University संस्थापितः । ततः परम् अद्ययावत् 5 लक्षाधिकाः 55 दूरदर्शनविश्वविद्यालयेभ्यः लाभं प्राप्नुवन् सम्प्रति 106 राष्ट्रेषु 1026 विश्ववविद्यालयाः दूरशिक्षामाध्यमेन 31752 पाठ्यक्रमान् स्वच्छात्राणां निमित्तं परिकल्पयन्ति ।

भारते दूरशिक्षाविकासः (Development of Distance Education in India)

भारते बहवः शिक्षाविदः, बहवः शिक्षायोगाश्च समकालिकसाम्प्रदायिकशिक्षायाः पर्यायान्वेषणं, तस्यावश्यकताः पर्यायान् च समसूचयन् । कोठारी आयोगेन[3](1961), पार्थसारथि-आयोगेन[4] (1971), रामरेड्डिसमित्या[5] (1982), राज्यशिक्षामन्त्रिणां समुप-वेशनेन[6] (1986) च दूरशिक्षायाः तथा पत्राचारमुक्तविश्वविद्यालयानां च व्यवस्थापने नैके अनुशंसाः (Recommandations)प्रत्यपादिषत ।

तेषां फलतः भारते 1962 तमे वर्षे देहल्यां प्रथमः पत्राचारपाठ्यक्रमविद्यालयः समारब्धः । 1962 तमे वर्षे एव विश्वविद्यालये तदानीन्तनशिक्षामन्त्रिण्या प्रथमदूरशिक्षाकेन्द्रं समुद्घाटितम्। तथैव 1982 तमे वर्षे भारतसर्वकारेण आन्ध्रप्रदेशे प्रथमः मुक्तविश्वविद्यालयः डा. बि. आ. अम्बेडकरमुक्तविश्वविद्यालयः (Dr. B.R. Ambedkar Andhra Pradesh Open University) व्यवस्थापितः ।

सम्प्रति भारते दशाधिकाः मुक्तविश्वविद्यालयाः दूरशिक्षां प्रयच्छन्ति । तथैव उपसप्ततिः विश्वविद्यालयाः / संस्थाः दूरशिक्षां प्रकल्पयन्ति । दूरदर्शनमाध्यमेनापि IGNOU

उच्चस्तरीय-दूरशिक्षां प्रददाति । तथैव माध्यमिकविद्यापि द्रदर्शनमाध्यमेन समायोजिता सन्दृश्यत एव ।

अन्ताराष्ट्रियदूरशिक्षापरिषदः (International Councils for Distance Education)

समकालीनशिक्षापेक्षाः परिगणय्य दूरशिक्षावश्यकताश्च परिशील्य अन्ताराष्ट्रियस्तरे दूरशिक्षासमाख्याः प्रादुर्भूताः । यथा –Common Wealth of Learning (COL), European Association of Distance Education Network (EDEN), International Council for Distance Education (ICDE), European Home Study Council (EHSC), Distance Education Institutions and Distance Education Council in India इत्यादयः संस्थाः निरन्तरं दूरशिक्षायाः गुणवत्ताविकासार्थं प्रयत्नशीलाः दरीदृश्यन्त ।

दूरशिक्षायाः उद्देश्यानि (Objectives of Distance Education)

बहुव्यापिन्याः अस्याः दूरशिक्षायाः अधादत्तानि उद्देश्यानि निर्दिष्टानि वर्तन्ते ।

1. राष्ट्रविकासार्थम् उच्चस्तरीयानां, योग्यानां, प्रभावपूर्णानाम्, अल्पमूल्यानाम अनुदेशानां निर्माणम् ।
2. आर्थिक-गार्हिक-वैयक्तिककारणैः, औपचारिकशिक्षाम् अप्राप्तेभ्यः शिक्षाप्रदानम् ।
3. उद्योगरतेभ्यः अपि शिक्षाप्रदानम् ।
4. राष्ट्रविकासाय सर्वेभ्यः शिक्षावकाशप्रकल्पनम् ।
5. उत्तमपाठ्यसामग्रीणां संरचना ।
6. अधिजिगांसमानेभ्यः स्वेच्छानगुणम् अधिगन्तुं शिक्षायोजना ।
7. निरौपचारिकरूपेण औपचारिकशिक्षाप्रदानम् ।
8. औपचारिकशिक्षायाम् अधिगन्तुः स्वेच्छाप्रदानेन अधिगमस्य विकासीकरणम् ।
9. नव्यक्षेत्रेषु शिक्षायाः शक्तिसामर्थ्यवर्धनम् ।

एवमेव अनौपचारिकशिक्षायाः यानि उद्देश्यानि तानि सर्वाण्यपि दूरशिक्षायाः उद्देश्यानि भवन्ति ।

महत्त्वम्

अस्याः दूरशिक्षायाः वैशिष्ट्यं बहु वर्तते । तद्यथा -

1. दूरशिक्षायाः क्षेत्रं व्यापकं वर्तते ।
2. नियमितयादृच्छिकशिक्षाभ्यां यानि प्रयोजनानि सिद्ध्यन्ति तानि अनयापि सिद्ध्यन्ति ।
3. स्वकोयकार्याणि कुर्वन्तः एव यथावकाशम्, अभीष्टानुगुणम्, अभीष्टविषयं च अध्येतुं शक्नोति ।
4. सर्वाङ्गीणविकासे, जीवनोपयोगिताविषये च बलं दीयते ।
5. वृत्त्यनुगुणं, प्रवृत्त्यनुगुणां च शिक्षां प्राप्तुं शक्नुवन्ति ।
6. पाठ्यक्रमे विविधता भवति ।
7. अधिगन्तस्तरानुगुणमध्येतुं शक्यते ।
8. स्वतः अधिगमो भवति ।
9. स्वानुशासने आत्मानुशासने च बलं दीयते ।
10. अधिगन्तुः अपेक्षान् पूरयितुं सामर्थ्यम् ।
11. दूरशिक्षा औपचारिकशिक्षायाः समुचितः पर्यायः ।
12. अवकाशप्रकल्पने समानता भवति ।
13. श्रद्धया संरचिता, विश्लिष्टा च पाठ्यसामग्री ।
14. शिक्षा प्राकृतिकवातावरणे भवति ।
15. अल्पमूल्येन अधिकसामर्थ्येन शिक्षाप्रदानम् ।
16. छात्र / अधिगन्तृकेन्द्रितशिक्षाविधानम् ।
17. उच्चशिक्षायाः व्यापारीकरणादीनां दूरीकरणम् अनेन शक्यते ।
18. अनुसन्धानं, तेषामनुप्रयोगेण सदा नवीनीकरणं च भवति ।

दूरशिक्षायाः मूलाधाराः (Pillars of Distance Education)

दूरशिक्षाव्यवस्था तु प्रधानतया षट् सोपानेषु विभक्तुं शक्यते । तान्येव दूरशिक्षायाः मूलाधाराः । ते च –

1. स्वाध्ययनसामग्री (Self Learning / Study Material)
2. नियतकालीनाः परामर्शकक्षाः (Personal Contact Programme)
3. दत्तकार्याणि (Assignments)
4. बहुलप्रसारमाध्यमः (Electronic Media / Multimedia)
5. अध्ययनकेन्द्राणि (Study Centres)
6. वैयक्तिकोपदेशः (Personal Guidance)

अध्ययनसामग्री (Self Learning / Study Material)

दूरशिक्षायाः विकासे छात्राधिगमविकासे च मेरुदण्डायते अध्ययनसामग्री[7]। दूरशिक्षायाम् अध्ययनसामग्री ज्ञानसम्पादने, कौशलविकासे च अधिगन्त्रे उपकरणं, मार्गदर्शकं च भवति । दूरशिक्षायाः गुणवत्तापि सामग्रीगुणवत्तामुपलक्षयति[8] । दूरशिक्षायाः प्राणभूतं साधनं भवति सामग्री । सुदूरवर्तिनः बहवः छात्रः सामग्रीषु एव आधारिताः भवन्ति ।

बूनर[9] महोदयानुगुणम् अनुदेशनानां चत्वारः गुणाः वर्तेरन् । ते च –

1. अधिगन्तृषु निर्दिष्टानुभवैः अधिगमं प्रति उन्मुखोकरणक्षमतोत्पादानम् ।
2. अधिगन्तृषु ज्ञानस्य समुपार्जनाय प्रस्तुतीनां निर्माणाय सूचनानां सरलीकरणम् ।
3. सामग्रीप्रस्तुतीकरणाय उत्तमस्य तथा प्रभावपूर्णस्य प्रक्रमस्य निर्धारणम् ।
4. आन्तरिक-बाह्यपुनर्बलनाभ्यां प्रकृत्याः (Nature) पदानां (Pacing) च निर्धारणक्षमता ।

उत्तमस्वाध्ययनसामग्रीणां गुणाः (Qualities of Well Prepared Self Learning Material)

1. संक्षिप्तता (Comprehensiveness)
2. स्वतः प्रेरकोत्पादनम् (Self-motivation Generation)

3. इतरसाहाय्यं विनैव स्वतः व्याख्यानयोग्यत्वम् (Self-Explanatory without outside help)
4. स्वतः अधिगमः एवं मूल्याङ्कनम् (Self Learning and Self Evaluation)

स्वाध्यायसामग्र्याः केचन विशेषाः[१०](Special Features of Study Materials)

1. स्पष्टं निर्दिष्टानि उद्देश्यानि ।
2. स्वल्पाः, प्रबन्धयितुं योग्याः पाठ्यभागाः ।
3. सारल्येन सहकारीणि उदाहरणानि ।
4. अधिगन्तुः अनुभवस्य प्राधान्यं प्रदीयते ।
5. स्वाधिगममार्गं परिज्ञातुं विनिश्चितानि शीर्षकानि ।
6. अपेक्षानुगुणम् इतरमाध्यमस्य प्रस्तुतीकरणम् ।
7. अधिगन्तृस्तरानुगुणम् अध्ययनयोग्यता ।
8. अधिगन्तृभ्यः अभ्यासस्य अवकाशप्रदानम् ।
9. स्वभावान् विचारान् च प्रकटीकर्तुं सामग्रीषु स्थानप्रकल्पनम् ।
10. स्वगतेः ज्ञानेन स्वतः प्रतिपुष्टिः ।

एवं विविधगुणभूयिष्ठा स्वाध्ययनसामग्री दूरशिक्षायाः गुणवत्तां सम्पादयति, विकासयति च । दूरशिक्षायाम् अधिगन्तुः आधारभूता भवति एषा स्वाध्ययनसामग्री । यद्यपि दूरशिक्षायाः सामग्रीनिर्माणसिद्धान्ताः वर्तन्ते तथापि तषां प्रयोगः संस्कृतदूरशिक्षायां न भवति । अपि च नैकस्यां नवीनप्रविधोनामाविष्कारो जातः, जायमानोऽपि वर्तते येषां प्रयोगेण दूरशिक्षायाः सामग्रीणां, तथा दूरशिक्षायाश्च गुणवत्ता वरीवध्यते ।

सन्दर्भाः

1. B.B. Sharma, “Dynamics in Distance Education: Some Innovative Approaches” In Academic XII, Directors’ Meet, Special Number (April 22-24, 1993), Academic Staff College, HP University, Shimla, Vol. V., No.1, April 1995, p.41
2. 2.Erling Ljosa, “Distance Education in a Modern Society”, The Journal of Distance and Open Learning, Vol.7, No.2, June 1992, p. 30

3. Kothari Commission, A report 1964-66, Manager Publications, New Delhi.
4. "Towards an Open Learning System", Report of the Committee on the working of an Open University Government of India, Ministry of Education and Social Welfare, 1976 (Popularly known as G. Parthasarthi Committee Report)
5. Govt. of A.P., "Towards an Open Learning System", Report of the Committee on the establishment of an Open University in A.P., (G. Rami Reddy Committee), 1982.
6. The Times of India, 31st August, 1985.
7. Satyapal Anand, University without Walls, New Delhi, Vikas, 1979, p.76
8. Savita Kaushal, "Making Distance Education Work", University News, New Delhi, Nov.27, 1995, p.7
9. Bruner, Holmberg, 1981.
10. Derek Rowntree, Preparing Materials for Open, Distance and Flexible Learning, Kogan, Page Publishers, 1985, p.4

सन्दभग्रन्थाः

1. **Adams John,**Modern Developments in Educational Practice, London : University of London Press, 1992
2. **Bhatnagar, R. P.,**Educational Technology, Meerut : Loyal Book Depot, 1998
3. **Bibhuti Yadav,**Encyclopaedia of Teaching of Education, Vol.I & II, New Delhi : Anmol Publications Pvt. Ltd., 2002
4. **Jagannath Mohanty,**Modern Trends in Educational Technology, Hyderabad : Neelkamal Publications Pvt. Ltd., 2003
5. **Verma R. & Sharma S.**, Modern Trends in Teaching Technology, New Delhi : Anmol Publications Pvt. Ltd., 2003.

EDUCATION

www.aect.org/
www.techlearning.com
www.4teachers.org/
www.education.ti.com/

TECHNOLOGY
www.2ed.gov/technology
www.education.smarttech.com/
www.en.wikipedia.org/wiki/Instructional_technology
www.en.wikipedia.org/wiki/Educational_technology
www.en.wikipedia.org/wiki/Programmed_Learning
www.edutechwiki.unige.ch/en/Programmed_instruction
www.edutechwiki.unige.ch/en/Educational_technology

संविदाध्यापकः (शिक्षाविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

काव्य का शाश्वत प्रयोजन 'परोपकार'

✍ डा. राजेश कुमार शुक्ल

(प्रत्येक मनुष्य की यह सामान्य प्रवृत्ति होती है कि जब उसके मन में किसी भी कारण से कोई भाव उठता है तो वह उस भाव को किसी न किसी रूप मे दूसरों के सामने व्यक्त कर देना चाहता है । भावाभिव्यक्ति की अनुभूति ही काव्य की जननी होती है । काव्य सर्जना के पीछे कवि का कोइ न कोई उद्देश्य अवश्य होता है । यह उद्देश्य ही काव्य का प्रयोजन कहलाता है । समीक्षक या आलोचक काव्य या रचना का अध्ययन करके उसके प्रयोजन को समझने का प्रयास करता है । डा. राजेश कुमार शुक्लजी ने काव्य का शाश्वत प्रयोजन परोपकार को माना है । इस शोध लेख में उन्होंने संस्कृत आचार्यो द्वारा बताये गये काव्य प्रयोजन का विस्तृत उल्लेख करते हुए हिन्दी के भक्तिकालीन एवं आधुनिक काल के कवियों के काव्य प्रयोजन के साथ ही पाश्चात्त्य कवियों के काव्य प्रयोजन को बताने का प्रयास किया है । काव्य का प्रयोजन परोपकार सिद्ध करने के लिए अनेक प्रकार के तथ्य को प्रस्तुत किया है । प्रस्तुत तथ्य उनके गहन अध्ययन को प्रकट करता है ।)

काव्य रचना का प्रयोजन तो उस कवि या रचनाकार का व्यक्तिगत प्रयोजन हो सकता है, समष्टिगत प्रयोजन नहीं । काव्य सृजन कर कोई अपना हित कुछ क्षण के लिए कर सकता है, परन्तु उसके द्वारा सृजित काव्य का उद्देश्य, लक्ष्य या मूल प्रयोजन तो और ही है। उसके द्वारा सृजित काव्य अमर होता है और वह उस कवि के जीवन तक हो सीमित नहीं होता अपितु वह अनन्तकाल तक लोगों का हित करता रहता है ।

सामान्यतः काव्य प्रयोजन का अभिप्राय काव्य रचना की आन्तरिक प्रेरणा शक्ति या मूल्यांकन से लिया जाता है, किन्तु काव्य प्रेरणा और काव्य प्रयोजन में मौलिक भेद यह दृष्टिगत होता है कि काव्य प्रेरणा का तात्पर्य काव्य सृजन हेतु प्रेरित करने वाले तत्त्वों से है और काव्य प्रयोजन का तात्पर्य काव्य सृजन के पश्चात होने वाले लाभ अर्थात् अतीन्द्रिय आनन्द से है । यह तथ्य है कि कोई भी व्यक्ति बिना कारण किसी कार्य में प्रवृत्त नहीं होता। अबोध नवजात शिशु भी बिना प्रयाजन रोता नहीं, वह तभी रोता है जब उसको भूख,

"ग्रहवेधार्थं गोलबन्धोक्तविधिना विपुलं गोलयन्त्रं कार्यम् । तत्र खगोलस्यान्तः भगोले आधारवृत्तद्वयस्योपरि विषुवद्वृत्तम्, कदम्बद्वयकीलकयोः प्रोतमन्यच्चलं वेधवलयं च कार्यम्"[३] । इत्यादिवचनात् ग्रहपरीक्षणरूपः वेधः पूर्वकालादप्यासीदिति दृढं वक्तुं शक्यते । परन्तु प्रायशो गणकाः तस्मिन् काले स्वगृहे एव लघुरूपेण यन्त्रणि निर्मीय परीक्षन्ते स्म । स्वयं सिद्धान्तविदयं जयसिंहः यथा यथा यन्त्रणि बृहन्ति भवन्ति तथा तथा कालः अपि सूक्ष्मरूपेण समागच्छतीति मत्वा बृहद्रूपेण स्थिरयन्त्रणि निर्मापयामास । अनेन इदानीमपि सूक्ष्मरूपेण सूर्योदयादिः इष्टकालः, ग्रहाणां नतांशोन्नतांशदिगंशाश्च सिद्धयन्ति। सिद्धान्तप्रतिपादितानां यन्त्राणां कार्यशैलीम् अभ्यस्य तेष्वेव यन्त्रेषु कुत्रचित् परिष्करणं विधाय कानिचन नूतनयन्त्राणि अपि एषः निर्मापितवान् । तेषु यन्त्रेषु प्रमुखाणां चतुर्णां यन्त्राणां परिचयोऽत्र विधीयते ।

१. दक्षिणोत्तरभित्तियन्त्रम्

वेधाशालायां प्रथमतया अस्यैव यन्त्रस्य निर्माणं क्रियते स्म । यतः सर्वेषु अपि यन्त्रेषु दक्षिणोत्तरभित्तिरावश्यकी । दिग्ज्ञानं विना यस्य कस्यापि यन्त्रस्य स्थापनं न शक्यते भवितुमित्यतः त्रिप्रश्नाधिकारोक्तविधानेन (समतलभूमौ अभीष्टत्रिज्यया वृत्तं विलिख्य तन्मध्यबिन्दौ शङ्कुं निखाय परिधिप्राक्परस्थानशङ्कुच्छाया–

स्पृष्टबिन्दुद्वयगतरेखार्धीकरणेन याम्योत्तररेखां, तदर्धीकरणेन पूर्वापररेखां च विन्यस्य तदग्रभागेषु) प्राची प्रतीची उदोची अवाची चेति चतस्रः दिशः संसाध्य तत्र दक्षिणोत्तररेखायां या भित्तिः विरच्यते सैव दक्षिणोत्तरभित्तिरित्युच्यते । अस्याः भित्तेः अग्रभागे मध्ये पाश्वद्वये शलाकां निहन्यात् । एवं कृते सति, प्राक्कपालस्थे रवौ भित्तेः पूर्वभागे शलाकाच्छाया पतति । तत्र उदयकाले छायायाः ऊर्ध्वाधोऽन्तरं शून्यम् । उदयात्परं छाया ऊर्ध्वाधोरूपेण दीर्घाकारा पतति । दिवामानार्धकाले तु अनन्तच्छाया बित्तेरुभयपाश्वस्थशलाकयोः समानतया पतति । यदा तु दिवामानार्धदनन्तरं रविः पश्चात्कपालं प्रविशति तदा भित्तेरपरपाश्व शलाकाच्छाया अपचीयमाना सती पतति । अस्तकाले पुनः उदयकालिकच्छायवत् ऊर्ध्वाधोऽन्तरं शून्यमेव भवति ।

प्रयोजनम् – १. दिवामानार्धकालज्ञानम् । २. गोलायननिवृत्तिदिनज्ञानम् । ३. विषुवदिवसज्ञानम् । ४.अक्षांशज्ञानम् । ५.मध्यकालिकरविनतांशज्ञानम् । ६. रविस्फुटज्ञानम् ।

एतत् दक्षिणोत्तरभित्तियन्त्रं प्राचीनसिद्धान्तप्रतिपादितशङ्कुयन्त्रस्यैव रूपान्तरम् । प्राचीनास्तु शङ्कुयन्त्रं समतलभूमौ स्थापयामासुः, जयसिंहस्तु शङ्कुयन्त्रं दक्षिणोत्तरभित्तौ प्रातिष्ठिपदिति विशेषः । शङ्कुयन्त्रे सूर्योदयकाले अनन्तच्छाया चेत् अत्र दिवामानार्धकाले अनन्तच्छाया एवमेव एतद्वैपरीत्येन शङ्कुयन्त्रे दिवामानार्धकाले अत्यल्पच्छाया चेत् अत्र सूर्योदयकाले अत्यल्पच्छाया भवति इत्येव भेदः ।

२. ध्रुवदर्शकयन्त्रम्

निरक्षादुत्तरोत्तरं क्रमेण उत्तरध्रुवनक्षत्रं उत्तरस्वस्तिकादुपर्युपरि दृश्यत अतः दक्षिणोत्तररेखायां दक्षिणोत्तरायतरूपेण पुरुषप्रमाणमितां भित्तिं प्रकल्प्य तद्भत्तेरुत्तरपार्श्वम् अभीष्टदेशीयाक्षांशतुल्यान्तरे उपरि वर्धयेत् । द्रष्टा रात्रै अस्य यन्त्रस्य दक्षिणपार्श्वे स्थित्वा उत्तराग्रभागं पश्येत्, तदा तद्दिशि उत्तरध्रुवनक्षत्रं स्फुटं दृश्यते । ध्रुवनक्षत्रदर्शनमेव अस्य यन्त्रस्य प्रयोजनम् ।

प्राचीनास्तु गोलयन्त्रगतयष्ट्या एव ध्रुववेधमकार्षुः । तथा च वासनाभाष्यम् – **"तद्गोलयन्त्रं सम्यग्ध्रुवाभिमुखयष्टिकं यथा भवति तथा स्थिरं कृत्वा...."**[४] । इति । जयसिंहस्तु ध्रुववेधं समानतन्त्रेण यन्त्रान्तरेण साधितवान् ।

३. सम्राड्यन्त्रम्

एतदपि यन्त्रं दक्षिणोत्तररेखायां दक्षिणोत्तरायतभित्तौ स्थापितमस्ति । पूर्वोक्तक्रमेण पुरुषप्रमाणोच्छ्रितां भित्तिं निर्मीय तदुत्तरपार्श्वम् अक्षांशतुल्यान्तरे उपरि वर्धयेत् । ततो भित्तेः मध्यभागे अधस्तात् नाडीवृत्तार्धां (पूर्वापरायतेन) पालीरूपेण रचयेत् । तत्पाल्याम् उपरिष्टात् अधस्तात् च घट्यादिप्रमाणम् अङ्कयेत् । सूर्योदयकाले भित्तेः छाया पाल्याः परमोच्चभागे (पालीक्षितिजे) पतति । उदयात्परं यथा यथा रविः उपरि गच्छति, तथा तथा छाया अधोमुखी भवति । अतः अभीष्टकाले भित्तिच्छाया पाल्यां यस्मिन् बिन्दौ पतति तत्र यद्घटीप्रमाणम् अङ्कितं तावदेव उदयात्परं दिनगतप्रमाणमिति जानीयात् ।

स्थलीयकालज्ञानम् (local mean time) एव अस्य यन्त्रस्य मुख्यं प्रयोजनम्।

प्राचीनास्तु गोलयन्त्रम् उपयुज्य एव स्थलीयकालं सूचयामासुः । तथा च सिद्धान्तशिरोमणिः –

अपवृत्तगरविचिह्नं क्षितिजे धृत्वा कुजेन संसक्त।
नाडीवृत्ते बिन्दुं कृत्वा धात्वा च जलसमं क्षितिजम् ॥
रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विधृते ।
उडुगोले कुजबिन्द्वोर्मध्ये नाड्यो द्युयाताः स्युः[५] ॥ इति ॥

जयसिंहस्तु पृथक्तया सम्राड्यन्त्रण स्थलीयकालम् अजगणत् ।

४. रामयन्त्रम्

एतच्च बृहत्कूपद्वयाकारकं विशिष्टं यन्त्रमस्ति । (पूर्वापरायतरेखायां याम्योत्तरायतरेखायां वा) त्रिज्यावृत्तद्वयं निर्मीय उभयोर्वृत्तयोर्मध्ये समतलमस्तकपरिधिं शङ्कुं निखाय वृत्तपरिधिम् ऊर्ध्वाभागे कूपाकारेण तथा वर्धयेत् यथा मध्ये मध्ये तुल्यान्तरे अन्तःप्रवेशाय रिक्तस्थानानि भवेयुः । अत्रा विशेषः – एकस्मिन् वृत्ते स्थानं यत्र रिक्तं कृतं, तत्र अन्यस्मिन् वृत्ते रिक्तं न कार्यम् अपि च पूरितस्थानस्य शङ्कुम्लस्य च मध्ये संयोगः सर्वत्र विधेयः। उभयत्रपि शङ्कुमूलात् कूपाग्रपर्यन्तं 90 अंशैः अङ्कनं कर्तव्यम् ।

सूर्योदयकाले कूपमध्यस्थस्य शङ्कोः छाया कूपाग्रपाल्यां पतति, तदा रविः पूर्वक्षितिजे एव वर्तते इत्यतः रवेः उन्नतांशाः शून्यमिताः भवन्ति । यदा रविः उपरि गच्छति तदा च्छायापि अधोमुखी भवति । यस्मिन् काले यस्मिन् बिन्दौ शङ्कुच्छाया पतति, तद्बिन्दौ अङ्किताः ये अंशाः ते एव रवेः उन्नतांशाः भवन्ति । (एते दृग्वृत्तीयाः इत्यतः उन्नतकालांशाः न भवन्ति) । अत्र कूपपश्चात्स्वस्तिकस्य च्छायापतनबिन्दोश्च अन्तराले ये अंशाः ते दिगंशाः इत्युच्यन्ते ।

एवं ग्रहाणाम् उन्नतांशादिगंशज्ञानमेव अस्य यन्त्रस्य प्रयोजनम् ।

प्राचीनास्तु गोलयन्त्रस्थदृग्वृत्तेन क्षितिजादुन्नतांशान्, गोलयन्त्रस्थाहोरात्रवृत्तेन उदयाद्युन्नतकालांशान्, गोलयन्त्रस्थपूर्वस्वस्तिक-दृग्वृत्तक्षितिजसम्पातस्थानयोः मध्ये दिगंशांश्च संख्यान्ति स्म ।

इत्थं बहूपयोगीनि चत्वारि यन्त्राणि, तेषां रचनाक्रमः, प्रयोजनानि च अत्र यथामति प्रोक्तानि । इतोऽपि चक्र-कपाल-नाडीवलय-क्रान्तिवलय-राशिवलय-यन्त्रराज-जयप्रकाशादीनि यन्त्राणि वेधोपयोगीनि रचितानि सन्ति । दृग्गणितैक्यसम्पादनाय अस्मत्पूर्वाचार्याः कथम् अविरतनिरताः आसन् इत्यत्र एतादृशयन्त्राणि एव प्रमाणभूतानि वर्तन्ते । एतादृशाणां यन्त्राणां प्रायोगिकरूपेण अध्ययनं यदि क्रियते तर्हि एव अस्मत्पूर्वाचार्याणां प्रयत्नः सार्थकतां याति इत्यलमतिविस्तरेण ॥

संविदाध्यापकः (ज्योतिषविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

मराठीभाषाविज्ञाने वृत्तिविमर्शः

✍सुरेश चेमटे

(वृत्त्याख्यस्य व्यापारस्य मुख्यामुख्यभदाभ्यां वैविध्ये, संस्कृतसाहित्यमिव भाषान्तरेष्वपि तत्तद्वृत्तिज्ञानं समीक्षणीयम् । अभिधा, लक्षणा, व्यञ्जना, तात्पर्यमित्यादिषु मुख्यामुख्यव्यापारेषु प्रसक्तेषु, तेषु व्यापाराणां शाब्दबोधं प्रति धर्मोऽत्र निरूप्यते । अजहत्स्वार्थालक्षणानिरूपणावसरे काकेभ्यो दधि रक्ष्यतामिति वाक्यार्थानुसारी प्रयोगो रचयिताऽत्र मराठीभाषायाम् - इथे दही ठेविले आहे, कावळा आला तर हांक - इति यथायोग्यं निर्दिष्टः । धुमपान मृत्युचं - इत्यादिषु कारणत्वादिलक्षणा लक्षणा प्रयोजनवतीरूपाऽपि प्रतिपादिता, धूमसेवायाः मृत्युं प्रति कारणत्वात् । आर्थीव्यञ्जनावृत्तौ - सूर्य मावळला - इत्यादिप्रयोगे मुन्यभिसारिकादिश्रोतॄणां बोधवैविध्यमत्र निदर्शितम् । भाषायाः वर्णात्मकशब्दकृतव्यवहारप्रयोजनत्वमप्यत्र रचयिता सुप्रसक्तमत्र निर्दिशति ।)

भाषा नाम भावप्रकाशको वर्णात्मकश्शब्दः, तत्तद्देशस्थजनवर्तननिर्वाहकं वाक्यं वा । तत्र मराठ्याः भाषाविज्ञाने (Linguistics) तद्भाषाविज्ञानदृष्ट्या मराठीभाषापर्य्यालोचनेन ज्ञायते यत् शाब्दबोधोपयोगी पदपदार्थसम्बधो वृत्तिः । वृत्तिज्ञानं व्यवहारादुपदेशाज्जन्मान्तरसंस्कारच्च जायते । सा च वृत्तिरभिधा-लक्षणा- व्यञ्जनाभेदात् त्रिधा । सा वृत्तिरधुना यथाशास्त्रं यथामति च विमृश्यते, मराठीभाषाविज्ञानानुसारम् ।

अभिधा

लोके परस्पराभिप्रायविनिमयरूपो व्यवहारः शब्दाधीनः । शब्दस्य अर्थप्रत्यायनरूपो यो व्यापारः स अभिधा (एषा साक्षात्सङ्केतितमर्थं बोधयति) । स त्रिधा - रूढिर्योगो योगरूढिश्च । रूढिरभिधा उदा. - झाड, गाढव, घोडा, घर (अत्र शब्दानामर्थबोधाय प्रकृतिप्रत्ययार्थस्य कल्पना न क्रियते)

योगाभिधा - उदा. भारतीय, गांगेय, दर्शनीय, नाटककार (अत्र प्रकृतिप्रत्ययशक्त्या अर्थबोधः)

योगरूढ्यभिधा - उदा. पंकज (अत्र समुदायशक्त्याऽवयवशक्त्या चार्थः लभ्यते)

लक्षणा

लक्षणायां मुख्यार्थबाधः, मुख्यार्थसम्बद्धोऽर्थः स्वीकरणं, रूढिप्रयोजनविशेषो वा तत्र कारणं भवति । एषा निमित्तवशात् स्वीक्रियमाणस्यापरार्थस्य बोधिका भवति । तथाहि –

आंबा हा साक्षात् बलच आहे – इत्यत्र आंबा इत्यस्य बलवृद्धिकारणत्वेन कार्यकारणभावसम्बन्धमाश्रित्य आंबाशब्दस्तत्सम्बद्धबलं लक्षणया बोधयति । अत्र लक्षणलक्षणा सारोपा शुद्धा । एवमेव दुध हे साक्षात् बलच आहे, धूम्रपान म्हणजे साक्षात् मृत्युच इत्यादि ।

लक्षणा द्विधा – निरूढाप्रयोजनवतीभेदात् ।

प्रयोजनवती लक्षणा (एषा किञ्चिदपि प्रयोजनमाश्रित्य भवति) – कृष्णेंद्रस्वामीचा मठ काशीमध्ये भागीरथीवर आहे – इत्यत्र भागीरथीपदस्य जलप्रवाहो मुख्यार्थः तत्र मठासम्भवाद् वाक्ये तस्यान्वयाभावेन तत्समीपवर्तिनि तटेऽर्थे लक्षणा तत्सामीप्यात् । अत्र भागीरथीशब्दः स्वार्थं जलप्रवाहरूपमर्थं परित्यज्य भागीरथीतीरं बोधयति । अर्थादत्र स्वार्थपरित्यागेन परार्थोपस्थानं भवति । तेनात्र जहत्स्वार्था लक्षणापि ।

निरूढालक्षणा (एषा प्रसिद्धिमाश्रित्य भवति) – पानिपतावर सव्वा लाख बांगडी फुटली – इत्यत्र बांगडी फटली इत्यनेन लक्षणार्थबोधः – मृत्युं प्राप्तवन्तः ।

सारा गाव पळाला (ग्रामः पलायितः) अत्र पलायनं सचेतनधर्मस्तस्य निर्जीवे ग्रामेऽभावान्मुख्यार्थस्य वाक्येऽन्वयाभावेन ग्रामनिवासिजनेऽर्थे निरूढालक्षणा भवति तात्स्थ्यादिनिमित्तेन ।

विशेषः – अस्या भेदाः उपभेदाः च सन्ति । ते मराठीसाहित्ये विज्ञातव्याः ।

प्रकारान्तरेणापि लक्षणा द्विधा

1. **अजहत्स्वार्था**

स्वार्थसंवलितपरार्थाभिधायिका । अर्थात् यत्र स्वार्थसिद्धये पराक्षेपो भवति, आत्मनश्चापि उपादानं भवति तत्र अजहत्स्वार्था ।

इथे दही ठेविले आहे, कावळा आला तर हांक – अत्र कावळा इत्यनेनार्थबोधः – कावळासहितसर्वदध्युपघातकाः (अत्र स्वार्थापरित्यागेन परार्थोपस्थापनं भवति) । तेनात्र

अजहत्स्वार्था लक्षणा । एवमेव दररोज हजार पोत्यांची जावक होते, दरारोज हजार गाड्यांची आवक आहे, कालच्या कार्यक्रमामध्येपाचशे पान उठले, शस्त्र व लेखणी या दोहों वस्तूंकडे पाहिलें असतां लेखणीच सामर्थ्यवान आहे, इत्यादीनि ।

मोळी जाळते - इत्यत्र मोळी इत्यस्य गमनकार्यासम्भवेन वाक्येऽन्वयाभावात्तत्साहचर्येण तद्धारिपुरुषे लक्षणा, साहचर्यात् । आणखी एक पेला घ्या, इत्यादि अपि तथा ज्ञेयम् ।

2. **जहत्सवार्था**

स्वार्थपरित्यागेनतेरार्थभिधायका । अर्थात् तत्र स्वकीयोऽर्थः सर्वथा त्यज्यते, तत्र जहत्स्वार्था ।

सारा गाव पळाला (ग्रामः पलायितः) - अत्र पलायनं सचेतनधर्मस्तस्य निर्जीवे ग्रामेऽभावान्मुख्यार्थस्य वाक्येऽन्वयाभावेन ग्रामनिवासिजनेऽर्थे लक्षणा भवति तात्स्थ्यनिमित्तेन ।

गंगेवर गवळ्याची वस्ती आहे - इत्यत्र गंगापदस्य जलप्रवाहरूपो मुख्यार्थः तत्र गवळ्याची वस्ती इत्यस्य असम्भवाद् वाक्ये तस्यान्वयाभावेन तत्समीपवर्तिनि तटेऽर्थे लक्षणा, तत्सामीप्यात् । अत्र गंगाशब्दः स्वार्थ उदाहरणमपि ज्ञेयम् जलप्रवाहरूपमर्थं परित्यज्य गंगातीरं बोधयति । एवमेव माझ्या दारावरून हत्ती गेला, इत्यादि ।

सा च लक्षणा तात्स्थ-ताद्धर्म्य-तत्सामीप्य-तात्साहचर्यादिनिमित्तिका । उदा-

बाळ्या केवळ बैल आहे - बाळ्या इत्यनेन सह बैलपदशक्यार्थस्यान्वयाभावेन ताद्धर्म्यात् बैलपदस्य तत्सहजातजाड्याद्यवगुणेऽर्थे लक्षणा, येन जाड्याद्यवगुणविशिष्टस्य बाळ्या इत्यस्य बोधः । तू सिंहाचा छावा आहेस, हापूसचा आंबा म्हणजे नुसत अमृत आहे, गण्या म्हणजे शुद्ध नंदीबैल आहे, हा तरूण मनुष्य वाघ आहे, (त्या) वाघाला बोलव म्हणजे झाले, इत्यादीन्युदाहरणानि ।

विशेषः - जहदजहत्स्वार्था लक्षणा भागलक्षणा भागत्यागलक्षणा वाऽपि एते स्वीकुर्वन्ति । तथा हि - ते तू आहेस (तत्त्वमसि) ।

व्यञ्जना

ज्या शक्तीने मुख्यार्थाचा बोध झाला असता ही मुख्यार्थापेक्षा ही अधिक किंवा केव्हा केव्हा निराळा अर्थ प्रतीत होतो ती शक्ती व्यञ्जना असे समजावे - अर्थात् अभिधालक्षणयो-

र्थबोधानन्तरयोः विरतयोर्यदा यया शक्त्या व्यङ्ग्यार्थो (मुख्यार्थापेक्षयाधिकं, क्वचिद् मुख्यार्थासम्बन्धः वा) पतीयते सा व्यञ्जना । एषा प्रयोजनविशिष्टस्य सहृदयतावशात् जायमानस्यार्थस्य बोधिका । अर्थादयं वक्तृ-बोधव्य-काकु-वाच्य-काल-चेष्टादीनां वैशिष्ट्यात् प्रतिभावितः सहृदयेभ्यो वाच्यार्थाभिन्नर्थस्यलक्ष्यार्थाभिन्नार्थस्य वा प्रतीतिकारिका । पुनश्चास्य वैशिष्ट्यं यदेकपदस्य एकवाक्यस्य वानेकार्थबोधकत्वम् । व्यञ्जनाशक्तेर्विज्ञाने जन्मान्तरगृहीतसंस्कारविशेषोऽपि कारणम् ।

व्यञ्जना द्विधा - शाब्द्यार्थीभेदात् । तत्र शाब्दी द्विधा - अभिधामूलकलक्षणामूलभेदात् । तथा हि - अभिधामूलव्यञ्जना - मी कधीच थाप मारीत नाही (अत्र थापपदस्यार्थद्वयं - मृषा कथा, हस्ततलेन तबलावाद्ये कृतः आघातः ।) यदि अत्र तबलावादकः वक्ता तर्हि अभिधामूला व्यञ्जना ।

लक्षणामूलव्यञ्जना -

अत्र लक्ष्यार्थमादाय तदन्यत् किञ्चित् बोध्यते । यथा - कृष्णेंद्र स्वामींचा मठ काशीमध्ये भागीरथीवर आहे इत्यत्र लक्ष्यार्थतिरिक्तः शीतत्वपावनत्वातिशयादिरर्थो बोध्यते ।

आर्थीव्यञ्जना

इयमर्थमूला । एषा वक्तृबोद्धव्यादीनां वैशिष्ट्येनान्यमर्थं बोधयति ।

उदा. 1. सूर्य मावळला (गतोऽस्तमर्कः इति) इति वाच्यार्थः ।

यदि श्रोता कृषकः तर्हि व्यञ्जनयाऽर्थ बोधः - आता घरी जायची वेळ झाली

यदि श्रोता कर्मठः बाह्मणः तर्हि व्यञ्जनयाऽर्थबोधः - संध्येची वेळ झाली.

(सन्ध्यावन्दनं कर्तव्यम्)

यदि श्रोता क्रीडारतः बालकः तर्हि व्यञ्जनयाऽर्थबोधः - आता खेळ पुरे.

यदि श्रोत्री नवोढा तर्हि व्यञ्जनयाऽर्थबोधः - आता पती घरी यावयाची वेळ झाली.

एवमेव पाच वाजले इत्यादि ।

उदा. 2. सावळा ग रामचंद्र, रत्नमंचकी झोपतो

त्याला पाहता लाजून, चंद्र आभाळी लपतो? अत्र रामचन्द्रस्य मुखशोभा बोधिता ।

उदा. 3. नित्याच्या पादवंदनामुळे मी सीतेचे फक्त नूपुर तेवढे ओळखू शकतो,

केयूर किंवा कुंडले ओळखू शकत नाही – अत्र लक्ष्मणस्य धर्माचरणस्य विज्ञानं भवति ।

उदा. 4. ह्या नदीमध्ये सुसरी आहेत (ग्राह्याः सरिति अस्याम्) – अत्र ज्ञायते – यत् तू नदीवर स्नान आदी करण्यास जाऊ नकोस. (स्नानार्थं नद्यां त्वं न गच्छ ।)

उदा. 5. या वाटेवर चोरांचा सुळसुळाट आहे (सचोरः अयं पन्थाः) – अत्र व्यञ्जनाशक्तेरर्थबोधः या वाटेने तू पुढे जाऊ नकोस.

उदा. 6. शाबास चारूदत्ता, तुला पाहून स्वर्गस्थ कर्ण ही लज्जित होईल – अत्र चारुदत्तस्यौदार्यं कर्णापेक्षयधिकमिति बोधितः ।

उदा. 7. त्या मुलाने आई असे शब्द उच्चारले आणि लगेच डोळे फिरवले आणि डॉक्टराने आपले डोळे पुसले – अत्र व्यञ्जनाशक्तेरर्थबोधः – स बालकः जनन्याः तन्मयपूर्वकं स्मरणं कृत्वा मृत्युं प्राप्तवान् ।

विशेषः – शेषोदाहरणानि मराठीसाहित्ये विज्ञातव्यानि ।

निष्कर्षः – मराठीसाहित्ये प्रचुररूपेण संस्कृतवत् वा अभिधायाः लक्षणायाः च वृत्तेः प्रयोगः अर्थज्ञानार्थभिप्रायविनिमयार्थं वा भवति इति मराठीभाषाविज्ञानदृष्ट्याऽवलोकनेन ज्ञायते ।

सन्दर्भग्रन्थसूची

1. मराठी भाषा उद्गम व विकास, कुलकर्णी, कृष्णाजी पांडुरंग, The International Book Service Publishers, Fitst Edition, 1933.
2. अभिनव काव्यप्रकाश – प्रा. रा. श्री. जोग, स. कृ. पाध्ये, व्हीनस बुकस्टॉल, अप्पा बळवंत चौक, पुणे, 2, दुसरी आवृत्ति, 1946.
3. अर्वाचीन मराठी व्याकरण, लेखन व वाङ्मय, कृ. पां. कुलकर्णी व श्री. रा. पारसनीस, Karnataka Publishing House, Chira Bazar, Bombay – 2, Reprint Second Edition, 1939
4. साहित्यशास्त्र, गणेश सदाशिवशास्त्री लेले, सौ. कमलाबाई अधिकारी, मालक, अधिकारी प्रकाशन, 396, नारायण पेठ, पुणे, नं. 2, तिसरी आवृत्ति, 1 जानेवारी 1963.

5. सुलभ काव्यशास्त्र, महादेवशास्त्री जोशी, द. र. कोपर्डेकर, प्रकाश प्रकाशन, 529, सदाशिव पेठ, पुणे नं. 2, 1958.
6. यादवकालीन मराठी भाषा (भाषाशास्त्रीय अभ्यास), डॉ. शं. गो. तुळपुळे, केशव भिकाजी ढवळे, श्रीसमर्थसदन, गिरगाव, मुम्बई 1, प्रथमावृत्ति, 1942.
7. साहित्यशास्त्र, प्रा. हनुमंत माने, कैलास पब्लिकेशन्स, औरंगाबाद, प्रथमावृत्ति, 2005.
8. साहित्यविचार, डॉ. भारत हंडिबाग, कैलास पब्लिकेशन्स, औरंगाबाद, प्रथमावृत्ति, 2005.
9. शास्त्रीय मराठी व्याकरण, मोरो केशव दामले, केशव भिकाजी ढवळे, बुकसेलर, ठाकुरद्वार, मुम्बई, दुसरी आवृत्ति, सन 1925.
10. सुगम मराठी व्याकरण लेखन, कै. मो. रो. वाळंबे, नितिन गोगाटे, नितिन प्रकाशन, 147, बुधवार पेठ, जोगेश्वरी मंदिर लेन, आप्पा बळवंत चौक, पुणे-2, सुधारित आवृत्ति, 2014.
11. महिमभट्टकृत व्यक्तिविवेक, प्रा. मा. वा पटवर्धन, महाराष्ट्र राज्य साहित्य आणि संस्कृति मंडळ, मंत्रालय, मुम्बई 32, प्रथमावृत्ती, 1998.
12. साहित्यकुसुमाञ्ललि अथवा छंदोलंकार, गणेश विष्णु देशपांडे, श्रीक्षेत्र करवीर, सन 1912.

आन्तर्जालकानि

१. www.sanskritdocuments.org
२. www.d;o.serc.iisc.ernet.in
३. www.archive.org
४. www.oudl.osmania.ac.in

शोधछात्रः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

परम्परानुरूपः सूत्रवृत्तिस्वरूपविमर्शः

✍सुश्रीः मौनिका बोल्ला

(सूत्राणां विश्वतोमुखत्वं तत्रैव च सारवत्त्वमल्पाक्षरत्वञ्च प्रसिद्धम् । अस्यां स्थितौ केनोपायेन सूत्रार्थो हृद्गतो भूयादिति चिन्तायामाचार्य्यैः 'वृत्ति' रूपं तत्त्वमाविर्भावितम्। वृत्तिपरम्परा चातीव पुरातनी सत्यपि साम्प्रतमपि विदुषां लेखनीविषयतां वाग्विषयताञ्च धत्ते । तत्रान्तेवासिभिः गुरोः सकाशात् परम्परयाऽधीयानैर्यया वृत्तिरधिगम्यते, तां सरणिमनुसृत्यात्र युवविदुष्या कानिचन सूत्राणि विमृश्यन्ते ।)

पारिभाषिकवृत्तेव्यापकत्वं शक्तिलक्षणाव्यञ्जनासु, कृत्तद्धितसमासैकशेषसनाद्य-न्तधातुरूपेषु च सोदतीति जानीमो वयम् । तदतिरिच्य सूत्रर्थोऽपि परम्परायां वृत्तिरिति निगद्यत। सूत्रर्थनिर्माणप्रक्रियायां प्रप्रथमं पदच्छेदः, विभक्तिः, अधिकारः, अनुवृत्तिः, पदानां क्रमत उपस्थापनम्, इत्यादिविषया विचार्यन्ते । परमेवंविधप्रक्रियाविशेषस्यानुगमसत्त्वेऽपि यस्मिन्- कस्मिन् स्थलेषु दौरुह्यम - नुबोभूम एवेति विचाराधिक्यादस्याः चतुःसूत्र्याः एव परम्परानुरूपो वृत्तिस्वरूपविमर्शोऽत्र प्रस्तूयते ।

1. **आदिरन्त्येन सहेता**[1] ।

सञ्ज्ञासूत्रमिदम् । आदिः प्रथमैकवचनानतम् । अन्त्येन तृतीयैकवचनान्तम् । सहेत्यव्ययपदम् । इतेति तृतीयैकवचनान्तम् । 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञे'ति सूत्रात् स्वं रूपमित्यनुवर्त्तते । तस्य स्वस्य रूपस्येति षष्ठ्यन्तविपरिणामः अपेक्षितः । अन्ते - अवसाने भवो अन्त्यः । भवार्थे दिगादिभ्यो यत् इति यत्प्रत्ययः । अत्रायं विमर्शः – ननु सर्वत्र सञ्ज्ञासूत्रे सञ्ज्ञाबोधकं पदं सञ्ज्ञिबोधकञ्च पदं वर्त्तते । तद्यथा - 'वृद्धिरादैच्' इत्यत्र 'वृद्धिः' इति सञ्ज्ञाबोधाकम्, 'आदैच्' इति सञ्ज्ञिबोधकम् । एवमादिरन्त्येन सहेतेत्यत्र न ज्ञायते । किं सञ्ज्ञाबोधकं, किञ्च सञ्ज्ञिबोधकमिति । यदि अन्त्येन इता अर्थात् इत्सञ्ज्ञकेन (ऐऔच् इति सूत्रावयवचकारेण) सह आदिः (अइउण् सूत्राद्यकारः) इति 'अच्' इत्यर्थकं वाक्यं सञ्ज्ञाबोधकमिति चेत्तर्हि सम्पूर्णस्य

आदिरन्त्येन सहेतेति सूत्रस्य सञ्ज्ञावाचकतया , सञ्ज्ञिवाचकाभावेन सञ्ज्ञिनं विना सञ्ज्ञा नोपपद्यते । अतः सञ्ज्ञादलप्रविष्टेन आद्यावयवान्त्यावयवरूपार्थेन अवयविनं विना अवयवस्यानुपपत्त्या 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' यथा भोजनं विना पीनत्वं नोपपद्यते इति पीनत्वानुपपत्त्या 'पीनोऽयं देवदत्तः दिवा न भुङ्क्त' इत्यत्र रात्रिभोजनाक्षेपः । तथैव 'आदिरन्त्येन सहेते'त्यत्रापि आद्यन्तावयवेनाक्षिप्तं आद्यन्तघटितसमुदायरूपमवयविनं सञ्ज्ञिनमाश्रित्य अच्, हल् इत्यादिसञ्ज्ञा विधेया । तदेतदेवोक्तं भाष्ये – 'आदिरन्त्य इति सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतदवगन्तव्यम् । यं प्रति य आदिरन्त्य इति च भवति तस्य ग्रहणम्'[2] । इति । आद्यन्ताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते स एव सञ्ज्ञी इति भाष्याशयः । ननु वर्णद्वयऽप्याद्यन्तत्वसम्भवेनाद्यन्ताभ्यां मध्यघटितसमुदायस्याक्षेपाऽसम्भवः इति चेत्, मैवं वाच्यम् । स्वं रूपमित्यनुवत्त्या अत्र स्वपदेन यद्यपि 'अच्' इति चकारस्यापि सञ्ज्ञा प्राप्नोति तथापि 'प्रत्याहारेष्वितां न ग्रहणम्' इति निषेधात् सूत्रे च अन्त्येन इत्यत्र 'सहयुक्तऽप्रधाने[3]' इति जाततृतीयया अन्त्यस्याप्रधानत्वेनादेश्च तदपेक्षया प्रधानत्वेन स्वशब्दस्य सर्वनाम्नः स्वभावतः प्रधानबोधकत्वेन 'स्वस्य च रूपस्य' इत्यनेनादेरेव बोध्यत्वकल्पनाच्च । 'अच्' समुदायावयवस्यादेरकारस्यैव सञ्ज्ञा न तु अन्त्यस्य चकारस्यापि । तदेवं वर्णद्वयघटितसमुदायघटकस्यादेरेव सञ्ज्ञात्वे सञ्ज्ञायाः वैफल्यं प्रसज्येत । सञ्ज्ञायाः लाघवार्थत्वेनैकस्य बोधकत्वेन प्रत्याहारकरणे गौरवापत्तेः । 'अनाकृतिः सञ्ज्ञा, आकृतिमन्तश्च सञ्ज्ञिनः' इति भाष्यविरोधापत्तेश्च । अतः आद्यन्तघटितसमुदायस्याक्षेपे मध्यघटिताघटितसमुदायस्य ग्रहणे मध्यघटितसमुदाय-घटकानामेवानेन सञ्ज्ञा विधीयते न तु द्वयोः । तदेवं समुदायस्य सञ्ज्ञित्वे 'अ-इ-उ-ण्' इत्यत्र पठितस्य अकारादिचान्तसमुदायस्य अच्पदबोध्यस्य क्वचिदपि लक्ष्ये अभावेन 'इको यणचि' इत्यादीनां वैयर्थ्यापत्त्या समुदायं प्राप्नुवती सञ्ज्ञा तदवयवे विश्राम्यतीति प्रत्याहारेण समुदायघटकवर्णानामेव बोधो न समुदायस्य । अत्रादिपदमन्त्यपदमित्पदञ्च स्वसदृशबोधकम् । तथैवमादिरन्त्येन सहेतेत्यस्य 'अन्त्येत् सदृशेन सहितः आदिसदृशः प्रकृतसादृश्यप्रतियोग्याद्यन्तावयवकसमुदायघटकानां सञ्ज्ञा'[4] इत्यर्थः । अर्थात् अन्त्येत् 'ऐऔच् इत्यादिसूत्रस्थचकारादिः, तत्सदृशेन 'अच्' इत्यादि-

प्रत्याहारावयवकचकारादिना सहितो य आदिः – अइउण् इत्यादिसूत्रस्थः, अकारादि-स्तत्सदृशः, 'अच्' इत्यादिप्रत्याहारघटकः अकारादिः, सः 'अच्' इत्यादिशब्दः, स्वान्त्यचकाराद्यनुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितेत्सञ्ज्ञकचकारान्तस्य, स्वाद्य-काराद्यनुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णसमाम्नायादिस्थाकाराद्यावयवकस्य संज्ञा,। इति भावः । तदेवैवमुक्तं दीक्षितैवृत्तौ – अन्त्येनेता सहित आदिर्मध्यागानां स्वस्य च सञ्ज्ञा स्यादिति[5] ।

2. **तस्मिन्निति निर्दिष्टे पूर्वस्य[6] ।**

परिभाषा सूत्रमेतत् । तस्मिन्निति सप्तम्येकवचनान्तम्, इतीत्यव्ययम्, निर्दिष्टे सप्तम्येकवचनान्तम्, पूर्वस्येति च षष्ठ्येकवचनान्तम् । अत्र तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् सप्तम्यन्तपदमेवार्थः । न तु 'तस्मिन्नणि च युष्माकास्माकौ[7]' इति सूत्रस्थतस्मिन् शब्दस्यानुकरणम् । तथा सति 'तस्मिन्' पदघटिते 'तस्मिन्नणि' इत्यत्र खञणोः प्रत्ययत्वात्, ताभ्यां यस्माद्विहितौ तदादेरुपस्थित्या 'निर्दिष्टऽणि च पूर्वयोर्युष्माकास्माकौ' इति न्यासेनैव सिद्ध स्वतन्त्रसूत्रप्रणयनं व्यर्थमव स्यात् । तथा च 'तस्मिन्' इत्यत्र अधिकरणे सप्तमो, न तु 'यस्य च भावेन भावलक्षणम्[8]' इत्यनेन लक्ष्यलक्षणभावः, 'उपपदविभक्तः कारकविभक्तिर्बलीयसी'ति न्यायात् । संहितायां सूत्रे अधिकरणं नाम् त्रिप्रकारकम् – व्यापकम्, औपश्लेषिकम्, वैषयिकमिति । शब्दस्य च शब्देन काऽन्याऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्, 'इको यणचि अचि उपश्लिष्टस्य'[9] इति भाष्याच्च । तदेवं 'तस्मिन्' इत्यस्य औपश्लेषिकाधि-करणसप्तम्यन्तपदमित्यर्थः । तस्य च 'निर्दिष्टे' इत्यनेन सामानाधिकरण्येनान्वयः । 'निर्दिष्टे' इत्यत्र 'निर्' इत्यस्य अव्यवधानमर्थः । दिशेरुच्चारणार्थः । क्तप्रत्ययार्थश्च कर्म । तथा च औपश्लेषिकाधिकरणसप्तम्यन्तपदस्य अर्थे अव्यवधानेनोच्चारिते पूर्वस्य कार्यं कर्त्तव्यमित्यस्यार्थः फलितः । तदेवोक्तं वत्तौ – सप्तमीनिर्देशेन विधोयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोद्धव्यमिति । एतत्सूत्राभावे 'इको यणचि' इत्यस्याजुपश्लिष्टस्य इकः स्थाने यण् इत्येवार्थः स्यात् । उपश्लषः अर्थात् सामीप्येन सम्बन्धः । उपश्लिष्टस्य अर्थात् समोपे स्थितस्य । सामोप्यञ्च व्यवधानऽपि भवति । यथा 'काशीसमोपे चैत्रस्य ग्रामः' इति व्यवहारः काशीचैत्रग्रामयोर्मध्ये

ग्रामान्तरादिसत्त्वऽपि भवति । तथा च 'सुधो उपास्य' इत्यत्र यदि अचिपदेन उकारो गृह्यते तदा तत्समोप इक् सकारात्तर उकार:, धकारात्तर इकारश्च उभयोर्यण् प्रसज्येत । यदि अच् धीशब्दस्य इकार:, तदा तत्समीप इक् सुशब्दस्योकार:, उपशब्दस्योकारश्च उभयत्र यण् प्राप्नोति । सामोप्यस्य पूर्वपरव्यवहिता–व्यवहितसाधारणत्वेन पूर्वस्य परस्य व्यवहितस्याव्यवहितस्य च कार्ये प्राप्ते तद्वारणार्थमिदमावश्यकम् ।

3. **इको यणचि**[१०] **।**

विधिसूत्रमेतत् । इक: षष्ठ्येकवचनान्तम् । यण् प्रथमैकवचनान्तम् । अचि सप्तम्येकवचनान्तम् । संहितायामित्यनुवर्त्तते । 'इक:' इत्यत्र 'षष्ठी शेषे' इति सम्बन्धे षष्ठी । सम्बन्धश्च द्वयमपेक्षते – प्रतियोगिनमनुयोगिनञ्च । यत: षष्ठी तदर्थ: प्रतियोगी । प्रतियोगिवाचकादेव षष्ठीविधानात् । परमनुयोगी त्वत्र नोपात्त: । अनुयोगिज्ञानं विना क: सम्बन्ध: षष्ठ्यर्थ: इति ज्ञानं न स्यात् । यथा 'राज्ञ:' इत्युक्त जन्यजनकभाव:, स्वस्वामिभाव:, अवयवावयविभाव: सम्बन्ध: इति निर्णयो न जायते। 'पुरुष:' इत्यादिविशेष्ये उक्त एव सम्बन्धविशेषज्ञानं जायते । अत: अत्र अनुयोगिनियमनाय 'षष्ठो स्थाने योगे'ति परिभाषासूत्रं प्रवर्तते । व्याकरणशास्त्रे असति प्रतिबन्धके षष्ठ्यर्थ: सम्बन्ध: स्थानपदार्थानुयोगिक एवेति । स्थानशब्दश्चात्र प्रसङ्गवचन: , न त्वधिकरणवचन: । अन्यथा शिवस्थाने कैलास:, विष्णुस्थाने वैकुण्ठ: इतिवत् अधिकरणवाचित्वे तु इको निवृत्तिर्न स्यात् । अचीत्यत्र अधिकरणे सप्तमी, न तु सतिसप्तमो । उपपदविभक्तर्कारकविभक्तिर्बलीयसीति न्यायात् । अधिकरणञ्चाधयसापेक्षम् । यथा – 'भूतले घट:' इत्यत्र भूतलं संयोगसम्बन्धेन घटाधार: , घटश्चाधेय: । तथा अचीत्यत्र अजव्यवहितपूर्वस्य यस्य कायं तदाधय: । अव्यवहितेत्यस्य लाभस्त्वत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रेण बोद्धयम् । तथा च अव्यवहितेऽचि परे इक: प्रसङ्गे यण् स्यात् संहितायामिति सूत्रार्थ: । तदेवोक्तं वृत्तौ – इक: स्थाने यण् स्यादचि संहितायामिति[11] ।

4. **विप्रतिषेधे परं कार्यम्**[12] **।**

नियमसूत्रमेतत् । विप्रतिषेधे सप्तम्येकवचनान्तम् । परम् प्रथमैकवचनान्तम् । कार्यम् प्रथमैकवचनान्तम् । विप्रतिपूर्वकात् 'षिधू शास्त्रे'[13] इति धातोः 'षिधु गत्याम्'[14] इत्यतो वा कर्मव्यतिहारे विद्यमानाद् 'भावे' इति घञ्प्रत्यये कृते सिद्धाऽयं विप्रतिषेधशब्दः । द्वे शास्त्रे अन्यत्र चरितार्थे यदा युगपदेकत्र प्राप्नुतस्तदा स विप्रतिषेधः । यथोक्तं भाष्ये – 'द्वौ प्रसङ्गौ यदा अन्यार्थौ भवत एकस्मिँश्च युगपत्प्राप्नुतः स विप्रतिषेधः'[15] इति । यथा – वृक्षाभ्याम् इत्यर्थं सुपि च[16] इति, वृक्षेषु इत्यर्थं बहुवचने झल्येत् इति । परं वृक्षेभ्यः इत्यत्र तु उभावपि युगपत्प्राप्नुतः । तत्रानेन परं यत् 'बहुवचने झल्येत्'[17] इत्येत्वकार्यं तदेव भवति । परस्परविरोधश्च तुल्यबलयोरेव भवति, न तु मशकसिंहयोः । अत्र शास्त्रे विरोधश्च द्वयोः शास्त्रयोः 'स्वविधेयघटितस्य साधुत्वं, विधेयान्तरघटितस्य चासाधत्वमि'ति बोधनेन भवति । यथा – वृक्षेभ्यः इत्यत्र सुपि च इत्यनेन आघटितस्य साधुत्वम्, एकारघटितस्य च असाधुत्वं बोद्ध्यते । बहुवचने झल्येत् इत्यनेन च एकारघटितस्य साधुत्वम्, आकारघटितस्य चासाधुत्वं बोध्यत इत्युभयोर्विरोधः । अतः 'विप्रतिषेधे परं कार्यम्' इत्यस्य वत्तौ तुल्यबलविरोध सति परं कार्यं स्यादित्यर्थ उक्तः । शास्त्रे च स्वस्यापेक्षयेतरबलवत्त्वप्रयोजकानि क्रमशः पूर्वत्वपरत्वनित्यत्वान्तरङ्गत्वापवादत्वानि । अतः बलवत्त्वप्रयोजकनित्यत्वान्तरङ्गत्वापवादत्वाद्यभावे एव पूर्वात्परस्य बलवत्त्वं भवतीत्यस्यार्थो ज्ञेयः । अनेन सूत्रेण क्वचित् वृक्षाभ्याम्, वृक्षेषु इत्यादौ चरितार्थयोः सुपि च बहुवचने झल्येदित्याद्योरेकस्मिन् 'वृक्षेभ्यः' इत्यत्र युगपदुभयोः प्राप्ते विरुद्धयोरात्वैत्वादिकार्ययोर्युगपदसम्भवेन बाधकाभावात् ण्वुल्तृचाविव पयायेण भविष्यतः । तदा परकार्ययस्यापि पक्षे सिद्धतया 'सिद्धो सत्यारभ्यमाणो विधिर्नियमाय कल्पते' इति न्यायेन परमेव भवति न पूर्वमिति नियम्यते । तदा च 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति फलति । यदा लोके कश्चन द्वयोरेको भृत्यो भवति तयोः पयांयेण कार्यं करोति । यदि द्वयोः स्वामिनोः एकदैव एकस्य पूर्वदिशि प्रषणमपरस्य पश्चिमदिशि प्रषणं तदा पक्षपातशून्यो भृत्य उभयोः कार्यं न करोति उदास्ते । तथैवात्र प्रषकः शास्त्रम्, लक्ष्यं प्रष्यं वर्त्तते । लक्ष्यार्थकशास्त्रयोः विरुद्धयोर्युगपत्प्राप्तौ तल्लक्ष्यं केनापि न सम्बध्नाति । इत्येवं द्वयोरपि शास्त्रयोः

प्रवत्त्यभावे प्राप्ते 'विप्रतिषेधे.' इति शास्त्रं परं विधत्ते, न तु पूर्वं निषेधति । परमस्मिन् कृते यदि पूर्वस्य प्राप्तिः सम्भवत्तदा तदपि स्यात् । इत्येवं 'पुनः प्रसङ्गविज्ञानात्सिद्धमि'ति न्यायाऽपि सिद्धयति । तेन 'भिन्धि' 'भिन्तात्' इत्युभऽपि सिद्धयतः ।

निष्कर्षः –

तदनेनेदमत्रविज्ञप्तम् । यन्न केवलं पदच्छेदविभक्तिसमासानुवृत्त्यधिकारज्ञानेन पदानां क्रमतो योजनेनैव वा सूत्रवृत्तिः निर्मातुं शक्यते । ततोऽप्यन्येंशाः सूत्रवृत्तिस्वरूपनिमाणप्रक्रियायां ध्यातव्याः भवन्ति । ते यथा –

- सूत्रेण सह परिभाषायाः एकवाक्यता ।
- समुचितन्यायस्यैकवाक्यत्वम् ।
- सत्यावश्यके विभक्तिविपरिणामः ।
- तस्मिन्निति निर्दिष्टे पूर्वस्येत्यादौ तस्मिन्नित्यादिपदानां पाणिन्यभिप्रतार्थत्वम् ।
- प्रक्लृप्तवृत्त्या भाष्यार्थसङ्गतिः ।
- वृत्तौ प्रयुक्तानां पदानां व्यावृत्तविचारः । इत्यादयः ।

सन्दर्भाः

1. 1-1-70, पाणिनीयाष्टाध्यायी ।
2. 1-1-70 , व्याकरणमहाभाष्यम् ।
3. 2-3-19, पाणिनीयाष्टाध्यायी ।
4. आदिरन्त्येन सहेतेति सूत्रस्य वैयाकरणसिद्धान्तकौमुद्याः लक्ष्मोटीका ।
5. आदिरन्त्येन सहेता , वैयाकरणसिद्धान्तकौमुदी ।
6. 1-1-65, पाणिनीयाष्टाध्यायी ।
7. 4-3-2, पाणिनीयाष्टाध्यायी ।
8. 2-3-37, पाणिनीयाष्टाध्यायी ।
9. 6-1-74, व्याकरणमहाभाष्यम् ।
10. 6-1-74, पाणिनीयाष्टाध्यायी ।

11. 6-1-74, वैयाकरणसिद्धान्तकौमुदी ।
12. 1-4-2,पाणिनीयाष्टाध्यायी ।
13. पाणिनीयधातुपाठः, भ्वादिगणः, 38 ।
14. पाणिनीयधातुपाठः, भ्वादिगणः, 37 ।
15. 1-4-2, व्याकरणमहाभाष्यम् ।
16. 7-3-102, पाणिनीयाष्टाध्यायी ।
17. 7-3-103, पाणिनीयाष्टाध्यायी ।

सन्दर्भग्रन्थाः

1. वैयाकरणसिद्धान्तकौमुदी, (मनोरमातत्त्वबोधिनीसहितः) ।
2. वैयाकरणसिद्धान्तकौमुदी, (लक्ष्मीटीका) ।
3. पाणिनीयाष्टाध्यायी ।
4. पाणिनीयधातुपाठः ।
5. व्याकरणमहाभाष्यम् ।
6. परिभाषेन्दुशेखरः (विजयाव्याख्योपेतः) ।

शोधच्छात्रा (व्याकरणविभागः)

राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)

क. जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - ७७

❖❖❖

सभ्याभरणे समर्थसूत्रवृत्तिविचारः

✍ एल्. सविता आर्या

(व्यपेक्षालक्षणत्वेनैकार्थीभावलक्षणत्वेन च सामर्थ्यस्य द्वैविध्ये प्राप्ते सभ्याभरणाख्ये ग्रन्थे समर्थः पदविधिरिति पाणिनीयसूत्रं विचार्यते । व्यपेक्षालक्षणस्य सामर्थ्यस्य स्वीकारे, अवयवे सामर्थ्यमस्तीति पक्षः । एकार्थीभावलक्षणस्य तु, समासादिषु पञ्चसु विशिष्ट एव शक्तिर्न त्ववयवे इति भाष्यमतानुसारेण विशिष्ट समुदाय एव शक्तिरिति रचयित्री प्रदर्शयति । एकार्थीभावस्य विशिष्टैकार्थप्रतिपादनाय समुदायशक्तिः प्रवर्तते । व्यपेक्षायां तु परस्परान्वय आकांक्षयैवेति भेदः । वृत्तिश्च परार्थस्याभिधया बोधनमिति फलितोऽर्थोऽपि रचनायाश्चास्या ज्ञेयः ।)

समर्थः पदविधिः (2-1-1) । विधीयते इति विधिः-कार्यम् । पदस्य विधिः पदविधिः इति शेषषष्ठ्या समासः । तदाह-पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्य इति सूत्रार्थः । सूत्रे समर्थशब्दः समर्थाश्रिते लाक्षणिकः । पदविधिरित्यत्र पदग्रहणेन पदविधौ एव सामर्थ्यमपेक्ष्यते, वर्णविधौ तु समर्थपरिभाषायाः अपेक्षा नास्ति अतः सामर्थ्याभावेऽपि वर्णविधिस्तु सिध्यत्येव, तद्यथा-''तिष्ठतु दध्यशान त्वं शाकेन'' इत्यादौ यणादेशरूपवर्णविधिः सामर्थ्याभावेऽपि सिध्यति ।

पदानां सामर्थ्यम् असामर्थ्यं वा कथमिति ज्ञानाय प्रयुक्तपदेषु आकांक्षा-योग्यता-आसत्तिश्च इत्येतत् त्रितयं भाव्यम् । त्रयाणामभावे असामर्थ्यमेव । आकांक्षा हि यथा-दशरथस्य पुत्रः इति वाक्ये दशरथस्य इति वचनानन्तरं वाक्यपूर्तौ दशरथस्य किम्? इत्याकांक्षायाः निवृत्तिः पुत्र इति वचनेन भवति । योग्यता जलेन सिञ्चति इति वाक्ये परस्परपदयोः या योग्यता सा योग्यता वह्निना सिञ्चति इति वाक्ये नास्ति । योग्यताभावात् अनयोः पदयोः परस्परं सामर्थ्यं न भवति । आसत्तिर्नाम सन्निधिः-सामीप्यम् । तद्यथा-दशरथस्य पुत्रः अनयोः पदयोः परस्परं सामर्थ्यं न भवति । आसत्तिर्नाम सन्निधिः-सामीप्यम् । तद्यथा-दशरथस्य पुत्रः अनयोः पदयोः परस्पराकांक्षा योग्यता च वर्तते । किन्तु उच्चारणप्रसङ्गे यदि उभयोः पदयोः कालव्यवधानं भवति चेत् इष्टार्थाभिधानं न स्यात्,

पदयोः सामीप्याभावात् । एवञ्च आकांक्षायोग्यतयोः सत्यपि आसत्तेरभावात् दशरथस्य......पुत्रः .....अनयोः परस्परं सामर्थ्यं न सिध्यति ।

सामर्थ्यञ्च द्विविधम्-व्यपेक्षालक्षणम्, एकार्थीभावलक्षणञ्चेति । तत्र स्वार्थपर्यवसायिनां पदानाम् आकांक्षादिवशाद् यः परस्परान्वयः तद् व्यपेक्षाभिधं सामर्थ्यम् विशिष्टा अपेक्षा व्यपेक्षा इति व्युत्पत्तेः । इदञ्च व्यपेक्षाभिधं सामर्थ्यं राज्ञः पुरुषः इत्यादि वाक्ये एव भवति । तत्र च एकैकस्य पदस्य यः सन्निहिता योग्यश्च अर्थः तेन तेन अन्वयो भवति । एकार्थीभावलक्षणसामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थवत्वेन पथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम् । संगतार्थः समर्थः, संसृष्टार्थः समर्थः इति व्यत्पत्तेः । संगतिः संसर्गश्च एकीभाव एव । यथा-संगतं घृतं तैलेन एकीभूतमिति गम्यते । इदञ्च एकार्थीभावरूपसामर्थ्यं राजपुरुषः इत्यादि वृत्तावेव ।

सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न, इति वचनात् ऋद्धस्य राजपुरुष इत्यत्र राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणं नान्वेति । एवञ्चेत् देवदत्तस्य गुरुकुलम् इति भाष्यकारप्रयुक्तमसंगतं स्यात् इति न वाच्यम् । उपसर्जनस्य नित्यसापेक्षत्वात् अत्र समासः । उक्तञ्च हरिणा-

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते ॥
समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥

एकार्थीभावश्चायं लौकिकविग्रहवाक्ये कल्प्यते । एवञ्च यत्र-यत्र पदविधित्वं तत्सर्वं समर्थाश्रितबोध्यत्वात् समास-कृत्-तद्धित-एकशेष-सनाद्यन्तादिषु पञ्चसु पदविधित्वदर्शनात् विशिष्टे समुदाये एव एतेषां शक्तिः-अर्थाभिधानयोग्यता अस्ति, न तु अवयवे । तदाह **भाष्यकारः-समासादिपञ्चसु विशिष्टे एव शक्तिर्न त्ववयवे इति** । व्यपेक्षापक्षस्य अवयवे सामर्थ्यमस्तीति मतम् ।

अथ एतेषां एकार्थीभावरूपसामर्थ्याश्रितानां पञ्चानां कृत्तद्धितसमासैकशेषसनाद्यन्तानां वृत्तित्वव्यवहारः । का नाम वृत्तिरिति जिज्ञासायामाह-**परार्थाभिधानं वृत्तिः** । तच्च यथा-राजपुरुष इत्यादौ राजशब्दः पुरुषस्यार्थस्यापि बोधकः, पुरुषशब्दः राजशब्दस्यार्थस्यापि

बोधको भवति । वाक्यावस्थायां तु राज्ञः पुरुष इत्यत्र राजशब्दः केवलं स्वार्थस्यैव बोधकः, पुरुषशब्दश्च । अतः उक्तम्-परस्य शब्दस्य यो अर्थः तस्याभिधानं शब्दान्तरेण यत्र भवति सा वृत्तिरिति ।

एवञ्च समासादिपञ्चसु समर्थाश्रितपदविधिषु एकार्थीभावरूपा या वृत्तिः सा **वृत्तिर्द्विधा-जहत्स्वार्था अजहत्स्वार्था च ।** तत्राह कौण्डभट्टः समासशक्तिनिर्णये-

जहत्स्वार्थाऽजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः ॥३०॥

जहति त्यजन्ति स्वानि पदानि अर्थं यस्यां सा जहत्स्वार्थावृत्तिः । न जहति त्यजन्ति स्वानि पदानि अर्थं यस्यां सा अजहत्स्वार्था इति । तत्रोक्तं **परमलघुमञ्जूषायाम्-अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं जहत्स्वार्थात्वम् ।** अर्थात् अवयवानां स्वसमावेशितपदानां यो अर्थः तन्निरपेक्षत्वे सति तदुदासीनत्वे सति समुदायार्थबोधिका-समुदायस्य सम्मिलितपदानां यो अर्थः तस्य बोधिकात्वं ज्ञापिकात्वं जहत्स्वार्थाख्यवृत्तिलक्षणम् । **अवयवार्थसंवलितसमुदायार्थबोधिकात्वमजहत्स्वार्थात्वम् ।** अर्थात् अवयवानां समाविष्टपदानां ये अर्थाः तैः संवलितः संसृष्टः पदसमुदायस्य यो अर्थः तस्य बोधिकात्वं ज्ञापिकात्वम् अजहत्स्वार्थाख्यवृत्तिलक्षणम् । रथन्तरं सामभेदः, शुश्रूषा सेवा इति जहत्स्वार्थायाः उदाहरणम् । श्रुधातोः सन्प्रत्यये शुश्रूषा इति सिद्धः अयं शुश्रूषाशब्दः श्रुधातोः श्रवणार्थं नैव बोधयति, न च सन्प्रत्ययस्य इच्छार्थमेव गृह्णाति किन्तु तद् विलक्षणमेव सेवार्थं बोधयति इत्यतः जहत्स्वार्थावृत्तिरित्याह । राजपुरुष इत्यादौ तु राज्ञः पुरुषः इति पदद्वययोगेन षष्ठीतत्पुरुषात् सिद्धः अयं शब्दः राजसम्बद्धपुरुषरूपम् अवयवार्थमपि बोधयति, राजसेवकरूपं समुदायार्थमपि बोधयति अतः अजहत्स्वार्थावृत्तेरिदम् उदाहरणम् । तत्र जहत्स्वार्थायामेकार्थीभावः अजहत्स्वार्थायां तु व्यपेक्षा एव । समर्थः पदविधिः (2-1-1) इति सूत्रे समर्थपदम् एकार्थीभावरूपसामर्थ्यस्यैव बोधकमिति। तेन एकार्थीभावसामर्थ्ययुक्तपदयोः पदानां वा समासः इति बोध्यम् ।

अथ च पाणिनिः यथा समर्थस्य समर्थाश्रितस्यैव द्विधा वृत्तिमिच्छति, तद्वल्लाकेऽपि पदेन, सम्पदा, श्रिया च ये जनाः समर्थाः भवन्ति उत समर्थजनानां संसर्गे भवन्ति तत्रैव सामान्यजनाः वृत्तित्वमिच्छन्ति, व्यवहर्तुमिच्छन्ति इति सुभाषितपक्षे एवं विचारः

सभ्याभरणरीत्या उपस्थाप्यते । विवादास्पदीभूते न्याये क्रियमाणे सर्वेऽपि लोकाः जनाः वादिप्रतिवादिनोर्मध्ये प्रबलस्यैवपदेन, श्रिया वा समर्थस्यैव पक्षं विदधते, तत्रैव तेषां लाभदर्शनात् । प्रसङ्गेऽस्मिन् उपश्लोकयति सभ्याभरणकारः-

किं चित्रं यदि लोका अज्ञाः सर्वे समर्थपक्षे स्युः ।
इच्छति पाणिनिरपि चेद् द्विविधा तस्यैव वृत्तिमिह ॥९/९॥

महान् वैयाकरणो लोकज्ञः पाणिनिरपि इह व्याकरणशास्त्रे समर्थस्यैव द्विविधां वृत्तिमिच्छति समर्थः पदविधिः (2-1-1) इति स्मरणात् । तथा च समर्थानां प्रथमाद्वा (4-1-81) इति समर्थाधिकारात् समर्थस्यैव तद्धितवृत्तिं च यच्छति । तद्धिता नाम सुभाषितपक्षे-ये समर्थाः तस्मै एव हितमिच्छन्ति इत्यर्थः । किं तर्हि लौकिकानाम् अज्ञानयुतानां जनानाम्? एतेऽपि यदि लोके प्रबलस्यैव समर्थस्यैव पक्षे व्यवहर्त्तुमिच्छन्ति चेत् किं तत्र वैचित्र्यम्? न किञ्चिदित्यर्थः ।

एवञ्च समर्थः पदविधिः इति सूत्रे सामर्थ्यविचारशृङ्खलायां वृत्तित्वविचारपुरस्सरं सभ्याभरणे निर्दिष्टेन एकेन श्लोकेन सुभाषितविचारमत्र प्रास्ताविषम् ॥

संविदाध्यापिका (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
राजीवगान्धीपरिसरः
श्रृङ्गेरी

❖❖❖

RELATION BETWEEN ENGLISH AND SANSKRIT LITERATURE

✍Trupti Mohanta

(Any literature has some unique features which could resemble ideologically with the other of different language having different cultural, thematical and linguistic differences. Here, the author is attempting to establish the theory of relative linguistic features on the context of the proto-Indo-European phonetic trends and variants. The philological factors on the basis of the centum and shatam groups are highlighted here with a view to comparing such trends and variants. An elaborate appendix to the article is always been appreciated in a research point of view. Indo-Europian theatres of ancient and medieval renaissance periods are also under a healthy as well as meaningful discussion.)

Introduction

The article is based on the relationships between the Sanskrit and English literature. It states the origin, events, peoples and the times of the languages, the developments of these literatures and the impact on the society. How the times changes the article types and the way of development in languages. It explains about many poets, writers and events that occurred for the betterment and development of the language and the society, cooperation of the Kings and the governments at the same time the evolution of the new things to the society.

Contents

- **English Literature**
- **Eras of English Literature**
- **Sanskrit Literature**
- **Era of Sanskrit Literature**
- **Relationship between English and Sanskrit Literature**

ENGLISH LITERATURE

English literature is generally seen as beginning with the epic poem Beowulf, the most famous work in Old English, which was written in England sometime between the 8th and the early 11th century. Despite being set in Scandinavia Beowulf has achieved national epic status in England. The next important landmark is the works of the poet Geoffrey Chaucer (c. 1343–1400), especially The Canterbury Tales. Then during the Renaissance, especially the

late 16th and early 17th centuries, major drama and poetry was written by Edmund Spenser, William Shakespeare, Ben Jonson, John Donne and others. Another great poet, from later in the 17th century, was John Milton (1608–74), author of the epic poem Paradise Lost (1667). The late 17th and the early 18th centuries are particularly associated with satire, especially in the poetry of John Dryden and Alexander Pope, and the prose works of Jonathan Swift. The 18th century also saw the first British novels in the works of Daniel Defoe, Samuel Richardson, and Henry Fielding, while the late 18th and early 19th centuries were the period of the Romantic poets, such as Wordsworth, Coleridge, Shelley and Keats.

It was in the Victorian era (1837–1901) that the novel became the leading literary genre in English, dominated especially by Charles Dickens, but there were many other significant writers, including the Brontë sisters, and then Thomas Hardy, in the final decades of the 19th century. America began to produce major writers in the 19th century, including novelist Herman Melville, author of Moby Dick (1851) and the poets Walt Whitman and Emily Dickinson. Another American, Henry James, was a major novelist of the late 19th and early 20th century, while Polish-born Joseph Conrad was one of the most important British novelists of the first decade of the 20th century.

Irish writers were especially important in the 20th century, including James Joyce and later Samuel Beckett, both central figures in the Modernist movement. Americans, like poets T. S. Elliot and Ezra Pound and novelist William Faulkner, were other important modernists. In the mid 20th century major writers started to appear in the various countries of the British Commonwealth, including several Nobel laureates. Many major writers in English in the 20th and 21st centuries have come from outside the United Kingdom. The term Post Modern Literature is used to describe certain tendencies in post-World War II literature. It is a continuation of the experimentation championed by writers of the modernist period, relying heavily, for example, on fragmentation, paradox, questionable narrators, etc. It is also a reaction against the enlightenment ideas implicit in Modernist literature.

ERA OF ENGLISH LITERATURE:

Old English literature: c.450–1066

The old English literature, or the Anglo-Saxon literature, encompasses the surviving literature written in Old English in Anglo-Saxon England, in the period after the settlement of the Saxons and other Germanic tribes in England, as the Jutes and the Angles, c.450, after the withdrawal of the Romans, and "ending soon after the Norman Conquest" in 1066; that is, c. 1100–50. These works include genres such as Epic poetry, hagiography, sermons, Bible translations, legal works, chronicles, riddles, and others. In all there are about 400 surviving manuscripts from the period. The oral tradition was very strong in early English culture and most literary works were written to be performed and Epic poems were thus very popular. In all there are about 400 surviving manuscripts from the period.

Middle English literature: 1066–1500

In this period religious literature continued to enjoy popularity and Hagiographies were written, adapted and translated, for example, The Life of Saint Audrey, Eadmer's (c. 1060 – c. 1126) contemporary biography of Anselm of Canterbury, and the South English Legendary. At the end of the 12th century, Layamon's Brut adapted Wace to make the first English-language work to discuss the legends of Arthur and the Knights of the Round Table. It was also the first historiography written in English since the Anglo-Saxon Chronicle. In this century a new form of English now known as Middle English evolved. This is the earliest form of English which is comprehensible to modern readers and listeners, albeit with difficulty.

Middle English lasted until the 1470s, when the Chancery Standard, a London-based form of English, became widespread and the printing press started to standardize the language. At this time in England literature was being written in various languages, including Latin, Norman-French, and English: the multilingual nature of the audience for literature in the 14th century is illustrated by the example of John Gower (c. 1330 – October 1408). Significant religious works were also created in the 14th century, including works by an anonymous author in the manuscript called the Katherine Group, by Julian of and Richard Rolle. In the middle Ages, drama in the vernacular languages of Europe may have emerged from religious enactments of the liturgy. Mystery plays were presented on the porch of the cathedrals or by strolling players on feast days.

English Renaissance: 1500–1660

It is associated with the Pan-European Renaissance that is usually regarded as beginning in Italy in the late 14th century. Like most of the northern Europe, England saw little of these developments until more than a century later. Renaissance style and ideas, however, were slow in penetrating England, and the Elizabethan era in the second half of the 16th century is usually regarded as the height of the English Renaissance.

Elizabethan and Jacobean period (1558–1625)

During the reigns of Elizabeth I (1558–1603) and James I (1603–25), a London-centered culture, both courtly and popular, produced great poetry and drama. English playwrite combined the influence of the Medieval theatre with the Renaissance's rediscovery of the Roman dramatists, Seneca, for tragedy and Plautus and Terence, for comedy. Italy was an important source for Renaissance ideas in England and the linguist and lexicographer John Florio (1553–1625), whose father was Italian, a royal language tutor at the Court of James I, who had furthermore brought much of the Italian language and culture to England. William Shakespeare (1564–1616) stands out in this period as a poet and playwright as yet unsurpassed. Shakespeare was not a man of letters by profession and probably had only some grammar in his school education.

Late Renaissance: 1625–1660

The Metaphysical poets John Donne (1572–1631) and George Herbert (1593–1633) were still alive after 1625, and later in the 17th century a second generation of metaphysical poets were writing, including Richard Crashaw (1613–49), Andrew Marvell (1621–1678), Thomas Traherne (1636 or 1637–1674) and Henry Vaughan (1622–1695). The Cavalier poets were another important group of 17th-century poets, who came from the classes that supported King Charles I during the English Civil War (1642–51). (King Charles reigned from 1625 and was executed 1649).

Neo-Classical Period: 1660–1798

Restoration Age: 1660–1700

Main articles: Restoration literature and Restoration Comedy. Restoration literature includes both Paradise Lost and the Earl of Rochester's Sodom, the high spirited sexual comedy of the Country Wife and the moral wisdom of Pilgrim's Progress.

Augustan Literature (1700–1750)

Main articles : The 18th-century literature and the Augustan literature. During the 18th century literature reflected the worldview of the Age of Enlightenment (or Age of Reason): a rational and scientific approach to religious, social, political and economic issues that promoted a secular view of the world and a general sense of progress and perfectibility.

19th-Century Literature
Romanticism (1798–1837)

Main articles: Romanticism and Romanticism in Scotland. Romanticism was an artistic, literary and intellectual movement that originated in Europe toward the end of the 18th century. Various dates are given for the Romantic period in British literature, but here the publishing of Lyrical Ballads in 1798 is taken as the beginning, and the crowning of Queen Victoria in 1837 as its end, even though, for example, William Wordsworth lived until 1850 and both Robert Burns and William Blake published before 1798.

Victorian Literature (1837–1901)

The main articles are Victorian literature which is also known as American literature (sections 4–6). It was in the Victorian era (1837–1901) that the novel became the leading literary genre in English. Women played an important part in this rising popularity both as authors and as readers. Monthly serializing of fiction encouraged this surge in popularity, due to a combination of the rise of literacy, technological advances in printing, and improved economics of distribution. It includes the Victorian novels and Victorian drama.

English Literature Since 1901

The main article is Modernist literature. It includes the literature from 1901 to 1939 and 1940 to 21st century.

20th-Century Genre Literature

The main article in this literature is Genre fiction.

SANSKRIT LITERATURE

Sanskrit literature bears its first initiations with the Vedas and continues with the Sanskrit Epics of Iron Age. The golden age of Classical

Sanskrit literature dates back to late Antiquity (approximately the 3rd to 8th centuries A.D). Sanskrit literature traces its roots back to the Vedic Age. Alexander's conquest of India was a significant episode in Sanskrit literature, which was fundamental to lay stress on Sanskrit drama. Despite the influence, Sanskrit plays uphold their individualism and subjects of the plays ranged from tragedy to light comedy. Many Sanskrit dramatists are also known to have based their works pivoting around the plot of the Ramayana and the Mahabharata. Sanskrit was the language spoken by a cultured minority. Sanskrit in Vedas and Upanishads The four Vedas in Sanskrit literature - Rig Veda, Yajur Veda, Sama Veda and Atharva Veda, each with a principal Samhita and a number of circum-Vedic genres, also includes Brahmanas, Aranyakas and Vedanga. The basic period of Vedic literary activity falls between the 9th to 7th centuries, when the various shakhas had amassed, collected and memorized their particular corpus.

Era of Sanskrit Literature

Sanskrit Sutra Literature

Sutra literature under Sanskrit literature was the upcoming genre that had indeed witnessed much advancement in ancient Indian literary forms. Late Iron Age scholarship (ca. 500 to 100 B.C.E.) had built up knowledge into the cardinal Sutra treatises. The Sanskrit Sutra treatises had included the Vedanga and the religious or the philosophical Brahma Sutras, the Yoga Sutras and the Nyaya Sutras. In the Vedanga categories of grammar and phonetics, no author perhaps has had impressed greater influence than Panini with his Ashtadhyayi (ca. 5th century B.C.).

Sanskrit Literature in Hindu Epics

The evolution of Sanskrit literature indeed had happened in a rhythmic and systematic manner with each period significantly following its predecessor. The Epic Age with their priceless Sanskrit Epic poetry had appeared approximately between the 6th to 1st centuries B.C. It also witnessed the authoring and editing of the two great epics, the Mahabharata and the Ramayana.

Classical Sanskrit Literature

The Classical Period of Sanskrit literature dates back to the Gupta period and the consecutive pre-Islamic Middle kingdoms of India. Sanskrit drama had catapulted forth during the final pre-Christian centuries, influenced

in part by Vedic mythology and partly by Hellenistic drama. Sanskrit drama indeed had touched its peak sky-high limit within the 4th and 7th centuries. The celebrated Sanskrit dramatists include Shudraka, Bhasa, Asvaghosa and of course, Kalidasa.

Later Sanskrit Literature

The period of later Sanskrit literature is acknowledged to have begun post the Classical Sanskrit development and culmination, precisely after the 10th century. Some significant works from the 11th century literary genre comprise the Katha saritsagara and the Gita Govinda. The Kathasaritsagara by Somadeva in Sanskrit was an 11th century poetic adaptation of Brihat-katha penned during 5th century B.C. in the Paishachi language. The Gita Govinda by the Oriya born Sanskrit composer Jayadeva is the account of Lord Krishna's passion for Radha. The Ashtapadis of the Gita Govinda also establishes itself as a staple theme in the Bharatnatyam and the Odissi classical dance performances.

Modern Sanskrit Literature

Sanskrit language has evolved and with the passage of time several new literary works have been created in this literature. Vidyadhar Shastri had composed two epic poems named 'Mahakavya', along with seven short poems, three songs known as 'stavana kavya' and three plays. Other modern Sanskrit works involve minor works on 'Prasthanatrayi' and others. Jagadguru Rambhadracharya and Abhiraja Rajendra Mishra are among the learned scholars in the field of Sanskrit literature in modern times. The daily employment of Sanskrit for general literature and literary purposes beyond the 11th century, indeed had suffered a sudden decline. This was due to the incredible emergence of literature in vernacular Indian languages. Sanskrit however continued to be utilised for Hindu religious rituals and philosophical literatures. Sanskrit literature conforms to grammatical rules particularly to the work authored by Panini around 500 BC. Sanskrit literature is flexible, polished, expressive and direct. The Yoga Sutras of Patanjali and Upanishads were all translated into foreign languages like Persian and Arabian due to their rich quality. The Panchatantra was also translated into Persian.

Relationship between English Literature and Sanskrit Literature

"The Sanskrit language, whatever be its antiquity, is of wonderful structure; more perfect than the Greek, more copious than the Latin, and more

exquisitely refined than either, yet bearing to both of them a stronger affinity, both in the roots of verbs and in the forms of grammar, than could not possibly have been produced by accident; so strong indeed, that no philologer could examine them all three, without believing them to have sprung from some common source which, perhaps, no longer exists; there is a similar reason, though not quite so forcible, for supposing that both the Gothick and the Celtick, though blended with a very different idiom, had the same origin with the Sanskrit; and the old Persian might be added to the same family"

So said Sir William Jones – the English Philologist who for the first time in 1786 suggested in his book "The Sanscrit Language" that the Greek and the Latin were related to Sanskrit and perhaps the even Gothic the Celtic and the Persian languages were related to Sanskrit.

It was this work which later gave birth to the so called Proto-Indo-European theory which instead of looking into Sanskrit being the root language of all Indo-European languages, suggests that all Indo-European languages including Sanskrit came from another so far unheard of language called PIE or Proto-Indo-European language.

Be it Greek, Latin, English, Hindi, Lithuanian – Sanskrit is the mother of all Languages. Even Scholars like Voltaire, Immanuel Kant etc. believed that Sanskrit was the root of all Indo-European languages.

"I am convinced that everything has come down to us from the banks of the Ganges" said Voltaire. He believed that the "Dynasty of Brahmins taught the rest of the world".

"Mankind together with all science must have originated on the roof of the world ie the Himalayas" declared Immanuel Kant.

Both the literature initiated with the epics. The Sanskrit literature begins with the epics of irony where the English literature is with the epics of poem. The Sanskrit literature is one of the oldest literatures with respect to other languages. The Sanskrit articles are more focused on the Vedas, epics of irony, the Upanishads where at the same time the English articles are on the poem and drama and novels. The English article modified into many languages and many poems were written considering the many aspects like human tendency, nature and society. The basic relations in both the litreture are both languages are developed with respect to the time for the betterment of the society and improvement of the language. The many word of English is originated from Sanskrit. The literature states the basic culture and valuable

message to the society. We can observe the development of the grammar and phrases with the running frame of time.

All I do is present below a list of English words which are derived from Latin/Greek/Persian which are in turn derived from Sanskrit. Indians will be quick enough to recognize these words in their own language since most Indian languages have also originated from Sanskrit and even the other languages have a great deal of Sanskrit influence on them.

And here goes the list of English words derived from Sanskrit. Just to make it clear the below list does not contain Sanskrit words that have been directly borrowed into English in recent times like Karma, Avatar, Mantra, Guru, Cheetah, Pundit, Juggernaut, Nirvana, Lakh etc. but lists only those English words which were derived from Sanskrit as English evolved by borrowing words from Greek/Latin etc.

MAINSTREAM *ENGLISH* WORDS WITH *SANSKRIT* ROOTS

Prati Shat (meaning for every hundred i.e percent) per centum (L) percent

ROOT SANSKRIT WORD	MEDIAN WORD IN LATIN (L) / GREEK (G) / ARABIC(A)	DERIVED ENGLISH WORD
Gau (meaning Cow)	Bous (G)	Cow
Matr (meaning Mother)	Mater (L)	Mother
Jan (meaning Generation)	Genea (G)	Gene
Aksha (meaning Axis)	Axon (G)	Axis
Navagatha (meaning Navigation)	Navigationem (L)	Navigation
Sarpa (meaning Snake)	Serpentem (L)	Serpent
Naas (means Nose)	Nasus (L)	Nose
Anamika (means Anonymous)	Anonymos (G)	Anonymous
Naama (means Name)	Nomen (L)	Name
Manu (means First Human)	??	Man/Men/Human
Ashta (meaning Eight)	Octo (L)	Eight
Barbara (meaning	Barbaria (L)	Barbarian

Foreign)		
Dhama (meaning House)	Domus (L)	Domicile
Danta (meaning Teeth)	Dentis (L)	Dental
Dwar (meaning Door)	Doru	Door
Dasha (meaning Ten)	Deca (G)	Deca
Madhyam (meaning Medium)	Medium (L)	Medium
Kaal (meaning Time)	Kalendae (L)	Calendar
Kri (meaning To Do)	Creatus (L)	Create
Mishra (meaning Mix)	Mixtus (L)	Mix
Ma (meaning Me/My)	Me (L)	Me
Pithr (meaning Father)	Pater (L)	Father
Bhrathr (meaning Brother)	Phrater (G)	Brother
Loka (meaning Place)	Locus (L)	Locale
Maha (meaning Great)	Magnus (L)	Mega
Mala (meaning Dirt/Bad)	Malus (L)	Mal as in Malicious, Malnutrition, Malformed etc
Makshikaa (meaning Bee)	Musca (L) (Meaning Fly)	Mosquito
Mrta (meaning Dead)	Mortis (L)	Murder
Na (meaning No)	Ne	No
Nakta (meaning Night)	Nocturnalis (L)	Nocturnal
Paad (meaning Foot)	Pedis (L)	Ped as in Pedestrial, Pedal etc
Pancha (meaning Five)	Pente (G)	Penta, Five
Parah (meaning Remote)	Pera (G)	Far
Patha (meaning Path)	Pathes (G)	Path
Raja / Raya (meaning	Regalis (L)	Royal

King)		
Sama (meaning Similar)	Similis (L)	Similar
Sapta (meaning Seven)	Septum (L)	Seven
Sharkara (meaning Sugar)	Succarum	Sugar / Sucrose
Smi (meaning Smile)	Smilen (L)	Smile
SthaH (meaning Situated)	Stare (L) (meaning To Stand)	Stay
Svaad (meaning Tasty)	Suavis (L)	Sweet
Tha (meaning That)	Talis (L)	That
Tva (meaning Thee)	Dih	Thee
Vachas (meaning Speech)	Vocem (L)	Voice
Vahaami (meaning Carry)	Vehere (meaning to Carry) (L)	Vehicle
Vama / Vamati (meaning Vomit)	Vomere (L)	Vomit
Vastr (meaning Cloth)	Vestire (L)	Vest
Yauvana (meaning Youth)	Juvenilis (L)	Juvenile
Narangi (meaning Orange)	Naranj	Orange
Pippali (meaning Pepper)	Piperi (G)	Pepper
Chandana (meaning Sandalwood)	Santalon (G)	Sandalwood
Chandra (meaning Moon)	Candela (L) (meaning light / torch)	Candle
Chatur (meaning Four)	Quartus (L)	Quarter
Shunya (meaning Zero)	Cipher (A)	Zero
a (prefix meaning "not" ex: gochara –	a (L)(G) (prefix meaning "not")	a (prefix meaning "not" ex: theiest-

agochara)		atheist
an (prefix meaning "not" ex: avashya – anavashya)	un (L)(G) (prefix meaning "not")	un (prefix meaning "not" ex: do-undo
Arjuna (meaning Charm of Silver)	Argentinum (L)	Argentinum – Scientific Name of Silver
Nava (meaning New)	Novus (L)	Nova – New
Kafa (meaning Mucus)	Coughen	Cough
Mithya (meaning Lie)	Mythos (G)	Myth
Thri (meaning Three)	Treis (G)	Three
Mush (meaning Mouse)	Mus (L)	Mouse
Maragadum (meaning Emerald)	Smaragdus (L)	Emerald
Ghritam (meaning Ghee)	??	Ghee
Srgalah (meaning Jackal)	Shagal (Persian)	Jackal
Nila (meaning Dark Blue)	Nilak (Persian)	Lilac
Srgalah	Shagal (Persian)	Jackal
Man (Ma as in Malaysia) (meaning Mind)	Mens (L)	Mind
Upalah (meaning Precious Stone)	Opalus (L)	Opal
Vrihis (meaning Rice)	Oriza (L)	Rice
Upalah (meaning Precious Stone)	Opalus (L)	Opal
Barbar (meaning stammering)	Barbaros (G)	Barbarian
Jaanu (meaning knee)	Genu (L)	Knee
Sunu (meaning Son or Offspring)	Sunu (German)	Son
Ghas (meaning eat)	Grasa (German)	Grass
Samiti (meaning	committere (L)	Committee

Committee)		
Sama (meaning Same)	Samaz (Proto Germanic)	Same
Lubh (meaning Desire)	Lubo (Latin and Proto Germanic)	Love
Agni (meaning Fire)	Ignis (L)	Ignite
Hrt (meaning Heart)	Herto (Proto Germanic)	Heart
Yaana (meaning journey, wagon)	Wagen (German)	Van, Wagon
Nara (meaning Nerve)	Nervus (L)	Nerve, Nervous
They (th pronounced as in thunder, meaning they)	Dei (Germanic)	They
Prati	per (L)	per
Prati Shat (meaning for every hundred, i.e percent)	per centum (L)	percent

Most of the Sanskrit Literature was translated into English by many Scholars and like so Sanskrit scholars also turned their attention to translating English literature like dramas of Shakespeare which are listed below:

1. **Venisasarthavahah (Merchant of Venice) – Ananta Tripathi Śarma 1969**
2. **Yatha Te Rocate (As you like it) – Ananta Tripathi Sarma 1969**
3. **Dinarkarajakumarahemalekham (Hamlet) – Sukhamay Mukhopadhyay 1971**
4. **Uthika (Romeo & Juliet) – Revaprasad Dvivedi 1978**
5. **Candrasenah Durgadesasya Yuvarajah (Hamlet)– SD Joshi & Pt. Vighnahari Deo 1980**
6. **Vasantikaswapnam – Sanskrit translation of Shakespeare's Midsummer Night's Dream by R Krishnamacharya**

Hence Bi-lateral and mutual study of literature will prove and improve relationship in between any two languages so that Inter-Personal communication will become good and National Integration and International Cooperation also increase for a peace community.



Figure-1: English-language writers: Geoffrey Chaucer, William Shakespeare, Jane Austen, Mark Twain, Virginia Woolf, T. S. Eliot, Vladimir Nabokov, Toni Morrison, Salman Rushdie.



Figure 2: The first page of Beowulf (Old English literature)



Figure3: Piers Ploughman from a 14th-century manuscript.

Figure 4: Nineteenth-century engraving of a performance from the Chester mystery play.



Panini, Sanskrit Literature



Gita Govinda, Sankrit Literature

Vedas, Sanskrit Literature

Research Scholar
Sahitya Department
R.S.Vidyapeetha
Tirupati, A.P.

❖❖❖

विवाहे मेलापकस्य महत्त्वम्

✍नूतानी ग्रहाचार्य

(विवाहादिमाङ्गलिककर्मणां जगति महत्त्वं सर्वे जानन्तितराम् । विवाहे मेलापककरणे गुणदोषावत्र चर्च्येते । रचयित्र्या ज्योतिर्विदा ग्रहनक्षत्राभ्यां मेलापकभेदोऽत्र सप्रमाणं प्रदर्शितः । शुभाशुभे फले निर्णेतुं ससूक्ष्मः सप्रमाणो विचारोऽपेक्षित एव । रचनायामस्यां लग्नाद् ग्रहाणां स्थानानि कानि कानि फलानि न कुर्वते इति प्रकामवर्णनं बोध्यम् । शुभफलानि च सुभिक्षता, सौख्यम्, शान्तिः, समृद्धिः इत्यादीनि । रचनेयं ज्योतिर्विदामामोदायोपकाराय च कल्प्यते ।)

यज्ञादीनां निर्वहणार्थं योगकालनिर्णयार्थमेव ज्योतिषशास्त्रं प्राचीनकाले प्रवृत्तम् । अर्हकाले क्रियमाणानां यज्ञानामेव समभीप्सितफलदानसामर्थ्यं स्यात् । न केवलमाध्यात्मिककार्येभ्यः किन्तु अनेकव्यवहारकर्मणां निर्वहणार्थमपि ज्योतिषे शुभकालनिर्णयः कृतः।

एवं ज्योतिषशास्त्रं स्वकीयकालनिरूपणेन मानवजीवनमाध्यात्मिकरीत्या भौतिकरीत्या च प्रभावयतीति सुस्पष्टम् । अतः एवं ज्योतिषशास्त्रं कालबोधकशास्त्रमिति प्रसिद्धम् । ज्योतिषं सिद्धान्त-होरा-संहितारूपेण त्रिधा ज्ञायते । तत्र होरास्कन्धे फलाफलविषयः लभ्यते । प्राचीनकाले एव मानवानां उपयोगार्थमनेके फलितग्रन्थाः लिखिताः आसन् । तेषु ग्रन्थेषु प्रत्येकस्य कार्यस्य शुभाशुभफलनिरूपणं कृतम् । अतस्तेषां फलितवैविध्यानां विवेचनमस्मिन् प्रबन्धे क्रियते ।

गृहस्थाश्रमधर्मपरिपालनाय विवाहसंस्कारः नितान्तावश्यकः अस्मिन् भारतभूखण्डेऽस्य संस्कारस्य विशेषविचारः क्रियते । विशेषतः धर्मशास्त्रेऽष्टौ विवाहभेदाः परिलक्ष्यन्ते । यथा-

ब्राह्मो द्वैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः ।
गान्धर्वा राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ (म.स्मृ)

वरकन्ययोः जन्माङ्गकुण्डल्याः ग्रहस्थितिजन्मनक्षत्रयोराधारेण तयोः प्रकृत्याम् अभिरुच्यां च साम्यतायाः पूरकत्वस्य च विचार एव मेलापकमिति । स्वभावरुच्योः साम्यत्वेन

परस्परं सहजप्रमोत्पद्यते । ये जनाः परस्पराः सम्पूरकाः भवन्ति तेषां निर्वाहो जीवनपर्यन्तं सानन्दं भवति । मेलापके अस्यैव समानतायाः पूरकतायाश्च विचारो भवति । वस्तुतः मेलापकं ज्योतिषशास्त्रस्य सा विधिरस्ति येन अपरिचितवरकन्ययोः प्रकृत्यामभिरुच्यां च समानतायाः तथा च जीवनस्य विविधपरिस्थित्यौ तेषां परस्परयोः सम्पूरकतायाः विचारं क्रियते मेलापकेन महत्त्वमस्ति परस्परं सम्यग्रूपेण "मेलनं" येन भविष्यत्कालीनं दाम्पत्यजीवनं सानन्दं व्यतीतं भविष्यति । यथा बृहस्पतिना चोक्तम्-

दम्पत्योर्जन्मताराभ्यां नामक्षाभ्यामथापि वा ।
भमेलं चिन्तयेत् प्राज्ञो सुखसन्तानहेतवे ॥ (बृ.दै.र-७१/२५०)

मेलापकात्पूर्वं विचारणीयविषयाः -

केचन जनाः कुण्डल्यां मङ्गलीयोगं वैधव्यादियोगं वा दृष्ट्वा कन्यायाः असत्यकुण्डलीं रचयन्ति अथवा वरस्य कुण्डलीं दृष्ट्वा तेन सह मेलापकयोग्यम् असत्यकुण्डलीं च रचयन्ति । किन्तु असत्यकुण्डलीद्वारा विचारं कृत्वा यथार्थमेलापकं न सम्भवति । एवम् असत्यकुण्डलीद्वारा मेलापककरणेन दोषो भवति ।

मेलापककोयं तु उत्तरदायित्वपूर्णं कार्यमस्ति प्रायः जना निमेषे एव मेलापककार्यं कुर्वन्ति । किन्तु ज्योतिषशास्त्रस्य ज्ञानेन मेलापकज्ञानेन च विना कथं ते सम्यक्मेलापकं कर्तुं शक्यन्ते ? फलतः मेलापकादनन्तरमपि वैवाहिकजीवनं सुखमयं न भवति । अतः परस्परं सम्यग्रूपेण मेलनं कृत्वा कुण्डल्यां मङ्गलीयोगं च मङ्गलीदोषं दृष्ट्वा मेलापककार्यं करणीयम् ।

माङ्लीयोगाः

लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे ।
कन्या भर्तुं विनाशाय भर्तुः कन्या विनश्यति ॥
लग्नादिन्दोर्यदा भौमः सप्ताष्टान्त्याच्चतुर्युगः ।
पत्युर्भार्याविनाशाय भायायाः पतिनाशनम् ॥
(वृ.दै.र ७१, प्रकरणश्लो.-२०६/२०७)

II. लग्ने भौमोपगमः स्यात् तदा तस्य स्वास्थ्योपरि दुष्प्रभावः ।

III. चतुर्थस्थाने भौमः स्यात् तदा भोगोपभोगसुखादिविषयोपरि दुष्प्रभावः ।

IV. सप्तमस्थाने भौमः स्यात् तदा दाम्पत्यसुखोपरि कुप्रभावः ।

V. अष्टमस्थाने भौमः स्यात् तदा विघ्नवाधाअनिष्टाश्च सम्भवन्ति ।

VI. द्वादशस्थाने भौमः स्यात् तदा क्रयशक्तिः दाम्पत्यसुखं च कुप्रभावितौ भवतः ।

VII. लग्नात् चन्द्रात् वा लग्ने-चतुर्थे-सप्तमे-अष्टमे-द्वादशे च पापग्रहाणां स्थितिरपि न सौख्यप्रदाः भवति ।

माङ्गलदोषभङ्गयोगः-

१. वरकन्यायोर्मध्ये कस्याप्येकस्य कुण्डल्यां माङ्गलिकदोषः स्यात् । अपरस्य च कुण्डल्यां लग्ने चतुर्थे सप्तमे अष्टमे द्वादशे वा शनिः स्यात् । तदा माङ्गलदोषः विनश्यति । यथा-

जामित्रे च यदा सैरिर्लग्ने वाऽहिबुधऽथवा ।
अष्टमे द्वादशे वाऽपि भौमदोषविनाशकृत् ॥
न मङ्गली चन्द्रभृगु द्वितीये, न मङ्गली पश्यति यस्य जीवः ।
न मङ्गली चन्द्रस्थितिश्च केन्द्रे, न मङ्गली मङ्गला राहुयोगे ।

(मे.स.पृ-१३)

२. यदि मङ्गलात् द्वितीये चन्द्रः तथा शुक्रः भवति, मङ्गलगुरू पश्यति, मङ्गलात् केन्द्र चन्द्रः अवस्थानं करोति अथवा मङ्गलोराहुश्च एकत्र अवस्थानं कुरुतः चेत् माङ्गलदोषः न भवति ।

३. **सप्तमे च यदा सौरिलग्ने वाऽहिबुधऽथवा ।**
धार्मेऽरिपेऽथवा यस्य भौमदोषो विनाशकृत् ॥ (मे.सु.पृ-१३)

यदि शनिः लग्न-चतुर्थ-सप्तमकृनवम-द्वादशस्थाने भवति तर्हि माङ्गलदोषः न विनश्यति ।

विवाहमेलकः -

विषयऽस्मिन् आलोचनाया पूर्वं कुत्र मेलापकस्य आवश्यकता न भवति इत्यस्मिन् विषये चच्यते ।

1. यदा कन्याविवाहे कोऽपि स्यात् तदा विवाहात् पूर्वं मेलापकस्यावश्यकता न भवति । यथा - कन्याविवाह वरस्य चयनार्थं प्रतिज्ञा अस्ति यत् यो मत्स्यवेधां, चक्रवेधां, धनुर्भङ्गं वा करिष्यति तेन सह कन्यायाः परिणयो भविष्यति । उपयुक्तस्थितौ मेलापकस्य विचारो न करणीयः ।
2. युद्ध प्राप्तया अपहृतया वा कन्याया सह विवाहार्थं मेलापकस्यावश्यकता न भवति ।
3. कन्यापितृद्वारा स्वेच्छाया प्रम्णा उपहारे वा दत्तया कन्यया सह विवाहार्थं मेलापकविचारस्यावस्यकता न भवति ।
4. यदि कन्या स्वयमेव कस्यापि पुरुषस्य वरणं करोति तदा कन्यया सह विवाहार्थं मेलापकविचारोऽनिवार्यो न भवति ।
5. पुनर्विवाहेऽपि मेलापकस्य विचारोऽनावश्यकः । पुनर्विवाहे मेलापकविचारः ऐच्छिकोऽस्ति ।
6. 50 वर्षायषोऽधिकवर्षीयस्य वा पुरुषस्य तथा च 45 वर्षायुषः अधिकवर्षीया वा कन्याया सह विवाहार्थमपि मेलापकविचारोऽनिवार्यो नास्ति । यथा मेलकसुधाकरग्रन्थे-

आयोजिता सन्धिलब्धा क्रोता स्नेहादिनाऽर्पिता ।
स्वयमेवगता कन्या नैवास्तां शुद्धिमेलकौ ॥ (वृ.दै.२.७१/६२)
वहूनामेकजातीनां कन्यकानां करग्रहे ।
ज्येष्ठायामेलकं वीक्ष्य लघ्वीनां नैव चिन्तयेत् ॥ (७१/६३)
आसुरादिविवाहेषु राशिकूटं न चिन्तयेत् ।
तथा व्यङ्गातिवृद्धानां दुर्भगानां पुनर्भुवाम् ॥ (७१/६४)
मनसश्चक्षुषोर्यस्मिन्वरे यस्यां च योषिति ।
सन्तोषो जायते यत्र नान्यत् किंचिद्विचिन्तयेत् ॥ (७१/६४)

उपर्युक्तपरिस्थित्यतिरिक्तं सर्वस्याम् अवस्थायां मेलापकविचारानन्तरमेव विवाहः करणीयः । येन जनाः अपरिहर्यतायां विषमतायां वा सार्वजनिकरूपेण दाम्पत्यजीवने प्रवेशं कर्तुं शक्यन्ते ।

विवाहसन्दर्भे मेलापकस्यावश्यकता–

विवाहयोग्यवरकन्ययोः प्रकृतौ मनोवृत्तौ अभिरुचौ स्वभावगतान्यविशेषतायां च समानतायाः ज्ञानं मेलापकेन भवति । येषां प्रकृतौ मनोवृत्तौ अभिरुचौ च समानता भवति । तयोः परस्परं मित्रता प्रेम च सहजरूपेणैव भवति । भिन्नप्रकृतौ अभिरुचियक्तजनाः परस्परं शत्रवः आलोचकाः परस्परं घृणायुक्ताः वा भवन्ति । अतः दाम्पत्यसम्बन्धेषु स्थिरतायाः सरसतायारू हेतुः वरकन्ययोः मेलापकोऽवश्यमेव विचारणीयो भवति । अपि च ज्योतिषशास्त्रे अनेकूषां कूटानां विचाराः सन्ति । तन्मध्ये वशिष्ठोक्तः अष्टादशकूटाः गर्गोक्तः अष्टादशकूटः, नारदोक्तो दशकूटः, कालिदासोक्ताः विंशतिकूटाः अद्यत्वे उपलभ्यन्ते ।

मतान्तरे देशान्तरे वा क्वचित् दशप्रोतयः मन्यन्ते कुत्र च अष्टौ कूटाः मन्यन्ते । यथा–

वर्णो वश्यं नृदूरं च वल्लभत्वं च तारका ।
योनिर्मित्रगणे राशिनाऽङ्केति क्रमाद्दशः ॥ (बृ.दै.र–७१/२६६)
वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् ।
गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥ (मु.चि–६/२१)

एते राशिकूटभेदाः वर्णा मित्रैर्त्यामेको गुणः वश्ये द्वौ गुणो तारायां त्रयो गुणाः योनिमत्र्यां चत्वारः ग्रहमैत्र्यां पञ्च गणमैत्र्यां षट् भकूटभेदे राशिकुटके वा सप्तनाडीभेदेऽष्टावित्यर्थः ।

मेलापकस्य भेदाः

मेलापको द्विविधः–नक्षत्रमेलापकः, ग्रहमेलापकः ।

नक्षत्रमेलापक :

नक्षत्रमेलापके वरवध्वो प्रकृत्याः अभिरुचेश्य समानतया विचारो भवति । तत्र जन्मराश्यनुसारेण नक्षत्रानुसारेण च विचारो क्रियते । प्रमुखतः नक्षत्रमेलापके अष्टकूटानां

विचारो भवति । अष्टकूटानां गुणाः अपि क्रमशः – १,२,३,४,५,६,७,८ भवन्ति । अतः गुणानां योगः ३६ भवति ।

वर्णानां विचारः जन्मराशिनां क्रियते । वश्यविचारोऽपि वरवध्वोः जन्मराशिभ्यां भवति। ताराविचारोः वरवध्वोः जन्मनक्षत्रेण भवति । जन्मनक्षत्रस्याधारेण योनिविचारः भवति । जन्मराश्याधिपत्योः परस्परशत्रुमित्रनुसारेण ग्रहमैत्रो भवति । वरवध्वोः जन्मराश्यन्तरेण भकूटविचारो भवति तथा च जन्मनक्षत्रनुसारेण नाडीकूटविचारो भवति । अर्थात् जन्मलग्नप्राणिनां शरीरश्चेत् चन्द्रस्थितराशिनक्षत्रं तेषां मनः । यतः सम्पर्कः उभयोः मनोमेलनं भवति । न तु शरीरानुसारेण फलितविकासे यथा –

जन्मलग्नमिदमङ्गमङ्गिनां मेनिरे मन इतोन्दुमन्दिरम् ।
सौहृदं हि मनसोर्न देहयोर्मेलकस्तदयमिन्दुगेहयोः ॥ (फ.वि.पृ-१६१)

ग्रहमेलापकः-

दाम्पत्यजीवने सुभिक्ष-सौख्य-शान्ति-समृद्धोनां प्राप्त्यर्थं निम्नलिखितवस्तूनामावश्यकता भवति यथा-

i. सुस्वास्थ्यं वरवध्वोः शारीरिकसौख्यता एव तयोः पारस्परिकवैचारिकमेकमेलनेस्याधारो भवति ।
ii. भोगोपभोगवस्तुनामुपलब्धिः आवासः, भूमिः, वाहनं, गृहस्थोपकरणान्यादीनां (यथा वस्त्रभाण्डादीनां) भोगपभोगोवस्तूनामुपलब्धिः गार्हस्थ्यजीवने प्रवेशार्थम् अत्यन्तमावश्यकं भवति ।

ज्योतिषशास्त्र उपयुंक्तवस्तूनां प्रतिनिधिभावाः क्रमशः- लग्नं, चतुर्थः, सप्तमः, अष्टमः इति भावाः निर्धारिताः द्वादशश्च मानितः । लग्नेन स्वास्थ्यविचारो भवति, चतुर्थभावेन भोगोपभोगवस्तूनां विचारः क्रियते । सुखस्य मनोऽनुकूलतया विचारोऽपि अनेन भावेन क्रियते । कामसुखस्य विचारः सप्तमभावेन भवति । वरकुण्डल्यां भावोऽयं पत्न्याः, वधुकुण्डल्यां च पत्युः कारको भवति । अष्टमभावः जीवने सम्भवितानां विघ्नबाधानिष्टमृत्युनाञ्च द्योतकोऽस्ति।

कस्यापि भावस्य शुभाशुभफलयोः ज्ञानार्थं सर्वमान्यनियमोऽस्ति यः भावः स्वाधिपेन शुभग्रहेण वा युतो दृष्टः च भवति । स तस्य भावस्य वृद्धिं करोति । अर्थात् भावे

भावस्याधिपः शुभग्रहो वा स्यादथवा भावं तस्याधिपः पश्यति तदा भावस्य फलं शुभं भवति । किन्तु यदि भावे पापग्रहः स्यादथवा पापग्रहः भावं पश्यति तदा भावस्य फलमशुभं भवति ।

शोधच्छात्रा
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः ।

❖❖❖

शब्दार्थसम्बन्धस्वरूप

✍महात्मा वीणापाणि त्रिपाठी

(शब्द, अर्थ एवं उनके सम्बन्ध व्यापक हैं । इनकी व्यापकता ही सभी शास्त्रकारों के विचार की केन्द्रबिन्दु है । ऐसा कोई भी विचार नहीं हो सकता जो कि शब्दार्थसम्बन्ध का विषय न हो । क्या मीमांसा? क्या न्याय? क्या व्याकरण? सभी ने अपनी अपनी दृष्टि से इन्हं व्याख्यायित किया है । गवेषक ने उन्हीं तत्त्वों को रेखांकित करने का प्रयास किया है, जो प्रशंसनीय है ।)

भूमिका -

हम सभी असंख्य शब्द अहर्निश सुनते है, परन्तु सम्यक् रूप से सुनने पर भी सभी शब्दों के अर्थ हम नही जान पाते हैं, अपितु किन्हीं शब्दों के कुछ अर्थों का ही बोध होता है । जिन शब्दों से जिन अर्थों का बोध होता है, उन्हीं शब्दों से तद्भिन्न अर्थों का बोध नही होता । जैसे - घट शब्द से कम्बुग्रीवादिमान का ही बोध होता है, प्रवाह पटादि का बोध नहीं होता है । अतः यह निश्चित है कि, घट शब्द का कम्बुग्रीवादिमान के साथ कोई न कोई सम्बन्ध अवश्य है । जिससे कम्बुग्रीवादिमान मात्र का ही बोध होता है । यद्यपि शब्दाश्रयत्वमाकाशत्वम्, एकसम्बन्धिज्ञानं अपरसम्बन्धिस्मारकं भवति इत्यादि न्यायानुरोध से घट शब्द से आकाशादि का भी बोध होना चाहिये, किन्तु ऐसा नहीं होता है । अतः इनके मध्य कोई विशिष्ट सम्बन्ध अवश्य है, वह सम्बन्ध कौनसा है इस पर विचार करते हैं । क्या वह संयोग है ? नही क्योंकि संयोग द्रव्यमात्र वृत्ति है, और नैयायिक शब्द को द्रव्य नही मानते । वैयाकरण के अनुसार भी संयोग सम्बन्ध नहीं हो सकता क्योंकि संयोग भेद में होता है और शब्दार्थ में भेद नहीं है जैसा की मानसकार कहते हैं -

गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न ॥

वागर्थाविव सम्पृक्तौ ॥

अतः संयोग सम्बन्ध सम्भव नहीं है । अभेद सम्बन्ध भी नहीं हो सकता क्योंकि अभेद सम्बन्ध मानने पर अग्नि उच्चारण से दाहकता तथा गुड उच्चारण से मधुरत्व प्रतीति

होने लगेगी जो कि व्यवहारासिद्ध है । भाष्यकार ने भी राहोरू शिरः में क्षणिक भेद कल्पना के द्वारा षष्ठी की सिद्धो करक अभेद सम्बन्ध का वारण किया है । तादात्म्य सम्बन्ध भी नही हो सकता अत्यन्त वैधर्म्यविशिष्ट शब्दार्थ में असम्भव है । विलक्षण तादात्म्य भी नही हो सकता –

नापिभेदाभेदपर्यवसायि विलक्षणं तादात्म्यं तादृशतादात्म्यस्वीकारे प्रमाणाभावः ।

कालिक व दैशिक सम्बन्ध भी सम्भव नहीं है । वर्तमानकाल में उच्चरित शब्द से अतीत अनागत सभी का बोध होता है । एकदेशस्थ शब्द से विभिन्न दिशाओं में स्थित अर्थ का बोध होता है । अतः प्रश्न होता है कि, वह सम्बन्ध क्या है, वैयाकरण कहते हैं वह सम्बन्ध वृत्ति–सम्बन्ध है । वाक्याथज्ञाने पदार्थज्ञानं कारणम् । अतः वृत्तिसम्बन्ध ज्ञान से पूर्व वृत्ति ज्ञान अपेक्षित है ।

वृत्तिविचार

वृत्तित्वं शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदार्थसम्बनत्वम् ।

पदार्थ सम्बन्ध एवं शाब्दबोध में हेतु जो उसे वृत्ति कहते हैं । वृत्ति मीमांसाकार के अनुसार –

शाब्दबोजनिका या पदार्थोपस्थितिस्तस्या उपस्थितेर्जनकं यस्य पदपदार्थयोः सम्बन्ध विशेषस्य ज्ञानम्, तज्ज्ञानविषयसम्बन्ध एव पदपदार्थयोः वृत्याख्यसम्बन्ध इत्युच्यते ।

इसी मत का सम्पोषण करते हुए महेश शुक्ल ने कहा है –

शाब्दबोधोपयोगी पदपदार्थसम्बन्धो वृत्तिः । शाब्दबोधानुकूलपदार्थज्ञानप्रयोजक–ज्ञानविषयः पदपदाथयोः सम्बन्धविशेषो वृत्तिरिति यावत् ।

भाव प्रकाशिकाकार ने भी कहा है –

वृत्तिपदव्यवहार्यत्वस्यार्थपदोभयनिरूपितसम्बन्धत्वरूपः ।
शब्दो हि येन व्यापारेण स्वीयमर्थं बोधायति सा वृत्तिः ॥

वस्तुतः वृत्ति की परिभाषा में प्रायः सभी विद्वानों में लगभग मतैक्य है । किन्तु वृत्ति भेद में मतैक्य नहीं है, भट्टलोल्लट प्रभृति विद्वान जहां एक प्रकार की वृत्ति स्वीकार करते

हैं, वहीं पर नैयायिक एवं प्राचीन वैयाकरण दो प्रकार कि वृत्ति स्वीकार करते हैं । नव्य वैयाकरण तीन प्रकार की वृत्ति अभिधा, व्यंजना, लक्षणा रूप स्वीकार करते हैं । स्थालीपुलाकन्यायेन के द्वारा यहां शक्ति निरूपण ही किया जा रहा है ।

शक्तिविचार -

यद्यपि शक्ति के ऊपर नैयायिक, वैयाकरण, मीमांसक, साहित्यिक सभी ने अपने-अपने मत दिये है परन्तु यहां पर वैयाकरण एवं नैयायिकों के सिद्धान्तों का ही आलोडन किया जा रहा है ।

नैयायिकमत -

प्राचीन नैयायिक ईश्वरेच्छा को शक्ति स्वीकार करते है -

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः ।
सा चास्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छा रूपा ॥

आचार्य गदाधर ने भी कहा है -

इदम् पदमिममर्थं बोधयत्विति अस्माच्छब्दादयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा ।

सर्वज्ञ भी इसी मत का सम्पोषण करते हुए कहते है -

यद्येकत्रापि सङ्केतस्य सामथ्यं स्वीक्रियते तदान्यत्रापि सङ्केतादेव वाच्यवाचकत्वोपपत्तौ वृथैव सम्बन्धान्तरकल्पनेत्यादि ।

ईश्वरेच्छा को शक्ति मानने पर आधुनिक व्यक्तियों के नामों में अव्याप्ति रूप दोष का वारण करते हुए कहते हं आधुनिकेनाम्निशक्तिरस्त्येव क्योंकि एकादशेह्नि पिता नाम कुर्यात् इस श्रुति अनुरोध से आधुनिक नामों में भी ईश्वरेच्छा का ग्रहण हो जायेगा । परन्तु नदी ग्रामादि के नामों में अव्याप्ति यथावत् है, इसका वारण नव्य नैयायिक करते हैं ।

नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव तेन आधुनिकसंकेतितेपि शक्तिरस्त्येवेत्याहुः।

नव्य नैयायिक ईश्वरेच्छा के स्थान पर इच्छा मात्र में शक्ति स्वीकार करते हैं । जिससे ग्रामादि में भी अतिव्याप्ति नहीं होगा । परन्तु यह लक्षण भी निर्दुष्ट नहीं है, क्योंकि यदि इच्छा मात्र को शक्ति माना जायेगा तो पट बोध के लिये घट पद की इच्छा तथा घट बोध के लिये पट पद की इच्छा से भी बोध होने लगेगा । परन्तु इस प्रकार का ज्ञान लोक

व्यवहार सिद्ध नहीं है । अतः इच्छा को शक्ति स्वीकार नही किया जा सकता । इस पूर्वपक्ष का वारण करते हुए आचार्य ने कहा है –

शक्तिग्रहं व्याकरणोपमानं कोशाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्यशषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

अर्थात् इच्छा को शक्ति स्वीकार करने पर प्रयोज्यप्रयोजक वृद्ध व्यवहार के द्वारा शक्ति ज्ञान हो जायेगा ।

जैसे – गामानय, गां नय, अश्वमानय इत्यादि ।

नैयायिकमतखण्डन –

शाब्दिको ने नैयायिको के मत को खण्डित करने के लिये दो प्रकार के आक्षेप किये है – प्रथम सम्बन्धाभाव द्वितीय आत्माश्रय रूप दोष, प्रथम दोष दिखाते हुए शाब्दिक कहता है, यहां पर इच्छा सम्बन्ध सम्भव ही नहीं है, क्योंकि सम्बन्ध सम्बन्धिद्वयनिष्ठ विशिष्टबुद्धिनियामक में ही होता है । इच्छा आत्मा से समवेत होने के कारण शब्दार्थसम्बन्धिद्वय वृत्तित्व का अभाव है अतः इच्छा सम्बन्ध नहीं हो सकता ।

आत्माश्रय दोष यह है कि, शक्ति सम्बन्ध बोधरूप कार्योत्त्पति के पूर्व ही अपेक्षित है, परन्तु अवापोद्वाप के उदाहरण में अर्थ बोध के बाद सम्बन्ध का ज्ञान हो रहा ह ।

वैयाकरण मत निरूपण –

शक्ति सम्बन्ध का विचार करते हुए प्राप्त होता है कि, त्रिमुनि पाणिनि, कात्यायन, पतञ्जलि ने स्पष्ट रूप से कहीं पर शक्ति विचार नहीं किया है, अपितु प्रसंग प्राप्त ही इनके विचार समुपलब्ध है । जैसे – कात्यायन का सिद्धशब्दार्थसम्बन्धे यह वार्तिक शब्दार्थ सम्बन्ध की नित्यता द्योतित करता है, परन्तु स्वरूप का अवबोधन नहीं कराता है । भाष्यकार ने भी नित्योह्यर्थवतामर्थैरभिसम्बन्धाः के रूप मे शब्दार्थ सम्बन्ध को नित्य माना है । नित्य भी दो प्रकार के होते है –

धरुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्धययव्ययोगि यत् तन्नित्यमिति प्रथमम् । तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते इति द्वितीयम् ।

यहां पर द्वितीय प्रकार के नित्यत्व का ही ग्रहण किया गया है ।

प्रवाहनित्यतया तयोरिव तस्यापि नित्यत्त्वं ।

भर्तृहरि ने शब्दार्थ सम्बन्ध निरुपित करते हुए कहा है कि –

ज्ञानं प्रयोक्तुर्बाह्यार्थः स्वरूपञ्च प्रतीयते ।

शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः ॥

इसकी व्याख्या करते हुए रघुनाथ शर्मा ने कहा है –

शब्दार्थानां शब्दैरर्थानामर्थैश्च शब्दानां परस्परं सम्बन्धाः समवस्थितोऽनादिर्नित्यो न तु पुरुषसमयकृतः ।

अर्थात् शब्दार्थ सम्बन्ध नित्य व अनादि है । इसी कारिका की व्याख्या करते हुए हेलाराज कहते हैं –

वास्तवः सम्बन्धावसायो न सामयिकः शब्दार्थयोः सम्बन्धोऽभिधानियमनादनादेः। अतः एव समवस्थित इत्याह स्वभाव एव निरूढो तु पुरुषेन निवेशित इत्यर्थः ।

अर्थात हेलाराज के मत में भो शब्दार्थ सम्बन्ध पुरुष कृत नहीं है । पुनः भाष्यकार कहते हैं –

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥

जिस प्रकार इन्द्रियों मे अपने विषय को ग्रहण करने की अनादि योग्यता है, उसी प्रकार शब्दार्थ में बोधाजनकत्वरूप योग्यता ही शक्ति है । कौण्ड भट्ट ने भी इसी मत में अपनी स्वीकृति प्रदान की है । यद्यपि कौण्ड भट्ट व दीक्षित जी ने शब्दार्थभेदघटित तादात्म्य लक्षण सम्बन्ध भी मानते हैं, परन्तु शक्तित्वेन नहीं अपितु शक्त्युपकारकत्वेन मानते है ।

यद्यपि शब्दतदर्थयोर्भेदाभेद घटित तादात्म्य लक्षण सम्बन्धोऽपि दीक्षित कौण्डभट्टयोरभिमत एव, तथापि सः न शक्त्याख्य सम्बन्धरूपतया किन्तु शक्त्युपकारकतया ।

नव्य वैयाकरण नागेश भट्ट शक्ति के बोधजनकयोग्यता रूप का खण्डन करते हैं –

न तु बोधाजनकत्वमेव योग्यता एतज्जननेऽयं योग्यः इति व्यवहारानुपपत्तेः ।

इसके समर्थन में भर्तृहरि ने भी कहा है –

उपकारः स यत्रास्ति धर्मस्तत्रनुगम्यते ।

शक्तोनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ॥

अर्थात जहां पर भी उपकार्योपकारकभाव होता है, वहां पर धर्म का अनुमान कर लेते हैं । जैसे – प्रदीप घटादि स्थल पर घटादि प्रकाश्यवस्तु प्रकाशनात्मक कार्य को देख कर धर्म – प्रकाश्यप्रकाशक का सम्बन्ध संयोगादि का अनुमान किया जाता है । इसी प्रकार वाच्यवाचकभाव शक्ति वाच्यार्थ बोधन में तभी सक्षम होगी जब तदर्थ के साथ तत् पद का सम्बन्ध हो और वह सम्बन्ध भेदाभेद घटित तादात्म्य होगा अन्य के असम्भव होने के कारण । इसकी पुष्टि कारिकांश के द्वितीय भाग से करते हैं । इसी आधार पर नागेश सिद्धान्त प्रतिपादित करते हैं –

पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया ।

अर्थात् पद पदार्थ में सम्बन्धान्तर ही शक्ति है जिसको वाच्यवाचकभाव भी कहते हैं।

निष्कर्ष

यद्यपि संकेत रूप शक्ति व्यावहारिक दृष्टि से यथार्थ प्रतीत होती है, परन्तु संकेत शक्ति में वैयाकरणों ने आत्माश्रय व सम्बन्धाभाव रूप दोष दर्शन से इसे निराकृत कर दिया है । प्राचीन वैयाकरण सम्मत बोधजनकतारूप शक्ति को भी स्वीकार करने में व्यवहारानुपपत्ति है । अतः नागेशोक्त वाच्यवाचकभाव रूप ही शक्ति स्वीकार करना समीचीन प्रतीत होता है ।। इति ।।

शोधाच्छात्र (संस्कृत विभाग)
दिल्लीविश्वविद्यालय, दिल्ली

❖❖❖

परमलघुमञ्जूषानुसारं लक्षणाखण्डनविमर्शः ।

✍ऋतम्भरा पाण्डेय

(नागेशभट्टविरचिता परमलघुमञ्जूषा नामार्थसम्बन्धादिकमितरशास्त्रसिद्धान्तखण्डन-पुरस्सरं वैयाकरणानां सिद्धान्तमुपस्थापयित्री राराज्यते । लक्षणायाः शक्यसम्बन्धत्वे नामार्थस्य नामार्थेनान्वयत्वे सिद्धे, सादृश्यसमवायादिसम्बन्धेन च स्थितौ भाष्यकाराद्यनुरोधेन सा खण्डिता । शोधानुशासनशालिन्याऽत्र रचयित्र्या शोधनिर्देशक-वाक्यस्मरणानुसारं लक्षणाखण्डनविषयः प्रत्यपादीत्यनुवाचनीयैषा रचना । सर्वार्थवाचकत्वप्राबल्येन तात्पर्यविवक्षानुरोधेन च लक्षणा प्रत्याख्याता, यत्र चैश्वरं तात्पर्यं परम्पराऽऽगतमिति शाब्दिकानां सिद्धान्तः सुदृढ़ एव ।)

पदसमूहः वाक्यम् । श्रुतेऽपि पदे अर्थस्मरणं विना तदर्थबोधो न जायते । अर्थस्मृतिश्च वृत्तिज्ञानाधीना । वृत्तिः शक्तिलक्षणाव्यञ्जनान्यतमरूपा पदपदार्थयोः सम्बन्धः । पदं त्रिविधं वाचकं लाक्षणिकं व्यञ्जकञ्चेति । एवञ्च अर्थोऽपि त्रिविध एव वाच्यलक्ष्यव्यङ्ग्यरूपश्च । प्रथमं पदज्ञानं भवति । ततः शक्तिज्ञानं, ततः पदार्थस्मृतिः, ततः परं शाब्दबोधो भवति । उक्तञ्च मुक्तावलीकारिकायाम् –

'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥'

अत एवं तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित-वृत्तिविशिष्टज्ञानं हेतुः[1] इति शाब्दबोधस्य कार्यकारणभावः । यथा – घटत्वधर्मावच्छिन्नघटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वधर्मावच्छिन्ना घटनिरूपिता या वृत्तिस्तदविशिष्टज्ञानं हेतुरिति फलति । अतो घटपदात् पटविषयको बोधो न भवति ।

इयं वृत्तिः त्रिधा अस्ति – शक्तिर्लक्षणा व्यञ्जना च । अत्र शक्तिः कः पदार्थः? इति जिज्ञासायां नैयायिकाः वदन्ति 'अस्माच्छब्दादयमर्थो बोधव्यः' इत्यकारका 'इदं पदमिमर्थं बोधयतु' इत्याकारा वेश्वरेच्छा शक्तिः, सैव संकेतः सम्बन्धाः ।[2] मीमांसकैर्बोधजनकता-वच्छेदकशक्तिः स्वीक्रियते । प्राचीनवैयाकरणैर्बोधजनकता, सम्बन्धः स्वीक्रियते । नागेशभट्टन तु पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया । तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम् । तदेव सम्बन्ध इत्यङ्गीक्रियते ।

एवमेव लक्षणास्वरूपविषयेऽपि न्यायमीमांसककाव्यादिशास्त्रानुसारिभिः मतभिन्नत्वं दश्यंते । वैयाकरणास्तु लक्षणां नाङ्गीकुर्वन्ति तस्मादेव परमलघुमञ्जूषायां नागेशभट्टन

परशास्त्राभिमतं लक्षणायाः सिद्धान्तं प्रदर्श्य तस्य खण्डनं कत्वा शाब्दिकसम्मतं मतमुपस्थापितं । तत्र प्रथमं तावत् –

तार्किकाभिमतं लक्षणायाः स्वरूपम् – 'स्वशक्यसम्बन्धो लक्षणा ।' अत्र स्वशब्देन लाक्षणिकत्वेनाभिमतं पदं ग्राह्यम् । एवञ्च स्वस्य = लाक्षणिकस्यार्थस्य, शक्येन = शक्त्योपस्थितार्थेन सह , सम्बन्धाः = सामीप्यादिः सा लक्षणा । यदा 'शक्यसम्बन्धाः' इत्येवोच्यते तदा शक्यस्य = शक्त्योपस्थितार्थस्य , सम्बन्धाः = सामिप्यादिः सहेति बोध्यम् । यथा – 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य प्रवाहविशेषरूपे शक्यार्थे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तटरूपस्यार्थस्य बोधो भवति ।

लक्षणायाः भेदाः – इयं लक्षणा द्विधा गौणी शुद्धा च । तत्र स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी । तदतिरिक्तसम्बन्धेन शक्यसम्बन्धयर्थप्रतिपादिका शुद्धा च । प्रकारान्तरेणापि सा द्विविधा - अजहत्स्वार्था जहत्स्वार्था च ।

स्वार्थसंवलितपरार्थाभिधाायिकाऽजहत्स्वार्था । यथा – छत्रिणो यान्ति, कुन्तान् प्रवेशय, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यतामित्यादौ छत्रिसहितसेनाकुन्तास्त्रसहितपुरुषयष्टीसहितपुरुष-काकसहितसर्वदध्युपघातकबोधः ।

स्वार्थपरित्यागेनेतरार्थाभिधायिका जहत्स्वार्था । तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयिनाऽनन्वयित्वम् । यथा – 'गां वाहीकं पाठयेत्' इत्यादौ गोसदृश्यलक्षणायामपि न गोस्तदन्वयिपाठनक्रियान्वयित्वम् ।

लक्षणायाः निमित्तानि –

'तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च ।
तत्साहचर्यात्तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः ॥'[१]

लक्षणायाः तात्स्थ्यादीनि पञ्च निमित्तानि सन्ति । ते च –

१. **तात्स्थ्यात् –**

तस्मिन् तिष्ठतीति तत्स्थः , तस्य भावः तात्स्थ्यम् तस्मात् तात्स्थ्यात् । उदा. –'मञ्चा हसन्ति' इत्यत्र मञ्चे हासक्रिया बाधिता अचेतनत्वात् । एवञ्च मञ्चेषु स्थितत्वात् पुरुषा लक्ष्यन्ते इति लक्षणया मञ्चस्थाः पुरुषा हसन्तीति बोधः । एवमेव

'ग्राम: पलायित: ।' इत्यत्रपि ग्रमस्याचेतनत्वात् धावनक्रियायामन्वयो न भवति । तेन ग्रामे स्थितत्वात् पुरुषा लक्ष्यन्ते । एवं ग्रामस्था: पुरुषा: पलायिता इति बोध: ।

२. **तद्धम्यात् –**

तद्वत् धर्मा यस्य सस्तद्धर्मस्तस्यभावस्ताद्धर्म्यं तस्मात् ताद्धम्यात् । उदा. – 'सिंहो माणवक:' इत्यत्र लक्षणया सिंहसदृशो माणवक इति बोध: । एवमेव 'गौर्वाहीक:' इत्यत्रपि बोध्यम् ।

3. **तत्सामीप्यात् –**

उदा. – 'गङ्गायां घोष:' इत्यत्र शक्यार्थस्य जलप्रवाहविशेषस्य आभीरपल्लोरूपे घोषपदार्थे आधेयतयान्वयो बाधित इति तस्य (जलप्रवाहविशेषस्य) सामीप्यात् गङ्गाशब्द: लक्षणया तीरं बोधयति । तेन गङ्गातीरे घोष: इति बोध:।

४. **तत्साहचर्यात् –**

उदा. – 'यष्टी: प्रवेशय' इत्यत्र यष्टीनाम् अचेतनत्वात् प्रवेशक्रियायामन्वयो बाधित: । अत: लक्षणया सहचरणमाश्रित्य यष्टीधारिण: पुरुषान् प्रवेशयेति बोध: ।

५. **तादथ्यात् –**

तस्मै इदं तदर्थम्, तस्य भाव: तादथ्यम्, तस्मात् तादथ्यात् । उदा. – 'इन्द्रार्था स्थूणा इन्द्र:' । स्थूणा = यज्ञीयस्तम्भ:, इन्द्राद्दश्यकयागीय पशुबन्धनस्योप-कारकतया इन्द्रोपकारकत्वे पर्यवसानात् लक्षणया इन्द्रोपकारकत्वमर्थ: । एवञ्च 'इन्द्रोपकारिका स्थूणा' इति बोध: ।

लक्षणायाः बीजम् –

नैयायिका: 'अन्वयाद्यनुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम्' इति स्वीकुर्वन्ति । यथा– 'गङ्गायां घोष:' इत्यत्र गङ्गापदात् भगीरथरथखातावच्छिन्नो जलप्रवाहविषेशरूपोऽर्थ उपस्थित: , तत्र घोषपदात् उपस्थितस्याभीरपल्लीरूपार्थस्यान्वयोऽनुपपन्न:, अर्थात् घोषनिष्ठा-धेयतानिरूपिताऽऽधारता गङ्गायां न सम्भवतीति तत्राऽऽन्वयानुपपत्तिं दृष्ट्वा लक्षणा श्रीयते । तया च शक्यार्थसम्बन्धिनस्तटस्योपस्थित: तटत्वावच्छिन्नविषयको बोधो जायते । एवञ्च 'तटवृत्तिघोष:' इत्यर्थो भवति ।

अत्र नागेशभट्टन लक्षणाखण्डनस्यारम्भः कृतः । अन्वयानुपपत्तेर्लक्षणाबीजत्वं खण्डयन्नाह – वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव लक्षणाबीजम् । अन्यथा 'गङ्गायां घोषः' इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिस्तावताऽप्यन्वयानुपपत्तिपरिहारात् । 'गङ्गायां पापी गच्छती'त्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च । (वैयाकरणानां मते तु) भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यन्न दोषः । अर्थात् पूर्वकालिकपापविशिष्टे लक्षणया पापीपदं भूतपूर्वपापावच्छिन्नस्य लक्षकमिति तात्पर्यानुरोधन पापपरिहाराय गङ्गास्नानार्थं गच्छतीति बोधो जायते । 'नक्षत्रं दृष्ट्वा वाचं विसृजेद्' इत्यत्रनवयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात् । एकानुगमकस्वाकारेण निर्वाहेऽनेकानुगमकस्वीकारे गौरवाच्च ।

वेदान्तिनामभिमतं लक्षणायाः स्वरूपम् – यदा किञ्चित् पदं कस्यचित् विशिष्टार्थस्य बोधकं भवति तस्य पदार्थैकदेशे लक्षणा क्रियते तदा स जहदजहल्लक्षणेत्युच्यते । अत्र शक्यतावच्छेदकांशस्य परित्यागेन विशेष्यांशमात्रस्य बोधो भवति । यथा – ग्रामैकदेशे पटैकदेशे च दग्धो 'ग्रामो दग्धाः' 'पटो दग्धाः' इति व्यवहारः । 'तत्त्वमसि' इत्यत्र सर्वज्ञत्वाल्पज्ञत्वयोस्त्यागः शुद्धचैतन्ययोरभेदान्वयः ।

मीमांसकाभिमतं लक्षणायाः स्वरूपम् –'स्वबोध्यसम्बन्धो लक्षणा' इति । अत्र स्वम् इत्यत्र वाक्यादिः, तेन बोध्यो योऽर्थस्तत्सम्बन्धो लक्षणा इत्यर्थः ।

शक्यसम्बन्धो लक्षणेति स्वीकारे वाक्ये लक्षणा न सम्भवति, अतः अनेन लक्षणेन वाक्यार्थोऽपि वाक्यबोध्यो भवति अतस्तत्रपि लक्षणा सिद्ध्यतीति भावः । यथा –'गभीरायां नद्यां घोषः' इत्यत्र न गभीरपदं तीरलक्षकम्, नद्यामित्यनन्वयापत्तेः । नहि तीरं नदी । अत एव न नदीपदेऽपि । गभीरपदार्थानन्वयात् । न हि तीरं गभीरम् । न च प्रत्येकं पदद्वये सा, विशिष्टनदीबोधानापत्तेः । तस्मात् समुदायबोधयगभीरत्वविशिष्टनदीपदार्थः, तत्सम्बन्धो लक्षणोति।

साहित्यशास्त्रादौ प्रसिद्धं लक्षणामाह –'प्रयोजनवती रूढा लक्षणा द्विविधा मता' । असति प्रयोजने शक्यसम्बन्धो निरूढलक्षणा । अर्थात् प्रयोजनाभावे शक्यार्थबाध–प्रतिसन्धानपूर्वकं शक्यार्थसम्बन्ध्यपरार्थबोधो निरूढा लक्षणा भवतीत्यर्थः । यथा –'त्वचा ज्ञातम्' इत्यत्र त्वचः त्वगिन्द्रिये लक्षणा । वस्तुतस्तु इयं शक्त्यपरपर्यायैवेति बोध्यम् । 'गङ्गायां घोषः' इत्यत्र तीरे गङ्गागतशैत्यपावनत्वादिप्रतीतिः प्रयोजनम् । 'गौर्वाहीकः' इत्यत्र

सादृश्यं लक्ष्यतावच्छेदकगवाभेदप्रत्ययः प्रयोजनम् । कुन्ताः प्रविशन्तीति भीतिपलायमानवाक्ये कुन्तविशिष्टपुरुषे कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनमिति ।

काव्यप्रकाशे लक्षणायाः स्वरूपम् –

मुख्यार्थबाधो तद्योगे रूढिताऽथ प्रयोजनात् ।
अन्याऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥ इति ।

मुख्यार्थबाधे = वाच्यार्थस्य बाध सति, अनुपपत्तिरूपे बाधे सति, वस्तुतस्तु बाध तद्रूपेण वक्ततात्पर्याविषयत्वे सति इत्यर्थः । तद्योगे = मुख्यार्थस्य योगे सम्बन्ध, साक्षात् सम्बन्धे इत्यर्थः, अमुख्येन लक्षणोयेन सह सामीप्यादिरूपसाक्षात्सम्बन्धे सतीति यावत् । रूढितः = प्रसिद्धेः, प्रयोगप्रवाहादित्यर्थः । अथेति = विकल्पे, अथवेत्यर्थः । प्रयोजनात् = शैत्यपावनत्वप्रतीतिरूपफलात् । यदिति = ययेत्यर्थे लुप्तकरणतृतीयान्तमव्ययम्, यया (वृत्त्या) अन्याऽर्थः तटादिरूपः लक्ष्यते प्रतिपाद्यते, सा (वृत्तिः) लक्षणेत्युच्यते । यदिति लक्षणक्रियाविशेषणम्, अन्याऽर्थो यत् लक्ष्यते यत् प्रतिपाद्यते सा लक्षणेत्यन्वयः । आरोपिता क्रियेति च न लक्षणघटकम्, किं तु लक्षणास्वरूपकथनपरम् । सा हि आरोपिता मुख्यार्थव्यवहितलक्ष्यार्थविषयकत्वात् शब्दे कल्पिता, साक्षात्सम्बन्धेन मुख्यार्थनिष्ठा परम्परासम्बन्धेन तु शब्दनिष्ठेत्यर्थः ।

लक्षणायाः भेदाः

काव्यप्रकाशानुसारं षड्विधा लक्षणा । तासां नामानि उदाहरणानि च –

1. उपादानसारोपायाः – कुन्ताः पुरुषाः प्रविशन्ति ।
2. उपादानसाध्यवसानायाः – कुन्ताः प्रविशन्ति ।
3. लक्षणसारोपायाः – आयुर्घृतम् ।
4. लक्षणसाध्यवसानाया – आयुरेवेदम् , गङ्गायां घोषः ।
5. गौणसारोपायाः – गौर्वाहीकः ।
6. गौणसाध्यवसानायाः – गौरयमिति ।

लक्षणायाः खण्डनम् –

तार्किकादिमतं निराकुर्वन्नुक्तम् - सति तात्पर्ये 'सर्वे सर्वार्थवाचका' इति भाष्याल्लक्षणाया अभावात् इति । वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात् । जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्चेति त्रयो हेतवः लक्षणाया अनङ्गीकारे प्रदर्शिता नागेशेन ।

वैयाकरणानां नये 'सवं सर्वार्थवाचकाः' इति भाष्यात् गङ्गापदं यथा भागीरथरथखातावच्छिन्नेजलप्रवाहे शक्तं तथैव तीरेऽपि शक्तमिति शक्त्यैव तीरस्य बोधोपपत्तौ वृत्त्यन्तरकल्पने गौरवमिति । ननु यद्येवं तर्हि गङ्गापदात् घटस्याप्युपस्थितिः स्यात् नैवमनुभूयते केनापि विचक्षणेनेति चेन्न, 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः' इत्यभ्युपगमेन तात्पर्यस्य शक्तिसंकोचकत्वेन दोषाभावात् ।

द्वितीयं कारणं 'गौरवात्' इत्युक्तम् अत्र अयं भावः – लक्षणास्वीकारे शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यमिति कार्यकारणभावद्वयकल्पने गौरवम् । शक्तिमात्राङ्गीकर्तृवैयाकरणमते शक्तिज्ञानजन्योपस्थितित्वेनैव हेतुतेति लाघवं स्पष्टम्।

तृतीयं कारणमुक्तं 'जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च' इति अत्रायं भावः पूर्वोपस्थितशक्तिसम्बन्धस्य वृत्तित्वकल्पनमुपेक्ष्य पश्चादुपस्थितत्तद् घटितसम्बन्धस्य वृत्तित्व-कल्पनायाम् अनुचितत्वादित्यर्थः । इदमत्र रहस्यम् – लक्षणावादिनां सिद्धान्ते शक्तिज्ञान-जन्योपस्थितिमन्तरापि लक्षणाज्ञानजन्योपस्थितिमादाय शाब्दबोधावारणेऽव्यवहितोत्तरत्वनिवेशे गौरवं स्यात् तथा पदजन्यार्थविषयकोपस्थितिमादाय शाब्दबोधावारणेऽव्यवहितोत्तरत्वनिवेशे गौरवं स्यात् तथा पदजन्यार्थविषयकोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुत्वे गौरवं व्यभिचारश्च ।

वैयाकरणां मते शक्तर्भेदद्वयम् – प्रसिद्धाऽप्रसिद्धा च । अमन्दबुद्धिवेद्यत्वं प्रसिद्धत्वम् । सहृदयहृदयमात्रवेद्यत्वमप्रसिद्धत्वम् । तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धा शक्तिः । ननु 'सर्वे सर्वार्थवाचकाः' इति चेत् ब्रूषे तर्हि घटपदात्पटप्रत्ययः कथं न स्यादिति चेन्न, 'सति तात्पर्ये' इत्युक्त्या तात्पर्याभावादिति गृहाण । तात्पर्यञ्चात्र ऐश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति सर्व सुरूढम् इति मञ्जूषायां नागेशाः ।

उपसंहारः

यद्यपि वैयाकरणाः लक्षणां सिद्धान्तरूपेण न मन्वते तथापि परमतवासनया लक्ष्यानुरोधात् लक्षणां विवेच्य सर्वे सर्वार्थवाचकाः इति भाष्याशयेन प्रसिद्धप्रसिद्धशक्तिद्वयं स्वीकृत्य तत्र अप्रसिद्धशक्तर्लक्षणात्वमिति वदन्तो लक्षणां खण्डयन्ति ।

सहायकग्रन्थसूची

1. परमलघुमञ्जूषा (भावप्रकाशिकाबालबोधिनीसहिता), चौखम्बा कृष्णादास अकादमो वाराणसो ।
2. वैयाकरणभूषणसारः (प्रभादर्पणव्याख्योपेतः), चौखम्बा संस्कृत भवन वाराणसो ।
3. काव्यप्रकाशः (बालबोधिन्याख्यटीकया समन्वितः), परिमल पब्लिकेशन दिल्ली
4. वैयाकरणसिद्धान्तदिग्दर्शनम् प्रो. बोधकुमारझाः , हंसा प्रकाशन ।
5. व्युत्पत्तिवादः (इन्दुकलाहिन्दीव्याख्योपोतः), मोतिलाल बनारसीदास ।
6. व्याकरणमहाभाष्यम् (प्रदीपोद्योतच्छायोपोतम्), चौखम्बा सुरभारती वाराणसी ।
7. भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा ।
8. वैयाकरणभूषणसारदीपिका ।

शोधच्छात्रा (व्याकरणविभागः)

राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)

क. जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - ७७ ।

❖❖❖

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः॥

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77